रामः—(साक्षेपम् ।) अयि वत्स, बहु-तरं द्रष्टव्यम्,अन्यतो दर्शय ।

Śloka 18—Metre :—Mañjubhāṣiṇī.
Pāda of 13 syllables, pause after 6th syllable.

स-ज-सा ज-गौ च यदि मञ्जुभाषिणी ।
सगण जगण सगण जगण गु०
I I S I S I I I S I S I S

1. उद्‌गृहीत-कमनीय-कङ्कणः—उद्‌गृहीतं कमनीयं कङ्कणं येन स तथोक्तः ।

Kaṅkaṇa — made of thread or wool which is worn round the wrist for good luck. It is also called 'hasta-sūtra.' This is tied by the bridegroom to the hand of the bride. (cf. Ragh. XVI. 87).

2. Māṇḍavī—the wife of his elder brother Bharata, receives like Sītā the title of 'āryā' from Lakṣmaṇa.

Rāma—

The self-same hour has returned to me, O my pretty, where your hand presented to me by Gautama, and encircled with lovely nuptial bracelet, overwhelmed me with joy, like a great festival incarnate. (18)

Lakṣmaṇa—Here is my noble sister. Here is the noble Māṇḍavī. And here is the same our young sister-in-law Srutakīrtī.

Sītā—And my dear boy, who is this other lady?

Lakṣmaṇa— (*Aside, with a bashful smile*) Oh, she is asking about Urmilā. Well, I shall direct her attention elsewhere. (*Aloud.*) Noble sister, please see this. It is worth seeing. Here is the revered Bhārgava.

Sītā—(*With a start*) I am trembling.

Rāma—Sage, I bow to you.

Lakṣmaṇa—Behold, noble sister, here by my noble brother, he............(*He is interrupted in the middle of his sentence*).

Rāma—(*Reproachfully*)—Dear brother, there is much to be seen yet. Show something else.

---

3. Śrutakīrtī—the wife of younger brother Śatrughna, is called vadhū — 'young bride.' Out of modesty Lakṣamaṇa does not want to speak out the name of his wife Urmilā.

4. अपवार्य—अप+वृ+णिच् ल्यप्। "तद् भवेद् अपवारितम् रहस्यन्तु यदन्यस्य परावृत्य प्रकाश्यते।"

'Technically it is a stage direction when an actor turns his back on the others, and speaks out something which is not intended for them' (Ray), taking, as if he is speaking within himself.

5. Bhārgava—Paraśurāma, defeated by Rāmcandra. Rāma forbids Lakṣmaṇa to speak of his victory over a venerable foe.

6. ससम्भ्रमम्—सम्भ्रमेण सह यथा स्यात् तथा इति।

सीता — (सस्नेह-बहु-मानं निर्वर्ण्य) सुट्ठू सोहसि अज्जउत्त, एदिणा विणअ-माहप्पेण ।

[सुष्ठु शोभसे आर्यपुत्र, अनेन विनय-माहात्म्येन]

लक्ष्मणः — एते वयम् अयोध्यां प्राप्ताः ।

रामः — (सास्रम्) स्मरामि हन्त स्मरामि ।

जीवत्सु तात-पादेषु[1] नवे दार-परिग्रहे ।
मातृभिश् चिन्त्यमानानां ते हि नो दिवसा गताः॥ १९ ॥

इदम् अपि तदा जानकी ।

प्रतनु-विरलैः प्रान्तोन्-मीलन्-मनोहर-कुन्तलैर् [2]
दशन-मुकुलैर्[3] मुग्धालोकं[4] शिशुर् दधती मुखम् ।
ललित-ललितैर्[5] ज्योत्स्ना-प्रायैर् अकृत्रिम-विभ्रमैर्
अकृत[6] मधुरैर् अम्बानां मे कुतूहलम् अङ्गकैः ॥ २० ॥

लक्ष्मणः — एषा मन्थरा[7] ।

रामः — (सत्वरम् अन्यतो दर्शयन्) देवि वैदेहि,

इंगुदी-पादपः सो ऽयम् शृङ्गवेर-पुरे पुरा ।
निषाद-पतिना[8] यत्र स्निग्धेनासीत् समागमः ॥ २१

Śloka 20— Metre : Hariṇī, Pāda of 17 syllables, pause 6th and 10 syllables.

न-स-म-र-स-ला गः षड्वेदैर् हयैर् हरिणी मता

नगण	सगण	मगण	रगण	सगण	ल०	ग०
।।।	।।S	SSS	S।S	।।।	।	S

1. तात-पादेषु – तातश्च पादाश्च तात-पादाः (कर्मधारयः)

Pāda, when an 'uttara-pada,' indicates respect. Plural of pāda is due to veneration.

2. प्रान्तोन्-मीलन्-मनोहर-कुन्तलैः — (समासः) प्रान्तयोः उन्मीलन्तः मनोहराः ये कुन्तलाः तैः तथोक्तः ।

Sītā (*Gazing at him with tenderness and respect*) – How this magnanimity of soul, full of modesty suits you well, my lord !

Lakṣmaṇa – Here we have arrived at Ayodhyā.

Rāma (*Tearfully*) – I remember, alas, I remember.

Our respected father was still alive...... We were just wedded to our wives......... Gone are those happy days, when our mothers took anxious care of us. (19)

And here is also Jānakī at that time—

With her charming locks, fine, set apart, flowing at the extremities,—with buds of her teeth—still a child, she has a face bearing graciously innocent expression.........So pretty, so pretty (as if) carved out of the moon's splendour, full of unstudied grace, delicious, her limbs delighted my Queen-mothers. (20)

Lakṣmaṇa – Quite so.

Rāma (*At once pointing at another picture*) – Vaidehī, my queen,

Here is the same Iṅgudī *tree in the town of* Śṛṅgavera, *where, formerly, we made an encounter with that loving Niṣāda (chieftain of the hill-tribe).* (21)

---

3. **दशन-मुकुलैः**— (समासः) दशनाः मुकुलाः इव तैः (कर्मधारयः)

4. **मुग्धालोकम्**—(समासः) मुग्धः (मनोहरः) आलोकः (दर्शनं) यस्य तत् ।

5. **ललित-ललितैः**— (समासः) ललितेभ्यो ललितानि तैः ।

6. Akṛta – Aorist. Vedic form. The use of this tense is quite rare in classical Sanskrit.

7. Mantharā—Hunch-back maid-servant of Kaikeyī, the middle wife of king Daśaratha. On her biddings Kaikeyi caused the banishment of Rāma. Rāma does not wish to linger on the sad remembrance of the injustice committed by his step-mother.

8. Niṣāda-pati—the king of aboriginal tribe of India, who was called Guha.

लक्ष्मणः — (विहस्य स्वगतम्) अये, मध्यमाम्बा-वृत्तान्तम् अन्तरितम् आर्येण ।

सीता—अह्मो एसो जडा-संजमण-वुत्तन्तो ।

[अहो, एष जटा-संयमन-वृत्तान्तः]

लक्ष्मणः—पुत्र-संक्रान्त-लक्ष्मीकैर्[1] यत् वृद्धेक्ष्वाकुभिर् धृतम् ।
धृतं बाल्ये तद् आर्येण पुण्यम् आरण्यक-व्रतम् ॥२२॥

सीता — एसा पसण्ण-पुण्ण-सलिला[2] भअवदी भाईरही[3] ।

[एषा प्रसन्न-पुण्य-सलिला भगवती भागीरथी]

रामः — देवि, रघुकुल-देवते, नमस्ते ।

तुरग-विचय-व्यग्रान्[4] उर्वीभिदः[5] सगराध्वरे[6]
कपिल-मह-सामर्षात् प्लुष्टान् पुरा प्रपितामहान्[7] ।
अगणित-तनू-तापं[8] तप्त्वा तपांसि भगीरथो
भगवति तव स्पृष्टान् अद्भिश् चिरात् उदतीतरत्[9] ॥२३॥

Śloka 22—**Metre**: Anuṣṭubh. (See |Page 10).

पुत्र-संक्रान्त-लक्ष्मीकैः—पुत्रे संक्रान्ता लक्ष्मी यैः तैः तथोक्ताः

3. Bhāgīrathī—another name of Gaṅgā.

2. **प्रसन्न-पुण्य-सलिला**—प्रसन्नं (विमलं) पुण्यं-(पावनं) च सलिलं यस्याः सा तथोक्ता ।

Śloka 23—**Metre**: Hariṇī. (See Page 28).

4. **तुरग-विचय-व्यग्रान्**—(समासः) तुरगस्य विचये (अन्वेषणे) व्यग्राः (व्यापृताः) ये ते तान् ।

5. **उर्वीभिदः**—(समासः) उर्वीं भिन्दन्ति इति उर्वीभिदः तान् ॥

6 Sagarādhvare (**Allusion**)—This sacrifice was Aśvamedha. The sacrificial horse was captured by Indra and tied near the sage Kapila who was performing penance in the nether world. 60,000 sons of Sagara went in search of the sacrificial horse. They dug up

Lakṣmaṇa—(*Smiling, aside*)—Ah, my noble brother has skipped over the story of our second mother.

Sītā—Ah, here is the episode, where (my lord) wore matted hair.

Lakṣmaṇa—*The holy vow of hermit, which the old people of Ikṣvāku race used to take, after transferring their sovereignty to their sons, (that vow) has been taken by my noble brother in his very child-hood.* (22)

Sītā—Here, with her limpid and sacred waters, the venerable Bhāgīrathī.

Rāma—O presiding God-head of the Raghu family, I bow to you.

His great-grand-fathers, in view of the sacrifice of Sagara, dug open, formerly, the earth in search of the horse, and Kapila consumed them in the flame of his wrath ;—Bhagīratha indifferent to the sufferings of his body, practised penances and delivered them, long after, by the touch of your waters, O venerable one. (23)

---

the earth and saw the horse tied up near the sage Kapila. They hurled insults on him and were consumed to ashes in the fire of his rage. The place dug by them was called Sāgara. Sagara again sent his grand-son Aṃśumān to find out where his sons were. As he reached the nether world, he was informed by Vainateya of the fate they had met. Only the holy water of the Gaṅgā could take them to heaven. Neither Sagara nor Aṃśumān nor Dilīpa were able to bring down the River Gaṅgā from heaven. Bhagīratha, the son of Dilīpa practised severe austerities at Gokarṇa and brought the river down.

7. Pra-pitāmaha—formed after 'mātāmaha' by transfer of a false improper suffix -āmaha (Renou. 7. 8 C. Wackernagel. II. 1,P. 225).

8. अगणित-तनू तापम्—(समास:) अगणित: तन्व: ताप: यथा स्यात् तथा

9. Udatitarat—Reduplicated aorist from causal of

सा त्वम् अम्ब स्नुषायाम् अरुन्धतीव सीतायाः शिवानुध्यानपरा भव।

लक्ष्मणः – अयम् असौ भरद्वाजावेदितश् चित्रकूट-यायिनि वर्त्मनि वनस्पतिः कालिन्दी-तटे[1] वटः श्यामो नाम।

रामः — (सस्पृहम्[2] अवलोकयति)

सीता — सुमरेदि वा एदं पदेसं अज्जउत्तो ?

[स्मरति वा तं प्रदेशं आर्यपुत्रः ?]

रामः — अयि, कथं विस्मर्यते।

अलस-ललित-मुग्धान्य्[3] अध्व-संजात-खेदाद्[4]
अशिथिल-परिरम्भैर् दत्त-संवाहनानि[5]।
परिमृदित-मृणाली-दुर्बलान्य्[6] अङ्कानि
त्वम् उरसि मम कृत्वा यत्र निद्राम् अवाप्ता ॥२४॥

लक्ष्मणः — एष विन्ध्याटवी-मुखे विराध-संरोधः।

सीता— अलं दाव एदिणा। पेक्खामि दाव अज्जउत्त-स-हत्त-धरिद-ताल-वुन्तादवत्त-निवारिदादपं अत्तणो दक्खिणारण्ण-प्पवेसारम्भम्।

[अलं तावद् एतेन। प्रेक्षे तावद् आर्यपुत्र-स्व-हस्त-धृत-ताल-वृन्तातपत्र-निवारितातपम् आत्मनो दाक्षिणारण्य-प्रवेशारम्भम्]

√tṛ, exceptionally used in classical poetry (Aśvaghoṣa in Saundrānanda I. 144). Bhavabhūti profusely uses such archaic and learned forms. The use of verb °tṛ suggests at the same time that Bhagīratha makes to descend (avatārayati) the holy Gaṅgā, saves (tārayati) his ancesters and makes them go up (ut tārayati) to the heaven. (*Nadine Stchoupak Utt.* P. 15.); the reading 'udadīdharat' has not got such a happy suggestive sense of the word.

1. Kālindī—another name of the river Yamunā.

Śloka 24—Metre : Mālinī. Pāda of 15 syllables. Pause after 8th syllable.

May you, O my mother, like Arundhatī, be full of benevolent welfare for your daughter-in-law Sītā.

Lakṣmaṇa—Here on the bank of Kālindī (Yamunā) is the banian tree named Śyāma, the king of the forest, which Bharadvāja indicated to us on the road which leads to the (mountain) Citrakūṭa.
(*Rāma looks at it with nostalgia*).

Sītā—Does my lord remember this landscape ?

Rāma—Ah, how could I forget it ?
Languid, supple and charming, on account of fatigue caused by the journey,— being shampooed by my close clasps,— frail like the filament of crushed lotus—your slender limbs which you laid on my bosom and sank into slumber. (24)

Lakṣmaṇa — Here is our encounter with Virādha at the entrance of the Vindhya forest.

Sītā — Oh, let it be alone ! I will rather see my noble lord protecting me from the heat with a parasol of palm leaf, which he is carrying in his hand, when we were about to penetrate into the southern forest.

न-न-म-य य-युतेयं मालिनी भोगिलोकैः
नगण नगण मगण यगण यगण
।।। ।।। ऽऽऽ ।ऽऽ ।ऽऽ

2. Saspṛhaṃ—*with nostalgia, home-sickness* or *feeling of intense longing.*

3. **अलस-ललित-मुग्धानि**—अलसानि च ललितानि च मुग्धानि च तानि (द्वन्द्वः) ।

4. **अध्व-संजात-खेदात्**—अध्वनः संजातः खेदः यः स तस्मात्

5. Saṃvāhana—has several meanings but here : 'gentle message,' 'pressing of limbs to remove fatigue.'

6. **परिमृदित-मृणाली-दुर्बलानि**—परिमृदिता या मृणाली तद्वत् दुर्बलानि यानि तानि । (कर्मधारयः) *(Notes continued)*

रामः— एतानि तानि गिरि-निर्झरिणी-तटेषु
वैखानसाश्रित-तरूणि[1] तपोवनानि ।
येष्व् आतिथेय[2]-परमाः शमिनो[3] भजन्ते
नीवार-मुष्टि-पचना[4] गृहिणो गृहाणि ॥ २५ ॥

लक्ष्मणः— अयम् अविरलानोकह-निवह-निरन्तर-स्निग्ध-नील-परिसरारण्य-परिणद्ध-गोदावरी-मुखर-कन्दरः[5] सततम् अभिष्यन्दमान-मेघ-मेदुरित-नीलिमा[6] जनस्थान-मध्यगो[7] गिरिः प्रस्रवणो नाम ।

रामः— स्मरसि सुतनु,[8] तस्मिन् पर्वते लक्ष्मणेन
प्रतिविहित-सपर्या-सुस्थयोस्[9] तान्य् अहानि ।
स्मरसि सरस-नीरं तत्र गोदावरीं वा
स्मरसि च तद्-उपान्तेष्व् आवयोर् वर्तनानि ॥२६॥

आर्यपुत्र-स्वहस्त इत्यादि — (समासः) आर्यपुत्रस्य स्वहस्तेन धृतं यत् तालवृन्तं तदेव आतपत्रं तेन निवारितः आतपः यस्य स तम् । Qualifying 'ārambha'

Śloka 25—Metre: Vasantatilakā (for definition see P.11).

1. वैखानसाश्रित-तरूणि—विखानसस्य इदं वैखानसम्—वैखानसैः आश्रिताः तरवः येषु तानि।

Vaikhānasa—an anchorite (Vānaprastha). Its derivation is uncertain. Bhāgavata in Rāmapañcādhyāya uses the word 'Vikhānasa' meaning '*Brahman*'. If it is to be accepted, then it would mean 'those who have renounced the world for *Brahman*.'

2. आतिथेय—अतिथिषु साधु इति अतिथि+ढञ् (एय्) ।
3. शमिनः—शमः एषां अस्ति इति शमिन्, शम्+इनि ।
4. नीवार-मुष्टि-पचनाः— नीवारस्य मुष्टिं पचन्ति ये ते तथोक्ताः।
5. अविरल इत्यादि । (समासः) अनसः शकटस्य अकं गतिं हन्ति इति अनोकहः (वृक्षः) — अविरलानां अनोकहानां निवहेन निरन्तराः स्निग्धाः नीलाः परिसराः त एव अरण्याः तैः परिणद्धा

Rama — *Here are, along the banks of the mountain-rivulets, the penance-groves, the trees of which give shelter to the hermits,—where the anchorites deeming hospitality as their supreme duty, and the householders, cooking handful of rice, dwell in their homes.* (25)

Lakṣmaṇa — Here is — clusters of dense trees, bordering with a uniform deep blue, the forests which surround the Godāvarī, whose rumblings make its caverns resound,— the incessant pouring of the clouds thickening its dark splendour,—standing into the middle of Janasthāna, the mountain Prasravaṇa by name.

Rama — *Do you recollect, my pretty, the days in that mountain when the services of* Lakṣmaṇa *rendered our lives so sweet ? — Do you recollect the Godāvarī with her exquisite ripples ? — Do you recollect our pastimes in its neighbourhood ?* (26)

या गोदावरी तस्याः मुखराः कन्दराः यस्मिन् स तथोक्तः ।

6. **अभिष्यन्दमान—इत्यादि—(समासः)** अभिष्यन्दमानैः मेघैः मेदुरिता नीलिमा यस्य स तथोक्तः ।

7. **जनस्थान-मध्यगः—(समासः)** जनस्थानस्य मध्ये गच्छति यः सः ।

Śloka 26—Metre : Mālinī (for definition See P. 33). This verse has been cited by Daśarūpaka as an example of 'deśībhāva' '*circumstances of place*', as one of the determining factor of *rasa* (sentiment).

8. **सुतनु—(समासः)** सुष्ठु (सुन्दरं वा) तनुः (शरीरं) यस्याः सा तत्सम्बुद्धौ ।

(See also III. 15,) Construction, probably incorrect according to the rules of skt. grammarians, but accepted in the literature (cf. Renou P. 282.)

9. **प्रतिविहित-सपर्या-सुस्थयोः—(समासः)** प्रतिविहिता या सपर्या तया सुस्थौ यौ तौ तयोः ।

किम्‌च—किम् अपि किम् अपि[1] मन्दं मन्दम् आसत्ति-योगाद्
अविरलित-कपोलं[2] जल्पतोर् अक्रमेण।
अशिथिलपरिरम्भ-व्यापृतैकैक-दोष्णोर्[3]
अविदित-गत-यामा[4] रात्रिर् एव व्यरंसीत्[5] ॥२७॥

लक्ष्मणः—एष पञ्चवट्यां[6] शूर्पणखा-विवादः।

सीता—हा अज्जउत्त, एत्तिअं दे दंसणं।

[हा आर्यपुत्र, एतावत्ते दर्शनम्]

रामः—अयि, विप्रयोग-त्रस्ते, चित्रम् एतत्।

सीता—जहा तहा होदु। दुज्जणो असुहं उप्पादेइ।

[यथा तथा भवतु। दुर्जनो ऽसुखं उत्पादयति]

रामः—हन्त! वर्तमान इव जनस्थान-वृत्तान्तः प्रतिभाति।

Śloka 27—**Metre**: Mālinī (For, definition. See P. 33). This verse has been quoted by Daśarūpaka (IV 63) as an example of "Sambhoga-śṛṅgāra-rasa" — (erotic sentiment).

1. *Kim api* — Bbavabhūti is very fond of using this phrase (cf. II, 19; IV, 6. VI. 11; Mv. 11, 6; Māl. 1. c. etc.). This indefinite '*Kim api*' indicates to mean '*one does not know why*' as a commentator explains :

" यद् वक्तुम् अपि न शक्यते" (माल० *viii* 13)।

2. अविरलित-कपोलम्—(समासः) अविरलौ कपोलौ यथा स्यातां (द्विवचन) तथा (अव्ययीभावः)।

3. अशिथिल—इत्यादि—(समासः)न शिथिलः अशिथिलः (नञ्) अशिथिलः परिरम्भः (कर्मधा०) तस्मिन् व्यापृतं (एकं एकम् इति) एकैकं दोः (बाहूः) ययोः तयोः तथोक्तयोः (बहुव्रीहिः)

4. अविदित-गत-यामा—(समासः) अविदिताश्च गताश्च यामाः यस्याः सा तथोक्ता (बहुव्रीहिः)।

And then...............

I do not know, how slowly and slowly, with a view to our intimate union, when cheek against cheek, we chatted desultorily,—our arms intertwined in a clasp which did not get loose,—unnoticed, the hours glided away and the night itself seemed to pass. (27).

Sītā – Ah, my lord, this is my last sight of you.

Rāma – Oh, you afraid of separation ! This is but a picture.

Sītā – What does that matter ? A wicked person does cause uneasiness.

Rāma – Alas, these events of Janasthāna appear to me as if they were happening to-day.

'vyaraṃsīt' — (**Grammatical Note**). Aorist, 3rd person singular of √*vi + ram*, ordinarily it is *ātmanepada*, but when preceded by the prefix *vi* or ā, becomes *parasmaipada*.

" व्याङ् परिभ्यो रमः" (पा० १. ३. ८३)

Note—अविदित-गत-यामा रात्रिर् एव व्यरंसीत् ।

There is a **legend** prevalent, quite regardless of the chronology, that this stanza had been corrected by Kālidāsa by substituting *eva* for *evam* (Bhandarkar's Preface of Māl. P. vi—vii).

Pañcavaṭī — A part of Daṇḍaka forest. The modern Pañcavaṭī near Nasik is disclaimed by many scholars as the authentic place referred to in the Rāmāyaṇa.

7 शूर्पणखा—शूर्पा इव नखाः यस्याः सा (बहुव्रीहिः)

Her episode of falling in love with Rāma and then with Lakṣmaṇa and later on the amputation of her nose by Lakṣmaṇa as punishment for threatening Sītā's life, is well-known.

लक्ष्मणः—अथेदं रक्षोभिः कनक-हरिण-च्छद्म-विधिना[1]
तथा वृत्तं पापैर् व्यथयति यथा क्षालितम् अपि ।
जनस्थाने शून्ये विकल-करणैर् आर्य-चरितैः
अपि ग्रावा रोदित्य् अपि दलति वज्रस्य हृदयम्॥ २८॥

सीता (सास्रम्-आत्मगतम्)—अयि देव, रहुकुलाणन्द, एव्वं मम कालणादो किलन्तो आसी ।

[अयि देव, रघुकुलानन्द, एवं मम कारणात् क्लान्त आसीः]

लक्ष्मणः— (रामं निर्वर्ण्य, साकूतम्)—आर्य, किम् एतत् ।
अयं ते वाष्पौघस् त्रुटित इव मुक्तामणि-सरो[2]
विसर्पन् धाराभिर् लुठति धरणीं जर्जर-कणः[3] ।
निरुद्धो ऽप्य् आवेगः स्फुरद्-अधर-नासा-पुटतया[4]
परेषाम् उन्नेयो[5] भवति च भराध्मात-हृदयः॥२९॥

Śloka 28-29—**Metre**: Śikhariṇī, Pāda of 17 Syllables pause after the Sixth.

रसैः रुद्रैश् छिन्ना य-म-न-स-भ-ला-गाः शिखरिणी
यगण मगण नगण सगण भगण ल० गु०
I S S S S S I I I I I S S I I I S

अपि ग्रावा रोदित्य् अपि दलति वज्रस्य हृदयम् ।

The last line is well-known for its simplicity and powerful expression of pathetic sentiment (Karuṇā-rasa). Govardhana makes an allusion of it in his praises for Bhavabhūti in Arya-saptaśatī. (P. 36).

भवभूतेः सम्बन्धाद् भूधर-भूर् एव भारती भाति ।
एतत्कृत-कारुण्ये किम् अन्यथा रोदिति ग्रावा ।

1. कनक-हरिण-च्छद्म-विधिना—(समासः) कनकस्य हरिणः एव च्छद्म तस्य विधिना ।

The Rākṣasa Mārīca, under the garb of a golden deer attracted both the Princes out of their hermitage, while Rāvaṇa carried away with Sītā.

Lakṣmaṇa—*It is here that the wicked Rākṣasas, under the guise of a golden deer committed such acts which pain us even to-day. So poignant is the story of the noble Prince (Rāma) in this desolate Janasthāna that even the rocks would weep and the heart of adamant break.* (28)

Sītā—(*Tearfully aside*) O lord, the joy of the house of Raghu, it is for my sake that you have suffered so.

Lakṣmaṇa—(*Surveying with a significant expression*)

Here is the flood of your tears, which, like a necklace of broken pearls, is trickling down in shower and rolling on the ground drop by drop......... However restrained be the emotion, your quivering lips and nostrils betray to others an excessively sore heart. (29)

---

2. मुक्ता-मणि-सरः—(समासः) मुक्ता एव मणयः तेषां सरः(हारः)

The simile would be defective in the construction of the text. 'muktā-maṇi-sara iva dharṇīṃ luṭhati' would be the correct **Prose-Order**.

3. जर्जर-कणः—(समासः) जर्जराः कणाः यस्य सः । (बहु०)

4. स्फुरद्-अधर-नासा-पुटतया—(समासः) नासायाः पुटं नासा-पुटं (षष्ठी तत्पु०)--अधरश्च नासा-पुटं च अधर-नासा-पुटम् (द्वन्द्वः) स्फुरद्-अधर-नासा-पुटं यस्य तस्य भावः तया "हेतोस् तृतीया"।

5. *Unneya*—A logical term: here meaning: *betrays* or *lets one know* or *guess*. Pot. pass. participles are used with *instrumental* or *genitive* of the agent of the action denoted by the cases

"कृत्यानां कर्तरि वा (पा० २. ३. ७) षष्ठी वा स्यात् ।"

रामः—वत्स,

तत्कालं प्रिय-जन-विप्रयोग-जन्मा[1]
तीव्रो ऽपि प्रतिकृति-वाञ्छया विसोढः[2] ।
दुःखाग्निर् मनसि पुनर् विपच्यमानो[3]
हृन्-मर्म-व्रण इव वेदनां तनोति ॥ 30 ॥

सीता—हद्धी, हद्धी ! अहं वि अदिभूमिं गदेण[4] रणरणा-अएण[5] अज्जउत्त-सुण्णं विअ अत्ताणं पेक्खामि ।

[हा धिक्,हा धिक् ! अहम् अप्य् अतिभूमिं गतेन[4] रण-रणकेनार्य-[5] पुत्र-शून्यम् इवात्मानं पश्यामि]

लक्ष्मणः—भवतु । अन्यतः क्षिपामि । (चित्रं विलोक्य प्रकाशम्) अथैतन् मन्वन्तर-पुराणस्य[6] गृध्रराजस्य तत्र-भवतः तात-जटायुषश्[7] चरित्र-विक्रमोदाहरणम् ।

सीता—हा ताद, णिव्वूढो[8] दे अवच्च-सिणेहो ।

[हा तात, निर्व्यूढस् ते अपत्य-स्नेहः]

Śloka 30 — **Metre**: Praharṣiṇī. Pāda of 14 syllables, and pause after 3rd syllable.

आशाभिर् म-न-ज-र-गाः प्रहर्षणीयम्

मगण नगण जगण रगण गु०
SSS ||| |S| S|S S

Here Rāma and Sītā are represented as feeling the pangs of separation. This prepares them for the coming blow. (Ray)

1. प्रिय-जन-विप्रयोग-जन्मा—प्रियजनः (सीता) तस्य विप्रयोगः (विरहः) तस्मात् जन्म यस्य सः--(बहुव्रीहिः)

2. **Visoḍha** – Past Pass. participle of √*vi + sah + kta*

3. विपच्यमानः—वि + पच + शानच् (कर्म-कर्तरि)

4. Ati-bhūmim gataḥ — (Lit: *gone above the earth*) here: *excessive or reached to its zenith.*

Rāma—Dear boy,
Engendered, at the time, when I was separated from my beloved,—endured in the hope of wrecking a vengeance, so poignant as it was,—the fire of grief, in my heart, is blazing up again, and like a wound in the vitals of the heart, it prolongs my suffering. (30)

Sītā—Alas, alas, at this cry of extreme anguish I too feel myself separated from my lord.

Lakṣmaṇa — (*Aside*) well, I shall divert their attention elsewhere. (*Looking at a picture, aloud*) Here is the illustration of the heroic exploits of the venerable Jaṭāyus, the king of vultures, as old as the age of Manu (4320000).

Sītā—O father dear, faithful to the end was your love towards your children.

---

5. Raṇa-raṇaka—'*the cry of anguish*'
Bāṇa and Daṇḍin use it in the meaning of "*anguish* (utkaṇṭhā) *expressed by the wailings*" (cf. I 38/39, 51/52). Trikāṇḍaśeṣa—the lexicon gives in the sense of Kāma '*passion*'. In this sense it has been used by a comm. of Mālatīmādhava (I. 41) also followed by Strehly and Schmidt, but none of the attested passages seems to justify this interpretation (Stchoupak).

6. मन्वन्तर-पुराणस्य—मनोर् अन्तरं(मन्वन्तरं) मन्वन्तरेण पुराणः यः स तस्य as old as an age of Manu (4320000 years). Ray takes '*Manvantar*' as the proper noun and translates ('*manvantra-old*' *i.e.*, as old as Manvantra himself).

7. **The Episode of Jaṭāyus** is quite famous in the Rāmāyaṇa.

8. निर्व्यूढः—निर् + वि + वह् + क्तः (कर्मणि)।

Past. Pass. Participle from √*vah* meaning 'to carry to end, faithful to the end'.

रामः—हा तात, काश्यप[1], शकुन्त-राज, क नु खलु पुनस् त्वादृशस्य महतस् तीर्थ-भूतस्य साधोः सम्भवः ।

लक्ष्मणः—अयम् असौ जनस्थान-पश्चिमश् चित्रकुञ्जवान् नाम दनु-कबन्धाधिष्ठितो[2] दण्डकारण्य-भागः । तद् इदम् ऋष्य-मूक-पर्वते मतङ्गस्या[3]श्रम-पदम् । तत्र च श्रमणा नाम सिद्धा शबर-तापसी[4] । तद् एतत् पम्पाभिधानं[5] पद्म-सरः ।

सीता—एत्थ किल अज्जउत्तेन विच्छिण्णामरिस-धीरत्तणं पमुक्ककण्ठं रुदिअं आसी ।

[अत्र किलार्यपुत्रेण विच्छिन्नामर्ष-धीरत्वं[6] प्रमुक्त-कण्ठं रुदितं आसीत्]

---

1. Kāśyapa—(**Allusion**.) Out of Dakṣa-Prajāpati's 60 daughters Kāśyapa married eight. One of these Tāmrā gave birth to Śukin, who had a daughter Natā by name. Her daughter was Vinatā, who gave birth to two sons Garuḍa and Aruṇa. Jaṭāyus was the son of Aruṇa. Hence he was the descendent of Kāśyapa.

2. **दनु-कबन्धाधिष्ठितः—दनुः नाम यः कबन्धः (निष्कन्धरो राक्षसः)तेन अधिष्ठितः यः सः ।** (**Allusion**) Danu was a demon without head, with a mouth in his stomach and an eye on the chest. He had arms one *Yojana* long. He had attacked Indra who hurled his Vajra on him, with the result that his head was sunk within his body and he became a *Kabandha*. He wished to devour Rāma and Lakṣmaṇa when they entered the Daṇḍaka forest, but each cut off one of his arms. He troubled the sage Sthūlaśiras who cursed him that his arms would be cut by Rāma and Lakṣmaṇa and he would go to heaven.

Rāma – Alas, father Kāśyapa, king of birds, where possibly could be born as great and holy saint as yourself.

Lakṣmaṇa – Here it is, lying to the west of Janasthāna, a part of Daṇḍaka forest named Citrakuñjavat, haunted by the headless Danu. Here is, on the mountain Ṛṣyamūka, the hermitage of Mataṅga. Here is the saintly Śabarā female anchorite Śramaṇā by name, Here is the lotus-lake called Pampā.

Sītā – It is here, they say that my lord lost both his fortitude and indignation and burst into sobs.

---

3. **The Sage Mataṅga – Allusion.** Bālī after killing the monster *Dundubhi* threw his carcase on the sage Mataṅga, who cursed him that he (Bālī) would meet instantaneous death if he came to the mountain Ṛṣyamūka. So, Bālī always avoided that place and Sugrīva sought shelter on this mountain and was safe from Bālī's attack.

4. Śabarā – **Allusion** – A woman of hill-tribe who became an ascetic. She was the pupil of Mataṅga. When Rāma and Lakṣmaṇa came to her hermitage, she worshipped Rāma, as the sages had told her that she would go to heaven, if she would entertain Rāma. Later she threw herself in the fire and went to heaven.

5. **पम्पाभिधानम्—पम्पा अभिधानं (नाम) यस्य तत् तथोक्तम्**

Pampā is said to be the modern Hampi near Bellary in Southern India.

6. **विच्छिन्नामर्ष-धीरत्वम्—विच्छिन्नं (द्विवचन) अमर्षः धीरत्वं च यस्मिन् कर्मणि यथा स्यात् तथा ।** 'having given up restraint and firmness.'

रामः—देवि, रमणीयम् एतत् सरः ।

एतस्मिन् मद-कल-मल्लिकाक्ष-पक्ष-
व्याधूत-स्फुरद्-उरु-दण्ड-पुण्डरीकाः[1] ।
बाष्पाम्भः-परिपतनोद्गमान्तराले[2]
संदृष्टाः कुवलयिनो भुवो विभागाः ॥ ३१ ॥

लक्ष्मणः—अयम् आर्यो हनुमान् ।

सीता—एसो सो चिर-णिव्विण्ण[3]-जीव-लोअ-पच्चुद्धरण-गुरुओवआरी[4] महानुभावो मारुदी[5] ।

[एष स चिर-निर्विण्ण[3]-जीव-लोक-प्रत्युद्धरण-गुरुकोपकारी[4] महानुभावो मारुतिः[5]]

रामः—दिष्ट्या[6] सोऽयं महाबाहुर् अञ्जनानन्द-वर्धनः[7] ।
यस्य वीर्येण कृतिनो वयं च भुवनानि च ॥ ३२ ॥

सीता—वच्छ, एसो सो कुसुमिद-कदम्ब-तरु-तण्डविअ-बंहिणो[4] किंणामहेओ गिरी जत्थ अणुभाव-सोहग्ग-मेत्त-परिसेस-धूसर-सिरी[9] मुच्छन्दो तुए परुदिएण अवलंबिदो तरुअले अज्जउत्तो आलिहिदो ।

[वत्स, एष स कुसुमित-कदम्ब-तरु-ताण्डवित-बर्हिणः[8] किंनामधेयो गिरिः यत्रानुभाव-सौभाग्य-मात्र-परिशेष-धूसर-श्रीर् मूर्च्छंस् त्वया रुदितेनावलम्बितस् तरु-तल आर्यपुत्र आलिखितः]

Śloka 31 — Metre: Praharṣiṇīya (See P. 40).

1. मद-कल-इत्यादि (समासः) मदेन कलाः ये मल्लिकाक्षाः तेषां पक्षैः व्याधूतानि अतएव स्फुरन्ति उरु-दण्डानि पुण्डरीकाणि येषु ते तादृशाः (बहुव्रीहिः)

2. बाष्पाम्भः-परिपतनोद्गमान्तराले — (समासः) बाष्पाम्भसां यत् परिपतनं तस्य यः उद्गमः तयोः यः अन्तरालः यः स तस्मिन् ।

3. निर्विण्णः—निर + विद् + क्तः कर्तरि । "निर्विण्णस्योपसंख्यानम्" इत्येन 'ण' ।

Rāma – Queen, this lake is charming.

There, uttering cries of love, the geese were shaking with their wings, white lotuses with broad and tremulous stalks, but in the intervals of the rising and falling tide of my tears I perceive the tracts of land arrayed with blue lotuses. (31)

Lakṣmaṇa – Here is the noble Hanūmat.

Sītā — Here is the same Māruti, who contributed to great extent to the deliverance of the human beings, long plunged into despair.

Rāma—*Happily, it is he, of mighty arm, the joy of Añjanā—he by whose valour blessed we are, we and the world.* (32)

Sītā – Brother dear, that mountain, where the peacocks are dancing giddily on the flowering Kadamba trees—what is the name of it?—where my noble lord is painted, fainting at the foot of a tree, as one having obscure glory, when there remained with him, the only charm of dignity and who is supported by you while crying.

---

4. चिर-निर्विराण इत्यादि—चिरात निर्विएणस्य जीवलोकस्य प्रत्युद्धरणां एव गुरुकः उपकारो ऽस्य अस्ति इति ।

5. मारुतिः— मरुतः अपत्य पुमान् मारुतिः ।

Śloka 32 — **Metre**: anuṣṭubh. (See P. 10).

6. diṣṭyā – 'fortunately' (*instrument* of diṣṭi (f.) used as an *adverb.*

7. अञ्जनानन्द-वर्द्धनः—(समासः) अञ्जनायाः आनन्दं वर्धयति यः सः ।

8. कुसुमित-कदम्ब-तरु-ताराडवित-बर्हिणः—(समासः) कुसुमितः कदम्ब-तरवः तेषु तारडवितः बर्हिणः (मयूराः) यस्मिन् सः (बहुव्रीहिः) । *(Notes continued)*

लक्ष्मण:—सोऽयं शैल: कुकुभ-सुरभिर् माल्यवान् नाम यस्मिन्
नील: स्निग्ध: श्रयति शिखरं नूतनस् तोयवाह: ।
आर्येणास्मिन्……

राम:— विरम विरमात: परं न क्षमो ऽस्मि
प्रत्यावृत्त: पुनरिव स मे जानकी-विप्रयोग:॥३३॥

लक्ष्मण:—अत: परम् आर्यस्य तत्रभवतां कपि-राक्षसानां चासंख्या-न्य् उत्तरोत्तराणि कर्माश्चर्याणि । परिश्रान्ता चेयम् आर्या । तद्विज्ञापयामि विश्रम्यताम् इति ।

सीता—उज्जउत्त, एदीणा चित्त-दंसणेण पच्चुपपण्णा-दोहालाए अत्थि मए विण्णावम् ।

[आर्य-पुत्र, एतेन चित्र-दर्शनेन प्रत्युत्पन्न-दोहदाया: अस्ति मे विज्ञापनम्]

राम:—नन्व् आज्ञापय ।

सीता—जाणे पुणो वि पसण्णा-गम्भीरासु वणा-राइसु विहरिस्सं पवीत्र-सोम्म-सिसिरावगाहां भअवदीं भाईरहीं ओगाहिस्संति ।

[जाने पुनर् अपि प्रसन्न-गम्भीरासु वन-राजिषु विहरिष्यामि पवित्र-सौम्य-शिशिरावगाहां भगवतीं भागीरथीम् अवगाहयिष्य इति]

राम:—वत्स लक्ष्मण ।

लक्ष्मण:—एषो ऽस्मि ।

राम:—वत्स, अचिरं संपादनीयो दोहद इति संप्रत्य् एव गुरुभि: सन्दिष्टम् । तद् अस्खलित-सुख-सम्पातं रथम् उपस्थापय ।

---

9. अनुभाव-सौभाग्य-मात्र-परिशेष-धूसर-श्री: — अनुभावस्य सौभाग्यं (षष्ठी-तत्पु०) अनुभाव-सौभाग्यं तद् एव इति अनुभाव-सौभाग्य-मात्रं (कर्म०) अनुभाव-सौभाग्य-मात्रं परिशेषा धूसरा श्रीर् यस्य स तथोक्त: (बहुव्रीहि:) ।

Śloka 33 – Metre : Mandākrāntā. Pāda of 17 syllables pause after 4th and 10th syllable.

मन्दाक्रान्ता जलधि-षडगैर् म-भौ-न-तौ ताद् गुरू चेत् ।

Lakṣmaṇa—*This is the mountain embalmed with Kadamba flowers, named Malayavat, on the peak of which rests glossy and blue, the new cloud. Here the noble brother............*

Rāma—*Leave off, my dear, leave off. Beyond this I cannot endure. The loss of Jānakī seems to have returned to me.* (33)

Lakṣmaṇa – Hereafter follow the countless exploits, one excelling the other, of the noble brother and worthy monkeys and Rākṣasas.........But now, my noble sister is tired. I would propose to her to take rest.

Sītā—My lord, by the sight of these pictures, a longing has arisen in me and I have a request to make.

Rāma—Rather command me.

Sītā—I would love once again to have a strol in these graciously affable and thick wooden tracks and take a plunge into the purifying waters, exquisite and cool, of the holy Bhāgīrathī.

Rāma—Dear Lakṣmaṇa...........

Lakṣmaṇa—Here I am.

Rāma—Dear brother, "Her longings must be satisfied without delay",—so our elders have just sent a message. So, let a chariot, which rolls comfortably without jolts, be brought.

मगण भगण नगण तगण तगण गु० गु०
SSS SII III SSI SSI S S

—पवित्र-सौम्य-शिशिरावगाहाम्—पवित्रः सौम्यः शिशिरश् च अवगाहः यस्याः सा ताम् ।

Compare { नूतनस् तोयवाहः— । (उत्तर०)
नवं पयो यत्र घनैर् मया च
त्वद्विप्रयोगाश्रुसमं विसृष्टम् । (रघु० *viii* 26)

सीता—अज्जउत्त, तुह्मेहिं वि तहिं गन्दव्वं।

[आर्यपुत्र, युष्माभिर् अपि तत्र गन्तव्यम्]

रामः—अयि, कठिन-हृदये, एतद् अपि वक्तव्यम् एव।

सीता—तेण हि पिअं मे [तेन हि प्रियं मे]

लक्ष्मणः—यथाज्ञापयत्य् आर्यः। [इति निष्क्रान्तः]

रामः—प्रिये, अत्र वातायनोपकण्ठे मुहूर्तं संविष्टौ भवावः।

सीता—एव्वं होदु। ओहीरिज्झामि क्खु परिस्सम-जणीदाए णिद्दाए।

[एवं भवतु। अपह्रिये खलु परिश्रम-जनितया निद्रया]

रामः—

जीवयन् इव ससाध्वस-श्रम-स्वेद-बिन्दुर्[1] अधिकण्ठम्[2] अप्यताम्
बाहुर् ऐन्दव-मयूख-चुम्बित-स्यन्दि-चन्द्रमणि-हार-विभ्रमः[3]॥३४

विनिश्चेतुं शक्यो न सुखम् इति वा दुःखम् इति वा
प्रबोधो निद्रा वा किम् उ विष-विसर्पः[4] किम् उ मदः।
तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रिय-गणो
विकारश् चैतन्यं भ्रमयति समुन्मूलयति च ॥३५॥

1—ससाध्वस-श्रम-स्वेद-बिन्दुः—साध्वसं श्रमश् च साध्वस-श्रमौ तयोः यः स्वेदः तस्य बिन्दवः तैः सह इति ससाध्वस०(बहु०)

2—अधि-कण्ठम्—कण्ठे अधि इति (अव्ययीभावः)

3—ऐन्दव-मयूख—इत्यादि। इन्दोर् अयं ऐन्दवम् ऐन्दवाश्-च ते मयूखाः तैः चुम्बितः (अतएव) स्यन्दी चन्द्रमणीनां हारः तद् इव विभ्रमः (शोभा) यस्य स तथोक्तः (बहुव्रीहिः)

Candramaṇi synonym of candrakānta-maṇi. It is believed by Skt. poets that moon-stone oozes 'amṛta' when placed in the rays of the moon.

4—विसर्पः—वि+सर्प+घञ् (भावे)

सीता—थिरप्पसादा तुह्मेत्ति इदो दाणीं किं अवरं ?

[स्थिर-प्रसादा यूयम् इत इदानीं किम् अपरम् ?]

रामः—म्लानस्य जीव-कुसुमस्य विकासनानि
सन्तर्पणानि सकलेन्द्रिय-मोहनानि ।
एतानि ते सुवचनानि सरोरुहाक्षि
कर्णामृतानि[1] मनसश् च रसायनानि[2] ॥ ३६ ॥

सीता—प्रियंवद[3], एहि संविसह्म ।

[प्रियंवद,[3] एहि संविशावः]

(इति शयनाय समन्तात् निरूपयति)

रामः—किम् अन्वेष्टव्यम् ?

आविवाह-समायाद् गृहे वने शैशवे तदनु[4] यौवने पुनः ।
स्वापहेतुर् अनुपाश्रितो ऽनया राम-बाहुर् उपधानम्[5] एष ते॥३७॥

सीता—(निद्रां नाटयति)—अत्थि एदम्, अज्जउत्त, अत्थि एदं (इति स्वपिति)।

[अस्त्य् एतद् आर्यपुत्र, अस्त्य् एतद्]

रामः—कथं प्रिय-वचना मे वक्षसि प्रसुप्तैव ? (निर्वर्ण्य)

---

example of *moha* 'bewilderment, frenzy' (one of the accessories of *Rasa*) and also (IV. 63) as an example of sambhoga-śṛṅgāra 'erotic sentiment.' Rasaratnahāra (81) quotes the same as '*prabodho nidrā vā*" which is equivalent to *moha*.

Śloka 36. Metre : Vasantatilakā (See Page 11).

1. 'Karṇāmṛta'– The association between the 'vacana' *word* and 'amṛta' *ambrosia* is quite common in Sanskrit Literature. But 'karṇāmṛta' seems to be the creation of Bhavabhūti alone. (cf.IV, 18,19. Mv. I. 23/24) In Bālrāmāyaṇa, a drama of Rajśekhara the word 'śravaṇāmṛta' is mentioned (IX, 53/54).

Sītā – Your favour is constant for me. How could it be otherwise ?

Rāma—*Bloom of the languishing flower of my life,—delightful, (at the same time) stupefying all my faculties,—such are your honeyed words, O lotus-eyed woman,—nectar for my ears and elixir for my heart.* (36)

Sītā – O flatterer, come, let us lie down. (*She looks all round for a place to lie down*).

Rāma --Well, what are you looking for ?

Ever since our marriage, in our home, in the forest, in your girlhood and later in your youth, again—this arm of Rāma has been your pillow. It has made you (alone) sleep on it and none has ever leaned on it. (37)

Sītā – (*Gesticulates sleeping*) Quite so, my lord, quite so. (*Falls asleep*).

Rāma – Eh, what, has the honeyed-tongue really fallen asleep on my bosom ? (*Staring at her lovingly*).

---

2. **रसायनानि**—आय्यते (आनीयते) ऽनेन इति अयनम् रसस्य अयनं रसायनम् (जगद्धर:) ।

'Elixir, invigorating remedy'. *Rasa* also means mercury. It is thought that mercury, if properly medicated, is a means of prolonging one's life. It also brings immunity against disease and old age.

3. **प्रियंवद:**—प्रियं वदतीति प्रिय+वद्+खच् (कर्तरि) ।

Śloka 37. Metre : Rathoddhatā (See Page 49)

4. **आविवाह समयात्**—'ā' governs a noun in the ablative. 'Anu'—governs a word in the accusative.

5. **उपधानम्**—उपधीयते शिर: अत्र इति ।

इयं गेहे लक्ष्मीर् इयम् अमृतवर्तिर् नयनयोर्
असाव् अस्य: स्पर्शो वपुषि बहुलश् चन्दन-रस: ।
अयं बाहुः कण्ठे शिशिर-मसृणो[1] मौक्तिक-सरः
किम् अस्या न प्रेयो यदि परम् असह्यस् तु विरह:[2]?॥३८॥

(प्रविश्य) प्रतिहारी—देव उवट्ठिदो.........

राम:—अयि, क: ?

प्रतीहारी—आसण्ण-परिआरओ देवस्स दुम्मुहो[3] ।

[आसन्न-परिचारको देवस्य दुर्मुख:]

राम:—(स्वगतम्) शुद्धान्त-चारी दुर्मुख:[3] । स मया पौर-जानपदेष्व् अपसर्प: प्रहित: । (प्रकाशम्) आगच्छतु ।

(प्रतीहारी निष्क्रान्ता)

(प्रविश्य) दुर्मुख: (स्वगतम्)—हा कहं सीता-देइए ईदिसम् अचिन्तणिज्जं जणाववादं देवस्स कहइस्सं ? अहवा णिओओ क्खु ईदिस्सो मे मन्द-भाअस्स ।

[हा कथं सीता-देव्या ईदृशम् अचिन्तनीयं जनापवादं देवस्य कथयिष्यामि ? अथवा नियोगो खलु ईदृशो मे मन्द-भाग्यस्य]

Śloka 38—**Metre** ! Śikhariṇi. (See Page 38).

This verse has been cited by Daśarūpaka III, 16 as an example of 'gaṇḍa', by Vāmana in Kāvyālaṅkāra (IV, 3. 6.) as an example of 'rūpaka' *metaphor*, by Sarasvatī (v. 167) as an example of 'ābhimānikī' (prīti) *affection based on high esteem*.

1. शिशिर-मसृण: —(समास:) शिशिरश्चासौ मसृणश्च(कर्म०)

2. A co-incidence of linking the words is remarkable here. Rāma's last word in Sloka 38 was '*Viraha*' whereupon the Pratīhārī adds *upasthita*. The whole linked would mean : '*separation has arrived or is at hand.*' So Rāmacandra is struck with this co-incidence, which is interpretted as unconscious announcement of the coming calamity which is imminent, producing thereby a dramatic effect which is termed 'Gaṇḍa' "*sally* or *witti-*

She is the wealth of my house, she is an ambrosial pencil for my eyes,—a contact with her is like a thick sandal-paste (lit. juice) on the body, and this arm of her around my neck is a cool and smooth necklace of pearls.........What is that which pertains to her, is not dear to me, excepting only her intolerable separation ? (38)

(*Enter*) **Door-Keeper**—My lord, (it) has come.

Rāma—Aye, who then ?

Door-Keeper—Durmukha, the secret attendant of Your Majesty.

Rāma—(*Aside*) Durmukha—he moves directly in the harem. He has been appointed by me to spy on the town and country people. (*Aloud*) Usher him in. (*The Door-Keeper goes out*).

(*Enter*) **Durmukha** (*Aside*)—Ah, how shall I convey to His Majesty, the inconceivable scandal about the queen Sītā that is afloat among the people ? Or this, in fact, is the duty of an unfortunate person like me.

---

cism" cf. (Théatre Indien 105) or 'Patākāsthāna' in works on Dramaturgy. " The Discourses which seem to interpret those of the hero, while in reality they are attached intimately with the 13 elements of 'vīthi' are called Gaṇḍa" (Stchoupak P. 22, n.). Gaṇḍa has been defined as —

गण्डः प्रस्तुत-सम्बन्धि भिन्नार्थं सहसोदितम् (दशरूपक) ।

Patākāsthāna has been defined as—

यत्रान्यस्मिन् युज्यमाने तल्लिंगेभ्यः प्रयुज्यते ।

आगन्तुकेन भावेन पताका-स्थानकं तु तत् ॥

3. **Durmukha**—*Ominous looking or one who has an ugly face.* Bhavabhūti has given him a name which conforms his rôle and is suggestive at the time of his appearance, since he brings bad news.

सीता—(उत्स्वप्नायते[1])—हा अज्जउत्त, सोम्म, कहिं सी ?

[हा आर्यपुत्र, सौम्य, कुत्रासि ?]

रामः—अये, सैवेयं रण-रणक-दायिनी चित्र-दर्शनाद् विरह-भावना-देव्याः स्वप्नोद्वेगं करोति। (सस्नेहम् अङ्गम् अस्याः परामृशन्)

अद्वैतं[2] सुख-दुःखयोर् अनुगुणं[3] सर्वास्व् अवस्थासु यद्
विश्रामो हृदयस्य यत्र जरसा यस्मिन्न् अहार्यो रसः।
कालेनावरणात्ययात् परिणते यत् स्नेह-सारे स्थितं
भद्रं[4] तस्य सुमानुषस्य[5] कथम् अप्य् एकं हि तत् प्राप्यते॥३९॥

दुर्मुखः— (उपसृत्य) जेदु देव्वो। [जयतु देवः]

रामः— ब्रूहि यद् उपलब्धम्।

दुर्मुखः—उवट्ठवन्ति देवं पौर-जाणपदा विसुमरिदा अह्मे महाराअ-असरहस्स रामभद्देणेति।

[उपस्तुवन्ति देवं पौर-जानपदा विस्मारिता वयं महाराज-दशरथस्य रामभद्रेणेति]

रामः—अर्थवाद[6] एषः। दोषं तु मे कंचित् कथय येन स प्रतिविधीयते[7]।

---

1. उत्स्वप्नायते—उत्स्वप्न इव आचरति इति उत्स्वप्नायते। उत्स्वप्न+क्यङ्+(लट्)+ते

Utsvapnāyate – '*talks in sleep.*' A denominative verb from '*Svapna*' with a prefix *ut*.

Śloka 39. – **Metre**: Śārdūla-vikrīḍitam. Pāda of 19 syllables, pause after 12th syllable.

सूर्याश्वैर् म-स-ज-स्-त-ताः सगुरवः शार्दूल-विक्रीडितम्।

मगण	सगण	जगण	सगण	तगण	तगण	गु०
SSS	IIS	ISI	IIS	SSI	SSI	S

This verse is cited by Daśarūpaka (II. 6) characteristic of a hero faithful to a single beloved 'anukūla-nāyaka' or 'ek-nāyika.' Sarasvatī cites (V. 172) it as an example of "kāmodreka" *effect of love.*

Sītā (*Talks in her sleep*) – O, my gentle lord, where are you ?

Rāma – Ah, here is the same distressing thought of separation, inspired by seeing pictures, that is disturbing the sleep of the queen and makes her groan. (*Affectionately caressing her body*)

Who stays uniform in prosperity and adversity, who is conformable in all conditions of life, who is solace of the heart, the flavour of which cannot be robbed by the old age,—who, when the time has let fall the veil of reserve, dwells in whatever is the best in the form of ripened love,......blessings be showered on that fortunate man, who, with great difficulty, is to be encountered just once. (39)

Durmukha (*Approaching*) – Victory to my lord !

Rāma – Say, what (information) has been procured ?

Durmukha – Citizens and country people praise Your Majesty : "Gentle Rāma has made us forget the great king Daśaratha", they say.

Rāma – This is a compliment. Tell me some wrong so that it may be repaired.

2—3. *Advaita* – non-duality; *anuguṇa* 'which follows the mood,' 'adaptation.' Both are philosophical terms.

द्वैतम्—द्वि+इत्+अर् अविद्यमानं द्वैतम् अस्मिन् इति अद्वैतं (बहुव्रीहि:) अनुगतं गुणम् इति अनुगुणम् ।

4. *Bhadram* with genitive or dative is used in the sense of benediction (āśiṣ Pān. II, 3, 73)

5. Sumānuṣa—The commentators give three interpretations of it : (1) dāmpatya '*conjugal union*,' (2) subhago mānuṣa '*excellent man*' and (3) saujanyam '*nobleness of character*.'

6. अर्थवाद:—वदनम् इति वद्+घञ् । अर्थस्य वाद: अर्थवाद: ।

'A statement made with object of gaining some end, hence a flattery.' This is the term of Vedānta. A passage which

दुर्मुखः (सास्रम्)—सुणादु देओ। (कर्णे) एवं विअ,[1] इति [शृणोतु देवः (कर्णे) एवम् इव इति]

रामः—अहह, तीव्र-संवेगो वाग्-वज्रः (इति मूर्च्छति)

दुर्मुखः—अस्ससदु देव्वो। [आश्वसितु देवः]

रामः—(आश्वस्य)

हा हा धिक् पर-गृह-वास-दूषणं यद्
वैदेह्याः प्रशमितम्[2] अद्भुतैर् उपायैः।
एतत् तत् पुनर् अपि दैव-दुर्विपाकाद्[3]
आलर्कं[4] विषम् इव सर्वतः प्रसृप्तम् ॥ ४० ॥

तत्किम् अत्र मन्द-भाग्यः करोमि ? (विमृश्य सकरुणम्)। अथवा किम् अन्यत् ?

सतां केनापि कार्येण लोकस्याराधनं व्रतम्।
यत् पूरितं हि तातेन मां च प्राणांश्च मुञ्चता ॥ ४१ ॥

सम्प्रत्य् एव च भगवता वसिष्ठेन संदिष्टम्। अपि च—

यत्सावित्रैर् दीपितं भूमिपालैर्
लोक-श्रेष्ठैर् साधु शुद्धं चरित्रम्।
मत्संबन्धात् कश्मला किं-वदन्ती
स्याच् चेद् अस्मिन् हन्त धिङ् माम् अधन्यम्॥४२॥

हा देवि, देव-यजन-संभवे, हा स्व-जन्मानुग्रह-पवित्रित-वसुंधरे[5]

---

only aims at the eulogy and which, therefore, is secondarily connected to the sense of the text. (cf. G. Thibaut Vedāntasūtra.) In the term of Nyāya it means an enunciation which under the form of eulogy, blame etc., aims at some *design* or indicates a *motive*. (Nyāya Sū. II. 1. 62–64)

7. Pratividhīyate – Present Pass. of √prati + vi + dhā.

1. 'Karne evam evam' – A usual formula used at the time when a statement is not communicated to the audience.

Śloka 40. — Metre: Praharṣiṇī. (See Page 40).

Durmukha (*Tearfully*) – Listen, Sire.........(*Whispers in her ears*). " That is so"......I say.

Rāma – Ah, how cruelly cutting remarks like a thunder-bolt ! (*Faints*)

Durmukha – compose yourself, Sire.

Rāma – (*Regains consciousness*)—

Ah, what a shame.........whatever suspicion, on account of her stay in a stranger's house, was fostered against the Princess of Videha, it was effaced by miraculous means.—Here, again, it is the evil design of the destiny, which like the venom of mad dog, has diffused in every direction. (40)

What shall I do here, unfortunate that I am ? (*Reflecting in a pathetic tone*) or what else ?

The duty of the noble (kings) is to satisfy their people, no matter with what act,—It was my father who accomplished it by renouncing me and his life. (41)

Presently, still the venerable Vasiṣṭha has sent a word to me. And besides.........

The descendants of the Sun, the monarchs, the gems of the world, who made their history saintly and pure,—if, on my account, there spreads in it (history) an infamous rumour, woe and shame to me, the unblest. (42)

Ah, O, queen, born out of the place of divine sacrifice; ah, O you, who by favour of her birth has

---

2. प्रशमित—प्र+शम्+णिच्+क्तः कर्मणि प्रशान्तं प्रशमितं वा

3. दुर्विपाकः—दुष्टो विपाकः दुर्विपाकः ।

4. अलर्कस्य इदं आलर्कम् alarka — mad-dog.

Śloka 42. – dīpitam. Past. Pass. Participle from the causal √dīp.

5. स्वजन्मानुग्रह-पवित्रित-वसुन्धरे— (समासः) स्व जन्म एव अनुग्रहः तेन पवित्रिता वसुन्धरा यया सा तत्सम्बुद्धौ ।

हा निमि-जनक-नन्दिनि,[1] हा पावक-वसिष्ठारुन्धती-प्रशस्त-शील-शालिनि,[2] हा राम-मय-जीविते,[3] हा महारण्यवास-प्रिय-सखि, हा तात-प्रिये, हा स्तोक-वादिनि,[4] कथम् एवं-विधायास् तवायम् ईदृश: परिणाम: !

त्वया जगन्ति पुण्यानि त्वय्य् अपुण्या जनोक्तय: ।
नाथवन्तस् त्वया लोकास् त्वम् अनाथा विपत्स्यसे ॥४३॥

(दुर्मुखं प्रति)—दुर्मुख, ब्रूहि लक्ष्मणम् 'एष ते नूतनो राजा राम: समाज्ञापयति'। (कर्णे) एवम् एवम् इति ।

दुर्मुख:—हा कहं दाणीं अग्गि-परिशुद्धाए गब्भ-ठिद-पवित्त-रहु-उल-संताणाए देइए दुज्जण-वअणादो एवं अणज्जं अज्झवसिदं देव्वेण ।

[हा कथम् इदानीम् अग्नि-परिशुद्धाया गर्भ-स्थित-पवित्र-रघु-कुल-संतानाया देव्या दुर्जन-वचनाद् एवम् आनार्यम् अध्यवासितं देवेन]

राम:—शान्तम् ! कथं पौर-जानपदा: ?

इक्ष्वाकु-वंशो ऽभिमत: प्रजानां
जातं च दैवाद् वचनीय-बीजम् ।
यच् चाद्भुतं कर्म विशुद्धि-काले
प्रत्येतु कस् तद् ह्य् अति-दूर-वृत्तम् ॥ ४४ ॥

तद् गच्छ ।

दुर्मुख:—हा देई !......[हा देवि......](इति निष्क्रान्त:)

राम:—हा कष्टम् अति-बीभत्स-कर्मा नृशंसो ऽस्मि संवृत्त: ।

शैशवात् प्रभृति पोषितां प्रियां
सौहृदाद् अपृथगाश्रयाम् इमाम् ।

---

1. निमि-जनक-वंश-नन्दिनि—निमे: जनकस्य च वंशं नन्दयति या सा तत्सम्बुद्धौ—Nimi was the ancestor of Janaka.

2. पावक--वसिष्ठारुन्धती-प्रशस्त-शील-शालिनि — पावकेन वसिष्ठेन, अरुन्धत्या च प्रशस्तं यत् शीलं तेन शालते (शोभते) या सा तत् सम्बुद्धौ ।

sanctified the earth; ah, O joy of the family of Nimi and Janaka; ah, you whom the fire, Vasiṣṭha and Arundhatī have proclaimed of chaste character; ah, you whose Rāma is all her life; ah, darling comrade of my sojourn in the grand forest; ah, O favourite of my father; ah, O woman of few words; — how, for you — such as you are, a similar turning point of destiny.

Through you the worlds are pure, but impure with regard to you, are the gossips of the people.—In you people have a protector, but without a protector you are going to perish. (43)

(*To Durmukha*) Durmukha, tell Lakṣmaṇa that your new King Rāma commands: (*He speaks to him in the ear*). 'That is so'.........I say.

Durmukha — Ah, why? The queen has entirely been declared pure by the fire; she bears in her womb the pure offspring of the race of Raghu, and Your Majesty, just on account of the idle gossips of the wicked, takes with regard to the queen an uncalled-for decision.

Rāma — Good gracious! How wicked of the citizens and country people!

The line of Ikṣvāku is held in respect by their subjects, and the germ of calumny is the working of the destiny. As for the miracles at the time of Fire-Ordeal, who would have confidence on them, since they happened far away? (44)

Go, then.

Durmukha — O queen, (*He goes out*).

Rāma — Ah, misery! ......I have become heartless wretch, perpetrator of the most abominable action.

My beloved, whose care I took from her girlhood, who had not any other refuge beside my love,—

---

3. राम-मय-जीविते—राममयं एव जीवितं यस्याः सा तत्सम्बुद्धौ।
4. स्तोक-वादिनी—स्तोकं वदति या सा तत्सम्बुद्धौ।

Śloka 44. — Metre: Indravajrā (See Page 22).

छद्मना परिददामि मृत्यवे
सौनिको[1] गृह-शकुन्तिकाम् इव ॥ ४५ ॥

तत् किम् अस्पर्शनीयः पातकी देवीं दूषयामि।
(इति सीतायाः शिरः स्वैरम् उन्नमय्य बाहुम् आकर्षन्)

अपूर्व-कर्म-चण्डालम्[2] अयि मुग्धे विमुञ्च माम्।
श्रितासि चन्दन-भ्रान्त्या दुर्विपाकं विष-द्रुमम् ॥ ४६ ॥

(उत्थाय)—हन्त हन्त, विपर्यस्तः संप्रति जीव लोकः। पर्यवसितम् अद्य जीवित-प्रयोजनं रामस्य। शून्यम् अधुना जीर्णारण्यं जगत्। असारः संसारः। कष्टप्रायं शरीरम्। अशरणो ऽस्मि। किं करोमि ? का गतिः ? अथवा.........

दुःख-संवेदनायैव रामे चैतन्यम् आहितम्[3]।
मर्मोपघातिभिः[4] प्राणैर् वज्र-कीलायितं[5] हृदि ॥ ४७ ॥

हा अम्ब अरुन्धति, हा भगवन्तौ वसिष्ठ-विश्वामित्रौ, हा भगवन् पावक, हा देवि भूत-धात्रि[6], हा तात जनक, हा तात, हा मातरः, हा प्रिय-सख सुग्रीव, हा सौम्य हनूमान्, हा परमोपकारिन् लङ्काधिपते विभीषण, हा सखि त्रिजटे[7], परिमुषिताः स्थ परिभूताः स्थ राम-हतकेन[8] ! अथवा को नाम तेषाम् अहम् आह्वाने ?

Śloka **45.** – **Metre**: Rathoddhatā. (See P. 49).

1. **सौनिकः**—सूना (वध्य-स्थानं, मांस-विक्रय-स्थानं विक्रेयं मांसं वा) तया जीवति इति सौनिकः।

2. अपूर्व-कर्म-चण्डालः। अपूर्वश् चासौ कर्मचण्डालः।

3. **आहितम्**—आ+धा+क्तः, (कर्मणि)।

4. **मर्मोपघातिभिः**—मर्माणि उपघ्नन्ति ये ते तैः।

Śloka **47.** 5. – vajra-kīlāyitam – denominative vajra-kīla. 'dart of adamant' (Belvalkar). After Madame Stchoupak we have also followed the interpre-

treacherously I am handing her over to Death, like a butcher does a tame little bird. (45)

But, why do I—an untouchable sinner, pollute the queen ? (*He raises slowly the head of* Sītā *and withdraws her arm*)

O sincere woman, leave me—a despicable wretch, who has committed an unprecedented act... Believing that it was a sandal, you have clung to a poisonous tree of fatal consequences. (46)

(*He rises up*) Alas, alas, henceforth, convulsed is the world of the living beings ! Finished to-day is the purpose of Rāma's life. The world now is a desert—a devastated forest ! The existence is without savour, the body has given itself up to suffering ! I am helpless. What shall I do ? What recourse ? Or else......

In order, that he may feel the pinch of misery, that consciousness has been given to Rāma,—my life is striking me at the vitals. It is pierced like a thunder-bolt in my heart. (47)

Ah, mother Arundhatī, ah, venerable Vasiṣṭha and Viśvāmitra, ah, venerable Fire, ah, goddess Earth (the foster-mother of living beings), ah, father Janaka, ah, my father, ah, my mothers, ah, my dear friend Sugrīva, ah, my loving Hanūmat, ah, my supreme helper Vibhīṣaṇa—the King of Laṅkā, ah, my friend Trijaṭā,—you are robbed, you have been scoffed at by this miserable Rāma ! Or who am I to invoke them ?

---

tation of Bergaigne which is confirmed by Mv. I. C. न्यक्कारो हृदि-वज्रकील इव मे तीव्रः परिस्पन्दते where it means *piercing like thunder-bolt in my heart.*

वज्रस्य कीलः वज्रकीलः तद् इव आचरति इति वज्रकीलायते ।

6. Bhūtadhātri—periphrasic form of the earth. 'supporter of the being' (Kane).

7. Trijaṭā. A female demon who was kept on guard of Sītā in the Aśoka-vāṭikā at Rāvaṇa's palace in Laṅkā.

8. राम-हतक—रामश्चासौ हतकः (कर्मधारयः) ।

ते हि मन्ये महात्मानः कृतघ्नेन[1] दुरात्मना ।
मया गृहीत-नामानः[2] स्पृश्यन्त इव पाप्मना ॥ ४८ ॥

योहम्—

विस्रम्भाद् उरसि निपत्य लब्ध-निद्राम्
उन्मुच्य परिगृहिणीं गृहस्य शोभाम् ।
आतङ्क-स्फुरित-कठोर-गर्भ-गुर्वीं[3]
क्रव्याद्भ्यो[4] बलिम्[5] इव निर्घृणः[6] क्षिपामि ॥ ४६ ॥

(सीतायाः पादौ शिरसि कृत्वा)—देवि, देवि, अयं पश्चिमस् ते राम-शिरसा पाद-पङ्कज-स्पर्शः । (इति रोदिति)

(नेपथ्ये) अब्रह्मण्यम् ! अब्रह्मण्यम् !

रामः—ज्ञायतां भोः, किम् एतत् ! (पुनर् नेपथ्ये[8])

ऋषीणाम् उग्र-तपसां[9] यमुना-तीर-वासिनाम्[10]।
लवण-त्रासिताः स्तोमस् त्रातारं त्वाम् उपस्थितः॥ ५० ॥

रामः—आः कथम् अद्यापि राक्षस-त्रासः ? तद् यावद् अस्य दुरात्मनः कुम्भीनसी[11]-पुत्रस्योन्मूलनाय शत्रुघ्नं प्रेषयामि (कतिचित् पदानि गत्वा पुनर् निवृत्य) हा देवि, कथं एवं गता भविष्यसि ? भगवति वसुन्धरे, सुश्लाघ्यां दुहितरम् अवेक्षस्व जानकीम् ।

Śloka **48** – **Metre :** 'anuṣṭubh' (See P. 10)

1. कृतघ्नः—कृतं हन्ति कृत+हन+टक् (कर्तरि)
2. गृहीत-नामानः- गृहीतं नाम येषां ते तथोक्ताः ।

Śloka **49**. — **Metre:** Praharṣiṇīyam (See P. 40).

3. आतङ्क-स्फुरित-कठोर-गर्भ-गुर्वी—आतङ्केन स्फुरितः कठोरः गर्भः तेन गुर्वी या सा ताम् ।
4. क्रव्याद्भ्यः- क्रव्यं (आम-मांसं) अदन्ति ये ते तेभ्यः ।
5. *bali*, offering which consists in throwing in different directions the remains of the meals.

Oh yes, surely, these are magnonimous people, whose names I have pronounced. I, who is ungrateful and mean, as if they were contaminated by a sinful contact of the crime. (48)

I who............

Confident, on my bosom she has fallen asleep, me, abandoning my beloved spouse, the splendour of my house,—when, burdened with developed fœtus, throbbing through throes (of pregnancy);—unmerciful, I throw her like an offering to carnivorous animals. (49)

(*Placing the feet of* Sītā *on her head*)

Queen, queen! here is the head of Rāma touching for the last time your lotus-feet. (*He cries*)

(*Behind the screen*) sacrilege, sacrilege!

Rāma—ho! Find out what it is. (*Behind the screen, again*)

A body of saintly ascetics of severe penance, who live at the banks of Yamunā, harrassed by Lāvaṇaka, *have come to you, the protector.* (50)

Rāma — To-day, again the dread of the demons! I am just sending Śatrughna to exterminate this vile son of Kumbhīnasī. (*He advances a few steps and returns*). Ah, Queen, what will become of you in this condition? Venerable Earth, do keep watch over your glorious girl, Jānakī.

---

6. निर्घृणः—निर्गता घृणा यस्मात् स तथोक्तः ।

7. *abrahmaṇyam*. (Lit. that which is not good to the Brāhmaṇa) "a heinous act." Here it is used as an exclamation in the sense of '*help help*.'

8. *nepathya*—the dressing room of the actors.

Śloka 50. Metre: 'anuṣṭubh' (See P. 10)

9. उग्र-तपसाम्—उग्रं तपः येषां ते तेषाम् ।

10. यमुना-तीर-वासिनाम्—यमुनायाः तीरे वसन्ति ये ते तेषाम् ।

11. कुम्भीनसी—कुम्भी इव नासिका अस्याः इति कुम्भीनस्+अच्+ङीष् । A woman having nose like a small pitcher.

जनकानां रघूणां च यत् कृत्स्नं गोत्र-मङ्गलम् ।
यां देव-यजने पुण्ये पुण्य-शीलाम् अजीजनः[1] ॥ ५१ ॥
(इति रुदन् निष्क्रान्तः)

सीता—हा सोम्म, अज्जउत्त, कहिं सि ? (सहसोत्थाय)—हद्धी, हद्धी, दुस्सिविणेण विप्पलद्धा अहं अज्जउत्तं अक्कन्दामि। (विलोक्य) हद्धी, हद्धी, एआइणीं मां पसुत्तं उज्झिअ गदो अज्ज-उत्तो। किं दाणीं एदं ? होदु, से कुप्पिस्सं जइ तं पेक्खन्ती अत्तणो पहविस्सं। को एत्थ परिअणो ?

[हा सौम्य, आर्यपुत्र, कुत्रासि ? (सहसोत्थाय)— हा धिक् हा धिक् दुःस्वप्ने विप्रलब्धाहम् आर्यपुत्रम् आक्रन्दामि (विलोक्य) एकाकिनीं मां प्रसुप्तां उज्झित्वा गत आर्यपुत्रः। किम् इदानीम् एतत् ? भवतु, तस्मै कोपिष्यामि, यदि तं प्रेक्षमाणात्मना प्रभविष्यामि को ऽत्र परिजनः]

(प्रविश्य) दुर्मुखः—देवि, कुमार-लक्खणो विण्णावेदि "सज्जो रहो आरुहदु देइ" त्ति।

[देवि, कुमार-लक्ष्मणो विज्ञापयति "सज्जो रथ आरोहतु देवी" ति

सीता—इअं आरुहामि। (उत्थाय परिक्रम्य) परिप्फुरदि विअ मे गब्भ-भारो। ता सिहिलं गच्छह्म।

[इयम् आरोहामि। परिस्फुरतीव मे गर्भ-भारः तच् छिथिलं गच्छावः]

दुर्मुखः—इदो इदो देइ [इत इतो देवी]

सीता—णमो तपोधणाणं, णमो रहु-उल-देअदाणं, णमो अज्ज-उत्त-चरण-कमलानं णमो सअल-गुरुआणं। (इति निष्क्रान्तः सर्वे)

[नमस् तपोधनेभ्यो नमो रघु-कुल-देवताभ्यो नम आर्य-पुत्र-चरण-कमलेभ्यो नमः सकल-गुरुजनेभ्यः]

इति महाकवि-श्री-भवभूति-विरचित-उत्तर-रामचरिते
चित्र-दर्शनं नाम प्रथमो ऽङ्कः।

Śloka 51. 1. Ajījanah – This archaic form constitutes

She, the consummate benediction of the families of Janaka and Raghu, whom you begot entirely pure from the pure sacrificial place of the gods. (*51*)

(*He goes away crying*)

Sītā—Ah, my sweet lord, where are you? (*Rises precipitately*). What a shame, deluded by a bad dream, I am shouting for my lord! (*Looking around*). Alas, alas! leaving me alone asleep, my lord has gone away. What could this be? never mind, I will be angry with him—if, on seeing him, I would beable to control myself.

Durmukha (*Enter*)—Queen, the prince Lakṣmaṇa informs you: "The chariot is ready. Let queen get in."

Sītā—Here, I get in, (*She rises up and walks around*) the burden of my foetus seems to throb. I will walk slowly.

Durmukha—This way, this way, queen.

Sītā—Adoration to those who have austerity as their wealth, adoration to the divinities of the house of Raghu, adoration to the lotus-feet of my lord, adoration to all our elders. (*Everybody goes out*).

Here ends the Last Adventure of Rāma, work of the great poet Bhavabhūti, the First Act Called "The Inspection of the Pictures."

---

a solemn point at the end of such a simple verse. According to a commentator this stanza forms the *bindu* 'renewal,' of one of the 5 elements of the action which leads it back to the principal subject. (Daśar. 1. 16, cf. Théatre Indien 34–35).

द्वितीयो ऽङ्कः

(नेपथ्ये[1])—स्वागतं[2] तपोधनायाः[3] !

(ततः प्रविशत्य् अध्वग-वेषा तापसी)

तापसी—अये, वनदेवतेयं फल-कुसुम-पल्लवार्घ्येण[4] माम् उपतिष्ठति ।

(प्रविश्य) वनदेवता—(अर्घ्यं विकीर्य[5])

यथेच्छं भोग्यं वो वनम् इदम् अयं मे सुदिवसः
सतां सद्भिः सङ्गः कथम् अपि हि पुण्येन भवति ।
तरुच्छाया तोयं यद् अपि तपसो योग्यम् अशनं
फलं वा मूलं वा तद् अपि न पराधीनम् इह वः ॥१॥

तापसी—किम् अत्रोच्यते ?

Act II – *Time and Situation* — 12 years after the events of the Act I. Scene: Janasthāna.

1. The speeches of the characters placed behind the curtain, which announce the entry of another character, are in the skt. theatrical term called 'cūlikā' (cf. Bharata, Kāvyamālā, XIX, 107 Daśar. 1,55. which cites our text.)

अन्तर्जवनिका संस्थैः सूचनार्थस्य चूलिका । (साहित्य०) ।

2. स्वागतम्—सुष्ठु आगतं स्वागतम् ।

'Welcome, hail.' This word optionally governs genitive or dative.

3 तपोधनायाः—तपः एव धनं यस्याः सा तस्याः ।

(Lit. 'rich in austerities') here: 'female ascetic.'

Second Act

(*Behind the curtain*) – Welcome to the holy lady !
(*Then enter a Lady Ascetic dressed as a traveller.*)

Lady Ascetic—Oh, here comes the goddess of the forest. She is approaching me with a present of fruits, flowers and herbs.

(*Enter*) **Goddess**—(*scattering presents*)—
You may enjoy yourself in this forest to your heart's content! Happy is this day for me, for, the meeting between two good people is scarce, and is only possible through merit. The shade of the trees, the water and whatever food is suitable for the ascetics, fruits or herbs,—for none of these you are to depend upon others. (*1*)

Lady Ascetic — What shall I say about it?

---

4. **फल-कुसुम-पल्लवार्घ्येण**—(१) फलानि च कुसुमानि च पल्लवानि इति फल-कुसुमपल्लवानि (द्वन्द्वः) तानि एव अर्घ्याणि (उपहाराणि) तेन (कर्म०) । (२) फलानि च कुसुमानि च पल्लवानि च अर्घ्यं (पाद्यं) च इति तेन ।

In the first samāsa *arghya* would mean: 'offerings of hospitality,' while in the second it would mean 'water' alone for rinsing, washing and sipping (ācamana' and 'pādodaka') purposes.

5. Vikīrya—Indeclinable past participle from √vi + kṛ.

6. **यथेच्छम्**—इच्छाम् अनतिक्रम्य इति यथेच्छम् (अव्ययी०)

Śloka 1—2 **Metre**: Śikhariṇī (for definition See P. 38.)

प्रिय-प्राया वृत्तिर् विनय-मधुरो वाचि नियमः
प्रकृत्या कल्याणी मतिर् अनवगीतः परिचयः ।
पुरो वा पश्चात् वा तद् इदम् अविपर्यासित-रसं[1]
रहस्यं साधूनाम् अनुपधि विशुद्धं विजयते[2] ॥२॥

(उपविशतः)

वनदेवता—कां पुनर् अत्र-भवतीम् अवगच्छामि ?

तापसी—आत्रेय्य् अस्मि ।

वनदेवता—आर्ये आत्रेयि, कुतः पुनर् इहागम्यते ? किंप्रयोजनो वा दण्डकारण्य-प्रवेशः ?

आत्रेयी—अस्मिन्न् अगस्त्य-प्रमुखाःप्रदेशे[3] ।

भूयांस[4] उद्गीथ-विदो[5] वसन्ति ।
तेभ्यो ऽधिगन्तुं निगमान्त-विद्यां[6]
वाल्मीकि-पार्श्वाद् इह पर्यटामि ॥३॥

---

1. अविपर्यासित-रसम्—विपर्यासं गमितः इति विपर्यास + णिच् + क्तः (कर्मणि०) = विपर्यासितः । न विपर्यासितः इति अविपर्यासितः (नञ् समासः) तादृशः रसः (रागः) यस्मिन् तत् तथोक्तम् ।

2. *Vijayate*—Ordinarily √*ji* is *parasmaipada*. But when followed by prefix 'vi' or 'parā,' it becomes *ātmanepada* "विपराभ्यां जे" (पा० 1. 3. 19.)

Śloka 3.—**Metre:** Indravajrā (for definition See P.17.)

3. **अगस्त्य-प्रमुखाः—(समासः)** अगस्त्यः प्रमुखं एषाम् । 'of whom **Agastya** is the foremost' **Agastya** was the son of Mitra and Varuṇa. He was born with Vasiṣṭha from a pitcher. His hermitage was in the South of India.

4. **भूयांसः**—अतिशयेन बहव इति भूयस् (बहु + ईयस्) "बहोर् लोपो भू च बहोः" भू + यस् । comparative degree of *bahu*.

Their conduct is full of affection; in their discourse there is a restraint which modesty renders amiable; their disposition is benevolent by nature, their company unreproachable—sooner or later, unalterable in its essence, the mysterious charm of the virtuous people, pure and trickless, ever triumphs. (2)

The Goddess—Whom, in your honoured self, I have the honour to know ?

Lady Ascetic—I am Ātreyī.

The Goddess—Where do you come from to this place ? What is the object of your visit to the Daṇḍaka-forest ?

Ātreyī—*In this country live Agastya and many other sages well-versed in the Udgītha chants;—it is to acquire knowledge in the mystical science that I have come to this place of Vālmīki.* (3)

---

5. **उद्गीथ-विदः**— (समासः) उच्चैर्गीयत इति उद्गीथः सामवेदः) तं विदन्ति जानन्ति इति उद्गीथ-विद् + क्विप्। Udgītha means '**om**' which is also called 'praṇava.'

ओम् इत्येतदक्षरम् उद्गीथम् उपासीत् (छान्दोग्य०) ।

6. **निगमान्त-विद्याम्** –(समासः) नितरां गम्यते परतत्वम् अनेन इति निगमः (नि + गम् + अप्) अस्य अन्तः निगमान्तः । विद्यते (ज्ञायते) इति विद्या (विद् + क्यप्) निगमान्तस्य विद्या सा ताम् ।

'The knowledge of Upaniṣads or Vedānta.' 'Nigama' means Veda, 'nigamānta' means Vedānta. The Veda is comprised of two portions : 'Mantra' and 'Brāhmaṇa.' The last part of the Brāhmaṇa is Āraṇyaka which contains the principal Upaniṣads dictating the knowledge of *Brahman*. So the knowledge contained in the Upaniṣads was called Vedānta.

वनदेवता—यदा तावद् अन्ये ऽपि मुनयस् तम् एव हि पुराण-ब्रह्म-वादिनं[1] प्राचेतसम्[2] ऋषिं ब्रह्म-पारायणायो[3]पासते, तत् को ऽयम् आर्यायाः दीर्घ-प्रवास-प्रयासः ।

आत्रेयी—तत्र महान् अध्ययन-प्रत्यूह इत्य एष दीर्घप्रवासो ऽङ्गीकृतः ।

वनदेवता—कीदृशः ।

आत्रेयी—तस्य भगवतः केनापि देवता-विशेषेण सर्व-प्रकाराद्भुतं स्तन्य-त्याग-मात्रके[4] वयसि वर्तमानं दारक-द्वयम् उपनीतम् । तत् खलु न केवलं ऋषीणाम् अपितु चराचराणां भूतानाम् अन्तराणि तत्वान्य् उपस्नेहयति[5] ।

वनदेवता—अपि तयोर् नाम-सविज्ञानम् अस्ति ?

आत्रेयी—तयैव किल देवतया तयोः कुश-लवाव् इति नामनी च प्रभावश् चाख्यातः ।

वनदेवता—कीदृशः प्रभावः ।

आत्रेयी—तयोः किल स-रहस्यानि जृम्भकास्त्राण्य्[6] आ-जन्म-सिद्धानीति ।

वनदेवता—अहो नु भोश् चित्रम् एतत् !

आत्रेयी—तौ च भगवता वाल्मीकिना धात्री-कर्म वस्तुतः परिगृह्य पोषितौ परिरक्षितौ च । निर्वृत्त-चौल-कर्मणोश्[7] च तयोस्

---

1. **पुराण-ब्रह्म-वादिनम्**—(समासः) पुराणश् चासौ ब्रह्मवादी च तम् । ब्रह्म वदतीति ब्रह्मवादिन् ।

2. **प्राचेतसम्**—(समासः) प्रचेतसः (वरुणस्य) अपत्यं पुमान् प्राचेतसः तम् (वाल्मीकिम्)

3. **ब्रह्म-पारायणाय**—(समासः) पारस्य अयनं (गमनं) इति पारायणम् । ब्रह्मणः-पारायणं तस्मै । "तादर्थ्ये चतुर्थी" ।

4. **स्तन्य-त्याग-मात्रके**—स्तन्यस्य त्यागः स एव मात्रा यस्मिन् तस्मिन् (बहुव्रीहिः)

The Goddess – When other sages too, in order to know the secret of the Brahman, become the disciples of that sage, son of Pracetas, the interpreter of the ancient Vedas, then why the venerable lady has taken the trouble of such a long journey ?

Ātreyī—A great obstacle has suddenly befallen there in our studies, therefore, I have undertaken a long journey.

The Goddess – What obstacle ?

Ātreyī – I don't know, some Divinity has entrusted the revered sage a couple of boys, marvellous in every respect, of an age, when they have just left their breast-milk. This couple, in reality, not only inspires love into the hearts of the sages, but also among the movable and immovable creatures.

The Goddess – Do you know their names ?

Ātreyī – The same Divinity, it is said, has revealed their names: Kuśa and Lava, and also their power.

The Goddess – What power ?

Ātreyī – The mysterious Jṛmbhaka weapons, it is said, are acquired to them from their very birth.

The Goddess – Well, well, marvellous, indeed.

Ātreyī – The venerable Vālmīki, assuming practically the duties of a foster-mother, reared and brought them up, and when they completed their ceremony of

---

5. **Upasnehayati** – A denominative verb from the noun 'sneha.'

6. Jṛmbhaka weapons (see Notes on P. 21).

7. **निर्वृत्त-चौल-कर्मणोः— (समासः) निर्वृत्तं चौल-कर्म येषां तौ तयोः ।**

Caula—(or cūḍā-karma) is a ceremony of tonsure [shaving the hair and keeping locks (śikhā) on the head] was to be accomplished in the 1st or 3rd year. (cf. Manu II. 35, Mān. Gr. Sū. 1.21.7).

त्रयी-वर्जम्[1] इतरास् तिस्रो विद्याः[2] सावधानेन परिनिष्ठापिताः[3]। तदनन्तरं च गर्भैकादशे[4] वर्षे क्षात्रेण कल्पेनोपनीय गुरुणा त्रयी-विद्याम् अध्यापितौ। न ह्य् एताभ्याम् अति-दीप्त-प्रज्ञा-मेधाभ्याम् अस्मदादेः[5] सहाध्ययन-योगोऽस्ति। यतः—

वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे
न च खलु तयोर् ज्ञाने शक्तिं करोत्य् अपहन्ति वा।
भवति हि पुनर् भूयान् भेदः फलं प्रति तद् यथा।
प्रभवति शुचिर् बिम्ब-ग्राहे[6] मणिर् न मृदां चयः ॥४॥

वनदेवता—अयम् असाव् अध्ययन-प्रत्यूहः।

आत्रेयी—अन्यश् च।

वनदेवता—अथापरः कः?

आत्रेयी—अथ स ब्रह्मर्षिर् एकदा माध्यंदिन-सवनाय नदीम् तमसाम् अनुप्रपन्नः। तत्र युग्म-चारिणोः क्रौञ्चयोर् एकं व्याधेन विध्यमानं ददर्श। आकस्मिक-प्रत्यवभासां[7] देवीं वाचम् अव्य-

---

1. **trayī-varjam**—Gerundal construction in *am* compounded with the word 'trayī,' meaning (trayīṃ Varjayitvā) '*with the exception of three sciences.*'

The traditional number of the sciences differ between 4, 5 and 14. Some take them as three Vedas: Ṛigveda, Yajurveda and Sāmaveda. Atharvaveda is omitted when the Sacred Sciences *par excellence* are in question. (Winternitz Hist. of Ind. Lit. 1. P. 126). Before the *upanayana* (initiation ceremony) no one was entitled to study Vedas. The other three sciences were Theology, Economics and Politics could be adopted according to Kauṭilya 1. 2. by the Mānava School, which could be taught to the boys. Metaphysics (ānvīkṣikī) Agriculture (vārtā) and Politics or Statecraft (daṇḍanītī) could be another three. Another commentator takes Medicine, Archery and Music.

"आयुर्वेदो धनुर्वेदस् तथा गान्धर्व-नामकाः।

tonsure, he carefully taught them three Sciences excepting the Triple-Veda Thereupon, in their 11th year from conception, having invested them with the Sacred Thread according to the proper rites of Kṣatriya, he taught them the Triple-Veda. Now, with such a pair, endowed with extremely brilliant intellect and strong memory, it is not possible to persecute to our studies in common. For—

The teacher transmits his knowledge to the intelligent as well as to the stupid, but, surely, he does not improve their insight, nor does he suppress it. As regards their results the difference becomes more and more,—just as a pure jewel is capable of arresting a reflection, but not a lump of clay. (4)

The Goddess—Is it that which disturbed your studies ?

Ātreyī — Another too !

The Goddess — What else ?

Ātreyī — One day the Brahmaṇa sage went to the river Tamasā to perform his mid-day oblutions. There, he saw a hunter in the act of killing one of the herons,

---

3. Parinisṭhāpitāḥ — Past pass. participle of a denominative verb 'niṣṭhāpayati' from the noun 'niṣṭhā' or past pass. participle of the causal √pari + ni + ṣṭhā

4. Garbhaikādaśe varṣe — (cf. Yājñ. II. 1; Aśv. Gṛ. Sū. 1, 19, 3.) where it is specifically mentioned that the boy of a Kṣatriya should be invested with the ceremony of Sacred Thread in the 11th year after conception.

5. अस्मदादेः सहाध्ययनम् —अहं आदि यस्य स तस्य । An illustration of co-education in ancient times.

Śloka 4 — **Metre**: Hariṇi (for definition See P. 38)

6. बिम्बग्राहे —(समासः) बिम्बस्य ग्राहः (ग्रह् + घञ्) तस्मिन् ।

7. आकस्मिक-प्रत्ययभासाम्— समासः) अकस्मात् भवः आकस्मिकः (ठक्) आकस्मिकः प्रत्ययभासः यस्याः सा ताम् ।

तिकीर्ण-वर्णाम् आनुष्टुभेन[2] छन्दसा परिणताम् अभ्युदैरयत—

मा निषाद प्रतिष्ठां त्वम् अगमः[4] शाश्वतीः समाः ।
यत् क्रौञ्च-मिथुनाद् एकम् अवधीः काम-मोहितम् ॥५॥

---

2. आनुष्टुभेन छन्दसा—अनुष्टुभस्य इदम् आनुष्टुभम् ।

(for definition of anuṣṭubh metre See P. 10). This is also called the 'Epic Metre' which is different to the Vedic anuṣṭubh in which the general rule of a pāda being of 8 syllables is the same. But at the end with the group I S II also occurs optionally the group S I S I (cf. Stchoupak Index).

A **legend** goes to say that the definite form of the Epic Metre was the creation of Vālmīki who composed Rāmāyaṇa in it.

Śloka 5.—Metre: Anuṣṭubh.

अन्वयः—हे निषाद, त्वं शाश्वतीः समाः (वर्षाणि) प्रतिष्ठां मा अगमः, यत् क्रौञ्च-मिथुनात् एकं काम-मोहितम् अवधीः ।

This curse of the poet for destroying the amorous sports of a pair of herons is quite true uptil now, as even today the hunting tribes (Vadia) have no fixed habitation and roam homeless. (Niṣādas belong to a criminal tribe leading a nomad life. (Ray: Utt. P. 190). This verse occurs in Rāmāyaṇa (Bāl. 2.15) where it is mentioned that the sorrow which the poet Vālmīki felt was transformed into a śloka personified, upon which the idea of composing the whole Rāmāyaṇa came to the mind of the poet. (cf. Ibid 2.18, 40-41)

मा अगमः—भविष्यद् अर्थे लुङ् "माङि लुङ्" । "न माङ् योगे"।

The construction with the above-mentioned rule of Pāṇini is defective. The required form should be 'gamaḥ' as the augment 'a' in case of imperfect and Aorist is omitted with particle 'mā'.

The commentators have racked their brains over it and have offered various suggestions and interpretations.

(1) **Interpretation Vīra-rāghava**—The commentator Vira. breaks 'tvamagamaḥ' as tu + ama + gamaḥ interpretting [[illegible] (अलक्ष्मीकः)] meaning that you shall roam in poverty.

gamboling about in couple. Suddenly there was an advent of the Goddess of Eloquence.

May never you find rest. O hunter, through eternal years, for you have killed one of this love-stricken couple of herons. (5)

---

(2) **Another Interpretation**—Some say 'mā' is not the particle meant by Pāṇini, but it is equivalent to 'na'.

(3) **Interpretation of Tilaka**—The verse is also interpretted by Tilaka in a way in which it applies to the story of Rāma. 'Māniṣāda' is taken as one word and the compound is expounded in this way :

"मा लक्ष्मीर् निषीदति अस्मिन् इति मानिषाद (हे राम) यत् यस्मात् क्रौञ्च-मिथुनात् (मन्दोदरी-रावण-रूपात्) एकं (रावणं) काम-मोहितं अवधीः (हतवान् असि), तस्मात् त्वं शाश्वतीः समाः (अनेकान् संवत्सरान्) अद्वितीयां प्रतिष्ठाम् (अखण्डैश्वर्यानन्दावाप्तिम्) अगमः (प्राप्नुहि)

"May you, O Rāma, the receptacle of Lakṣmī (wealth glory) attain prosperity for years eternal, since you have killed one (Rāvaṇa) of the amorous (heron-like) pair (*i.e.*, Rāvaṇa and Mandodarī)."

Interpretation of Kataka—who applies this verse to Rāvaṇa."नितरां सादयति पीडयति इति रावणः तस्य सम्बुद्धिर् हे निषाद (रावण), यत् (यस्मात्) क्रौञ्चमिथुनात् अल्पीभावार्थकक्रुञ्चेः (राज्य-क्षय-वनवासादि-दुःखाद् अल्पीभूतं) मिथुनं । (सीता-राम-रूपं) तस्माद् एकं (सीतारूपं) यस्माद् अवधीः (वधाभ्यधिकपीडां प्रापितवान् असि) तस्मात् त्वं अ (अतः परं) प्रतिष्ठां मा गमः" ।

"O constant tormentor (Rāvaṇa), you have given a sort of death-blow to one (Sītā) of the pair (Rāma and Sītā), who were already undergoing a degradation (of banishment and loss of kingdom). Therefore, you shall not attain glory."

(5) **Possible Interpretation**—The best defence is to say that it is 'ārṣa' form (archaic and learned) or an epic licentiousness (cf. Renou P. 439 Witney Grammar 579c. ZDMG.4,3, P. 56).

वनदेवता—चित्रम् अम्नायाद् अन्यो नूतनश् च्छन्दसाम् अवतारः ।

आत्रेयी—तेन खलु पुनः समयेन तं भगवतम् आविर्भूत-शब्द-ब्रह्म-प्रकाशम् ऋषिं उपसंगम्य भगवान् भूत-भावनः पद्म-योनिर् अवोचत्-'ऋषे, प्रबुद्धो ऽसि वागात्मनि ब्रह्मणि । तद् ब्रूहि राम-चरितम् । अव्याहत-ज्योतिर् आर्षं ते प्रातिभं चक्षुः । आद्यः कविर् असि"—इत्य् उक्त्वान्तर्हितः । अथ स भगवान् प्राचेतसः प्रथमं मनुष्येषु शब्द-ब्रह्मणस् तादृशं विवर्तम् इतिहासं रामायणं प्रणिनाय ।

वनदेवता—हन्त, तर्हि मण्डितः संसारः ।

आत्रेयी—तस्माद् अवोचं तत्र हि महान अध्ययन-प्रत्यूह इति ।

आम्नाय—आ+म्ना+घञ् वेदः ।

'Chandasām avatārah'—Plural here includes all possible metres of which group, the 'anuṣṭubh' is the personified substance. **अवतार**—अव+तृ+घञ् ।

आविर्भूत-शब्द-ब्रह्म-प्रकाशम्—(समासः) आविर्भूतः शब्द-ब्रह्मणः-प्रकाशः यस्मिन तत् । Śabda-Brahman, "Supreme Being incarnated in the Word." A religious and philosophical term. The eternal *Brahman* can be understood by the words; words are themselves a visible phase of the ever present invisible, *Brahman* (all-pervading). Hence words are called *Śabda-Brahman.* (Kane Utt. n. 57)

भूत-भावनः—(समासः) भूतानि भावयति यः स तथोक्तः ।

पद्मयोनिः—(समासः) पद्म योनिः यस्य स(ब्रह्मा)

आर्षम्—ऋषेः इदं आर्षम् ।

विवर्तम्—विवर्तते भिन्नरूपेण वर्तते इति वि+वृत्+घञ् ।

Vivarta—A Vedānta term "Illusory manifestation of Brahman" (Tr. Vedanta by Grote XXX; cf. III, 47; Mv. V, 57). In Vedanta philosophy, in an illusory

The Goddess – Marvellous! An incarnation of the new metres, different from the traditional one.

Ātreyī – Well, at the same time, approaching the venerable sage, to whom the light of Brahman in the form of the Word had been revealed, the revered Brahmā – the creator of the beings, spoke unto him: "O Sage, you are initiated in the Supreme Truth whose soul is the Word; so, relate the story of Rāma. May your prophetic eye flourish and possess an irresistible light. You are the first poet". With these words he disappeared and then the revered son of Pracetas, for the first time, composed this Epic mutation (changed form) of the Sacred Word among the mortals – the Rāmāyaṇa.

The Goddess – Oh, then the whole world has been embellished!

Ātreyī – Therefore, I said, "There occured a great obstacle in our studies."

---

appearance of serpent on seeing a rope in the dark, the serpent is *vivarta* of the rope which is a 'reality'. Similarly, the world is said to be an illusory appearance of one reality *i.e., Brahman.* According to Kane the author has not used *vivarta* in its technical sense. By using these words, he did show his knowledge o Vedānta. But *vivarta* here simply means modification of the word in the form of Rāmāyaṇa. The author does not suggest that Rāmāyaṇa is an illusory appearance of the Word.

इतिहासम् इति ह (अव्ययः) पारम्पर्योपदेशः स आस्ते अस्मिन् इति इति ह + आस् + घञ् (अधिकरणे) इतिहासः पुरावृत्तम् इत्यमरः। अत्र वर्धमानः "इति ह इति लोक-प्रवादागमयोः"।

'Loka-pravāda' means *tradition*, *hearsay*. So according to this definition 'Itihāsa' is nothing but a traditional knowledge of the stories.

रामायणम् – (समासः) रामस्य अयनं (वर्त्म) अत्र इति।

Kane translates it "composed the history of Rāmāyaṇa the first manifestation of *Śabda-brahman* in that garb in the mortal world.

वनदेवता—युज्यते ।

आत्रेयी—विश्रान्तास्मि, भद्रे । सम्प्रत्य् अगस्त्यस्याश्रम-पदं ब्रूहि ।

वनदेवता—इतः पञ्चवटीम् अनुप्रविश्य गम्यताम् अनेन गोदावरी-तीरेण ।

आत्रेयी—(सास्रम्)—अप्य् एतत् तपोवनम् ? अप्य् एषा पञ्चवटी ? अपि सरिद् इयं गोदावरी ? अप्य् अयं गिरिः प्रस्रवणः ? अपि जन-स्थान-वन-देवता वासन्ती त्वम् ?

वनदेवता—अस्त्य् एतत् सर्वम् ।

आत्रेयी—हा वत्से जानकी......

स एष ते वल्लभ-बन्धु-वर्गः
प्रासङ्गिकीनां विषयः कथानाम् ।
त्वां नाम-शेषाम् अपि दृश्यमानः
प्रत्यक्ष-दृष्टाम् इव नः करोति ॥ ६ ॥

वासन्ती—(सभयं स्वगतम्) कथं नाम-शेषाम् इत्य् आह ? (प्रकाशम्) किम् अत्याहितं सीता-देव्याः ?

आत्रेयी—न केवलं अत्याहितम् सापवादम् अपि । (कर्णे) एवम् एवम् ।

वासन्ती—अहह ! दारुणो दैव-निर्घातः । (इति मूर्च्छति)

आत्रेयी—भद्रे समाश्वसिहि, समाश्वसिहि ।

Śloka 6 – Metre : Upajāti. A mixture of Indravajrā (See P. 17) and Upendravajrā which too like Indravajrā has a pāda of 11 Syllables. The difference is only in the beginning viz.

उपेन्द्रवज्रा ज-त-जा-स् ततो गौ ।
जगण तगण जगण गु० गु०
ISI SSI ISI S S

The Goddess—That is right.

Ātreyī—I have reposed friend. Now tell me the way to the hermitage of Agastya.

The Goddess—After entering Pañcavaṭī from here you may follow the course of Godāvarī.

Ātreyī (*With tears*)—Is this the penance-grove? Is this the Pañcavaṭī? Is this the river Godāvarī? And you—are you the goddess of the forest of Janasthāna, Vāsantī?

The Goddess—Right all it is.

Ātreyī—Ah Jānakī, my child,

Here is the circle of your dear companions of whom you occasionally spoke to us.........You are no more than a name, yet by seeing it (circle), I take you to be present before my eyes. (6)

Vāsantī—(*With fear aside*), How she said: "you are no more than a name." (*Aloud*) Noble lady, what calamity has befallen the queen Sītā?

Ātreyī—Not only calamity but a disgrace also. (*She speaks to her in her ears*) "that what it is".

Vāsantī—Ah, ah, the cruel stroke of destiny. (*She swoons*).

Ātreyī—Friend, compose yourself, compose yourself.

In this Śloka the first pāda is of Indravajrā and the remaining three of Upendravajrā.

प्रासङ्गकीनाम्—प्र + सङ्ग + घञ् = प्रसङ्गः प्रसङ्गे भवा (स्त्री०) प्रासङ्गकी याः ताः तासाम्।

प्रत्यक्षम्—अक्ष्णाः प्रति इति प्रत्यक्षं (प्रति + अक्षि + टच्, (अव्ययी०)

अत्याहितम्—अतिशयेन आहितम् (अति + आ + धा + क्तः) कर्मणि।

निर्घात—निर् + हन + घञ्।

वासन्ती—हा-प्रिय सखि, हा महा-भागे, ईदृशस् ते निर्माण-भाग: ! हा रामभद्र .....अथवा अलं त्वया .....अ यि आत्रेयी, अथ तस्माद् अरण्यात् परित्यज्य निवृत्ते लक्ष्मणे सीता-देव्या: किं वृत्तम् इति काचिद् अस्ति प्रवृत्ति: ?

आत्रेयी—नहि नहि ।

वासन्ती—हा कष्टम् ! अरुन्धती-वसिष्ठाधिष्ठितेषु रघु-कुटुम्बकेषु जीवन्तीषु च प्रवृद्धासु राज्ञीषु कथं इदं जातम् ?

आत्रेयी—ऋष्यशृङ्गाश्रमे गुरुजनस् तदासीत् । सम्प्रति तु परिसमाप्तं तद्-द्वादश-वार्षिकं सत्रम् । ऋष्यशृङ्गेण च संपूज्य विसर्जिता गुरव: । ततो भगवत्य् अरुन्धती "नाहं वधू-विरहिताम् अयोध्यां गमिष्यामी" त्य् आह । तद् एव राम-मातृभिर् अनुमोदितम् । तद्-अनुरोधाद् भगवतो वसिष्ठस्य परिशुद्धा वाचो "वाल्मीकि-वनं गत्वा तत्र वत्स्याम" इति ?

वासन्ती—अथ स राजा किम् आचार: सम्प्रति ?

आत्रेयी—तेन राज्ञ: क्रतुर् अश्व-मेध: प्रक्रान्त: ।

वासन्ती—हा धिक् परिणीतम् अपि ?

आत्रेयी—शान्तं पापम् ! नहि नहि ।

महाभागे—महान् भाग: यस्या: सा तत्सम्बुद्धौ ।

निर्माण-भाग:—निर्माणस्य (सृष्टे: जीवितस्य वा)भाग: ।

अश्वमेध:—अश्व: मेध्यते (हन्यते) अस्मिन् इति (मेध+घञ्)

Aśvamedha Sacrifice was performed in Vedic times by the kings desirous of offspring ; but later on it was performed only by kings for sovereignty in order to become a King of Kings (*Cakravartin*). A horse was let loose to wander at will for a year. It was attended by the guardians and an army. When the horse entered a foreign country the ruler of it

Vāsantī—Ah, friend dear, ah, O you endowed with excellent merits, that such a lot be ordained for you !... Ah, friend Rāma or rather not to speak of you...Honourable Ātreyī, after Lakṣmaṇa abandoned her and left in the forest, what became of the queen Sītā ? Have you any news ?

Ātreyī—None, none.

Vāsantī—Ah, what a misfortune ! When Arundhatī and Vasiṣṭha are the heads of the family of Raghu, when the old queens are alive, how such a thing has happened?

Ātreyī—The elders were in the hermitage of Ṛṣyaśṛṅga. But now his twelve year's sacrifice has terminated. Ṛṣyaśṛṅga has thus dismissed the elders after having paid his due homage to them. Thereupon, the venerable Arundhatī said: "I shall not go to Ayodhyā, where the young bride is found no more. The mother of Rāma approved the same. In compliance with them the venerable Vasiṣṭha concluded with these straight-forward words: "Let us resort to the hermitage of Vālmīki and there we shall live."

Vāsantī—What does the king do now ?

Ātreyī—The king is to begin the Aśvamedha Sacrifice.

Vāsantī—Ah, shame ! Has he married again ?

Ātreyī—Heavens forbid !......Not at all, not at all.

---

has bound to submit or to fight. At the end of a year the horse returned. The guardians obtained submission of the princes. After the return of the horse the Aśvamedha sacrifice was performed amidst geat rejoicings. It was believed that performance of such 100 sacrifices would lead to the attainment of the seat of Indra in heaven. The chief Queen of the King played an important part in this ceremony in which her fertility was greatly needed. Daśaratha celebrated this sacrifice in order to obtain sons. (Rāmā. 1. 12-14 ; of Oldenberg-Hanry, La Religion du Veda ; P. Dumont L'Aśvamedha etc. etc).

वासन्ती—का तर्हि सह-धर्म-चारिणी[1] ?

आत्रेयी—हिरण्मयी[2] सीता-प्रतिकृतिः ।

वासन्ती—हन्त भोः!

वज्राद् अपि कठोराणि मृदूनि कुसुमाद् अपि ।
लोकोत्तराणां[3] चेतांसि को हि विज्ञातुम् अर्हति ॥ ७ ॥

आत्रेयी—विसृष्टश् च वाम-देवा[4]नुमन्त्रितो मेध्यो ऽश्वः, उपकल्पितश् च यथा-शास्त्रं[5] तस्य रक्षितारः । तेषाम् अधिष्ठाता लक्ष्मणात्मजश् चन्द्रकेतुर् अवाप्त-दिव्यास्त्र-संप्रदायश् चतुरङ्ग-साधनान्वितो[6] ऽनुप्रहितः ।

वासन्ती—(स-स्नेह-कौतुकास्रम्)—कुमार-लक्ष्मणस्यापि पुत्रः ! हन्त मातर् जीवामि ।

आत्रेयी—अत्रान्तरे ब्राह्मणेन मृतं पुत्रम् उत्क्षिप्य राजद्वारे सोरस्ताडम्[7] अब्राह्मण्यम् उद्घोषितम् । ततो न राजापचारम् अन्तरेण प्रजास्व् अकाल-मृत्युः संचरतीत्य् आत्म-दोषं निरूपयति करुणामये राम-भद्रे स सहसैवाशरीरिणी वाग् उदचरत् ।

शम्बूको नाम वृषलः पृथिव्यां तप्यते तपः ।
शिरच्छेद्यः स ते राम तं हत्वा जीवयद्विजम् ॥ ८ ॥

---

1. सह-धर्म-चारिणी—सह धर्मं चरति इतिधर्म+चर्+णिनि (स्त्रियाम्)

2. हिरण्मयी—हिरण्यस्य विकारः इति (हिरण्य+मयट्) स्त्रियाम् हिरण्मयी ।

3. लोकोत्तर—अतिशयेन उत् इति (उद्+तरप्) उत्तरः, लोकात् उत्तरः ।

Śloka 7—Compare the idea reproduced in Bhartṛhari, Nītiśataka (66) and Sāṛṅgadharapaddhati (n 216)

संपत्सु महतां चित्तं भवत्युत्पल-कोमलम् ।
आपत्सु च महाशैल-शिला-संघात-कर्कशम् ॥

Vāsantī—Who, then is acting as his wife in the course of the sacrifice ?

Ātreyī—A golden effigy of Sītā.

Vāsantī—Oh !

Harder than the adamant, at the same time tende erer than a flower, the hearts of those who are above th. common people, who can dign to comprehend them ? (7)

Ātreyī—The horse of the sacrifice, consecrated by Vāmadeva has been let loose and the guardians of it have been appointed as dictated by the 'Śastra'. At their command has been appointed the Lakṣmaṇa's son Candraketu, initiated in the traditional Science of Divine Weapons and followed by the four divisions of army.

Vāsantī—(*With tears of tenderness and joy*)—The son of the Prince Lakṣmaṇa himself ! Ah mother, I feel I am living !

Ātreyī—Meanwhile a Brāhmaṇa, lifting up at the royal portal, his dead son, and beating his breast inveighed against a sacrilege. "The premature death does not occur to his subjects, if the king has not diverged from his duty" said this, dear Rāma, and while, moved by compassion, he declared his own fault, there arose suddenly an incorporeal voice :

A Śūdra named Śambūka is practising austerities on earth. By you, O Rāma, his head must be cut. And having killed him, you may restore the Brāhmaṇa to life. (8)

---

4. **Vāmadeva**—Vasiṣṭha was at the hermitage of Vālmīki so Vāmadeva became the official priest

5. **यथाशास्त्रम्**—शास्त्रम् अनतिक्रम्य (अव्ययी०)

6. **चतुरङ्ग-साधनान्वितः** चत्वारि अङ्गानि यस्य तत्, चतुरङ्गं च तत् साधनं तेन अन्वितः ।

7. **सोरस्ताडम्**—उरसः ताडः उरस्-ताडः, उरस्-ताडेन सह यथा स्यात् तथा (अव्ययी०)

Śloka 8—Episode of Śambūka—The episode is mentioned in Rāmāyaṇa (VII, 74,i.f.-76) ; it has been adopted by Kālidāsa (Raghu. XV). A man of Śūdra caste was not allowed to study Vedas or perform austerities. His duty was to serve the twice-born people (dvija).

इत्युपश्रुत्यैवाकृष्ट-कृपाण-पाणिः पुष्पकम्[1] आरुह्य सर्वा दिशो विदिशश् च शूद्र-तापसान्वेषणाय जगत्पतिः संचरितुम् आरब्धवान्।

वासन्ती--शम्बूको नाम धूमपः[2] शूद्रो ऽस्मिन्नेव जनस्थाने तपश् चरति। तद् अपि नाम रामभद्रः पुनर् अपीदं वनम् अलं-कुर्यात्।

आत्रेयी—भद्रे गम्यते ऽधुना।

वासन्ती—आर्ये आत्रेयि, एवम् अस्तु। कठोरी-भूतम् तु दिवसः

कण्डूल-द्विप-गण्ड-पिण्ड-कषणोत्कम्पेन[3] सम्पातिभिर्।
घर्म-स्रंसित-बन्धनैः[4] स्वकुसुमैर् अर्चन्ति गोदावरीम्।
छायापस्किरमाण-विष्किर-मुख-व्याकृष्ट-कीट-त्वचः[5]
कूजत्-क्लान्त-कपोत-कुक्कुट-कुलाः[6] कूले कुलाय-द्रुमाः[7] ॥९॥

(इति परिक्रम्य निष्क्रान्ते)

इति शुद्ध-विष्कम्भकः[8]

---

1. **Puṣpaka**—An ærial car of Kubera which Rāvaṇa had seized from him, was used by Rāma. After the death of Rāvaṇa, Rāma dismissed this car to go back to Kubera and to return to him whenever he required it.

2. Inhaling smoke was a type of penance. For taking smoke he must have hung head downwards (Kane n. 63).

Śloka 9. Metre : Śārdūla-Vikrīḍitam (for definition See P. 54). Utprekṣā Figure.

Style of Bhavabhūti is such that he composes simple ślokas in his dialogues. But his descriptions flow with a series of images in difficult compounds with their play of alliteration (anuprāsa).

3. कण्डूल- इत्यादि—(समासः) कण्डूलानां द्विपानां ये गण्ड-पिण्डाः तेषां यत् कषणां तेन जातः यः उत्कम्पः यः स तेन।

4. घर्म इत्यादि—(समासः)—घर्मेण स्रंसितं बन्धनं येषां ते तैः।

5. छाया-इत्यादि—(समासः)– छायासु अपस्किरमाणाः विष्किराः (शकुनयः) तेषां मुखैः व्याकृष्टाः कीटाः याभ्यः तादृश्यः त्वचः येषां ते तथोक्ताः।

'Apaskiramāṇa'—Present Participle from √apa + kṛ (6th conjugation) with 'apa', 'kṛ' is *Ātmanepada* but it the sense of 'joy', 'maintaining oneself', or 'making nesn'

As soon as he heard this, the Master of the Universe with an unsheathed sword in his hand, mounting on his aerial car Puṣpaka began to survey all the cardinal and intermediary regions in search of the Śūdra-Ascetic.

Vāsantī – The Śūdra named Śambūka, drinker of smoke, practises penance in the Janasthāna. May be that dear Rāma consecrates once more this forest with his presence.

Ātreyī—I must go now.

Vāsantī – As you please, venerable Ātreyī.

The trees, shaken by the rubbing of the temples of the elephants, and scattering flowers which, on account of the heat, are detached from the twigs—are paying homage to Godāvarī.—In the shade the beaks of the scraping birds extripate insects from their barks;—the cooing flocks of languishing pigeons and wild cocks are thronged at the bank of the river and the trees are full of nests. (9) (Exeunt)

END OF THE INTERLUDE.

---

it becomes *ātmanepada*. "किरतेर् हर्ष-कुलाय-करणेष्विति वाच्यम्" वार्तिकम् The augment *s*(suṭ) also comes after '*apa*' सुड् अपि हर्षादिषु वक्तव्य:" अप + स + कृ + शानच् ।

6. कूजत् इत्यादि (समास:) कूजन्ति क्लान्तानि कपोतानां कुक्कुटानां च कुलानि येषु ते तथोक्ता: ।

7. कुलाय-द्रुम:—कुलाय युक्ता: द्रुमा:(मध्य-पद-लोपी समास:)

8. Viṣkambhaka – Interlude between act of a drama carried by one or more characters, middling or inferior, who connect the story of the plot by briefly explaining to the audience what has occurred in the intervals of the acts or what is likely to happen later on. Sāhityadarpaṇa defines it thus:

वृत्तिर् वर्तिष्यमाणानां कथांशानां निदर्शक: ।
संक्षिप्तार्थस्तु विष्कम्भ आदाव् अङ्कस्य दर्शित: ॥
मध्येन मध्यमाभ्यां वा पात्राभ्यां संप्रयोजित: ।
शुद्ध: स्यात्स संकीर्णो नीच-मध्यम-कल्पित: ॥

Here it is the Suddha form as Ātreyī and Vāsantī are middling characters and speak sanskrit.

[ततः प्रविशति सद्योद्यत-खड्गः[1] रामः।]

रामः—

रे हस्त दक्षिण मृतस्य शिशोर् द्विजस्य
जीवातवे[2] विसृज शूद्र-मुनौ कृपाणम्।
रामस्य गात्रम् असि दुर्वह-गर्भ-खिन्न-[3]
सीता-विवासन-पटोः करुणा कुतस् ते ॥१०॥

कथं चित् प्रहृत्य)—कृतं राम-सदृशं कर्म। अपि जीवेत् स ब्राह्मण-पुत्रः ?

(प्रविश्य) दिव्य-पुरुषः[4]—जयतु जयतु देवः।

दत्ताभये[5] त्वयि यमाद् अपि दण्ड-धारे[6]
संजीवितः शिशुर् असौ मम चेयम् ऋद्धिः।
शम्बूक एष शिरसा चरणौ नतस्[7] ते
सत्सङ्गजानि[8] निधनान्य्[9] अपि तारयन्ति ॥११॥

रामः—द्वयम् अपि प्रियं नः। तद् अनुभूताम् उग्रस्य तपसः फलम्।

सद्योद्यत-खड्गः—सद्यः उद्यतः खड्गः यस्य सः।

Śloka 10.—**Metre:** Vasanta-tilakā, (See P. 11). This verse has been cited by Sarasvatī. (V, 142) as an example of *jugupsā* 'sentiment of aversion.' The repugnance of Rāma to accomplish his kingly duty is a beautiful discovery of Bhavabhūti.

2. 'Jīvātave'—A vedic form rarely found in classical sanskrit (Renou. Gramm. 108 c). √jīv + ātu = jīvātu: Infinitive dative.

"जीवतुर् जीवनौषधम्"। जीवनायौषधं जीवन-रक्षणोपायः।

3. दुर्वह-गर्भ-इत्यादि (समासः) दुर्वहेन गर्भेन खिन्ना या सीता तस्याः विवासने पटुः यः स तस्य।

4. 'Divya-puruṣa'—*Divine Being.* The Śūdra-Ascetic being killed by the celestial hands of Rāma became a superhuman Divine Being.

(*Enter Rāma raising his sword with compassion*)

Rāma.—

Hallo, my right hand, in order that the son of Brāhmaṇa *may return to life, hurl the sword on the Śūdra-Ascetic ; you are the limb of Rāma—the cruel one who banished Sītā, weighed down by the burden of her womb.........Whence know you pity ?* (10)

(*Striking reluctantly*) Here accomplished an act worthy of Rāma ! Would the son of Brāhmaṇa come to life again ?

(*Enter*) **Divine Being**—Victory, victory to the king !

You give security against Death itself, O Justiciary.—Here the boy is restored to life and I too have attained the glory.........Here is Śambūka *prostrated at your feet. Arising out the contact of the virtuous, even the destruction is a salvation.* (11)

Rāma—Both of these things please us equally. Therefore, may you taste the fruit of your severe penance.

Śloka 11.—Metre: Vasanta-tilakā (See P. 11).

5. दत्ताभये—दत्तं अभयं येन स तस्मिन् ।

6. दण्डधारे । दण्डं धारयति यः स तस्मिन् (दण्ड + धारि + अण्) ।

The Daṇḍa (chastisement) is the most powerful arm of the king (Manu, VII, 14—28). This compound is also an epithet of *Yama*—the Death-god the Supreme Justiciary. Some take it to be qualifying *Yama* meaning 'who is the chastiser of the offenders'. The choice of the term 'daṇḍa-dhāra' by Bhavabhūti suggests a subtle play with the words.

7. *Nata*—√*nam* + *kta*. *Nam* and its derivatives generally govern the dative and sometimes the accusative of the person saluted, as it is here.

8. सत्सङ्गजानि—सतां सङ्गाद् जातानि यानि तानि ।

9. निधनानि—नि+धा+क्यु (भावे) ।

यत्रानन्दाश् च मोदाश् च यत्र पुण्याश् च संपदः[1] ।
वैराजा[2] नाम ते लोकास् तैजसाः सन्तु ते शिवाः ॥ १२ ॥

शम्बूकः—युस्मत्-प्रसादाद् एवैष महिमा[3] । किम् अत्र तपसः—? अथवा महद् उपकृतं तपसा—

अन्वेष्टव्यो[4] यद् असि भुवने भूतनाथः[5] शरण्यो
माम् अन्विष्यन्न् इह वृषलकं योजनानां शतानि ।
क्रान्त्वा प्राप्तः स इह तपसां संप्रसादो ऽन्यथा तु
क्वायोध्यायाः पुनर् उपगमो दण्डकायां वने वः ॥ १३ ॥

रामः—किं नाम दण्डकेयम् ? (सर्वतो ऽवलोक्य) हा कथम् !

स्निग्ध-श्यामाः[6] क्व चिद् अपरतो भीषणाभोग-रूक्षाः[7]
स्थाने स्थाने मुखर-ककुभो झांकृतैर् निर्झराणाम् ।
एते तीर्थाश्रम-गिरि-सरिद्-गर्त-कान्तार-मिश्राः[8]
संदृश्यन्ते परिचित-भुवो दण्डकारण्य-भागाः ॥ १४ ॥

Śloka 12.—(Compare Ṛg-Veda IX, 113, 11.)

यत्रानन्दाश्च मोदाश्च मुदा प्रमुद आसते ।

1. Puṇyāḥ sampadaḥ '*World where reigns the sovereign splendour.*' This refers to 'holy affluences' such as 8 siddhis : aṇimā, mahimā' etc.

2. वैराजाः—विशेषेण राजते (वि+राज्+क्विप्)=तस्य इमे (विराज+अण्) वैराजाः । (Virāja) means : the imperishable world of *Brahman*. (Cf. Śāśvatam padam *infra* 21/22. Harivaṃśa : *Jagam...vairajam Brahma-sadanam*). There are 14 worlds in all, 7 higher and 7 lower. Vairajāh........ lokāḥ refers to higher worlds viz. (१) भूः (२) भुवः (३) स्वः (४) महः (५) जनः (६) तपः (७) सत्यम् ।

Where there are bliss and joy, where there are pious riches;—may those bright blissful worlds, called Virājas, be propitious to you. (*12*)

Śambūka—All this glory is due to you. What does that penance matter to me ? Or rather not......It has done a great service to me.

You, who is to be sought in this world,—protector and refuge to the beings, have come here in search of me—me who is miserable and pariah (*untouchable*) *after travelling hundreds of Yojanas !......It is there the integral compensation of my austerities, without which why would you come from Ayodhyā to the* Dandka *forest ?* (*13*)

Rāma—What, is it here, the Daṇḍaka ? (*Looking all round*). Ah how.........

Here mellow and dusky, elsewhere rugged on account of their frightful windings,—here and there are the noisy quarters resounded by the roarings of the water-falls—, so mixed with the holy pilgrimages, hermitages, mountains, streams and rivers appear to me these divisions of the Daṇḍaka *forest, with their familiar sites.* (*14*)

Those who reach the *Satya-loka* become *mukta i. e.,* attain salvation.

3. **महिमा**—महतो भावः (महत् + इमनिच्) महिमा।

Śloka 13-14.—Metre: Śārdūla-vikrīḍitam. (See P.54)

4. **अन्वेष्टव्यः**—अनु + इष् + तव्य (कर्मणि) ।

5. Bhūta-nātha—Rāma is identified here as the Supreme Being. Kane calls it anachronism, where the poet is transferring his own feelings to personages who were contemporary of Rāma. Bhavabhūti's Rāma had no idea that he was an incarnation of Viṣṇu. Another interpreter takes 'bhūtanātha' merely as '*the king*'.

6. **स्निग्ध-श्यामाः**—स्निग्धाश्च ते श्यामाश्च (कर्म०) ।

7. **भीषणाभोग-रूक्षाः**—भीषणः आभोगः तेन रूक्षाः ये ते ।

8. **तीर्थाश्रम-इत्यादि** तीर्थानि आश्रमाः गिरयः सरितः गर्ताः कान्ताराणि च तैः मिश्राः ये ते तथोक्ताः।

शम्बूकः—दण्डकैवैषा यत्र किल पूर्वं निवसता देवेन—

चतुर्दश सहस्राणि रक्षसां भीम-कर्मणाम् ।

त्रयश् च दूषण-खर-त्रिमूर्धानो[1] रणे हताः ।। १५ ।।

येन सिद्धक्षेत्रे ऽस्मिन् जनस्थाने मादृशाम् अपि जानपदानाम् अकुतोभयः[5] संचारो जातः ।

रामः—न केवलं दण्डकैव जनस्थानम् अपि !

शम्बूकः—बाढम् । एतानि खलु सर्व-भूत-रोम-हर्षणान्य्[3] उन्मत्त-चण्ड-श्वापद-कुल-संकुल-गिरि-गह्वराणि[4] जनस्थान-पर्यन्त-दीर्घारण्यानि दक्षिणां दिशम् अभिवर्तन्ते । तथाहि-

निष्कूज-स्तिमिताः क्वचित् क्वचिद् अपि प्रोच्चण्ड-सत्व-स्वनाः

स्वेच्छा-सुप्त-गभीर-घोर-भुजग-श्वास-प्रदीप्ताग्नयः[5] ।

सीमानः प्रदरोदरेषु विलसत्-स्वल्पाम्भसो यास्व् अयं

तृष्यद्भिः प्रतिसूर्यकैर् अजगर[6]-स्वेद-द्रवः पीयते ।। १६ ।।

Śloka 15.—This verse occurs in Mv. (V. 13).

(Allusion) Khara, Dūṣaṇa and, Trimūrdhan—they were the demons killed by Rāma Śūrpaṇakhā, after her nose was cut by Lakṣmaṇa, instigated her brothers Khara and Dūṣaṇa to avenge her wrong. They fell in a battle with Rāma, along with their 14,000 Rākṣasas.

1. Trimūrdhānaḥ--**Grammatical note:**—The 'Samāsānta' is defective here. According to the rules of Pāṇini (V. 4. 115.) we expect 'trimūdhāḥ'. But Pātañjali in Mahābhāṣya (III P. 140. 1'6) gives this rule facultatively (vibhāṣā):so 'trimūrdhan' would be the alternative form. (cf. Wecker. 11. 1. P. 116)

2. अकुतोभयः—(समासः) नास्ति कुतो भयः यस्य । This is

Śambūka - In reality, it is Daṇḍaka. It is here, they say that Your Majesty lived formerly—

Fourteen thousand Rākṣasas *of ferocious deeds, also the other three—Dūṣaṇa, Khara and Trimūrdhan were killed by you) in a battle.* (15)

Thanks to which even citizens like me, henceforth move about fearlessly in this Janasthāna—the territory of the Siddhas (hermits).

Rāma—Not only Daṇḍaka but Janasthāna also......

Śambūka—Oh, yes; here are indeed, causing horripilation to all beings, with their caverns infested with troops of ferocious and furious animals, the extensive forests which form their frontiers at Janasthāna, extending themselves towards the south. As for instance—

At some places, the dead silence is reigning, unbroken even by the cooing of the birds, at another place the howling of the ferocious animals is prevailing;—The fires are lit by the deep breath of the serpents dozing at their ease;—and there are regions where the shallow waters glisten at the bottom of the holes, where the thirsty lizards drink the liquified sweat of the python. (16)

---

a compound of मयूर-व्यंसकादि class (Cf. Pāṇini II, 1,72).

3. सर्व-भूत-इत्यादि--सर्वेषां भूतानां रोमानि हर्षयन्ति यानि तानि

4. उन्मतचण्ड-(समासः) उन्मत्तैः चण्डैश्च श्वापद-कुलैः संकुलानि गिरि-गह्वराणि येषां तानि तानि ।

Sloka **16.**—**Metre:** Śārdūla-vikrīḍitam. (See P. 54)

5. स्वेच्छा-इत्यादि—स्वेच्छया सुप्ताः गभीर-भोगाः (गभीराः भोगाः येषां ते) च ते भुजगाः तेषां श्वासैः प्रदीप्ताः अग्नयः यासु ते तथोक्ताः ।

6. अजगरः—अजं गिरति (भक्षयति) इति अजगरः ।

रामः—पश्यामि च जनस्थानं भूत-पूर्व-खरालयम्[1] ।
प्रत्यक्षान् इव वृत्तान्तान् पूर्वान् अनुभवामि च ॥१७॥

(सर्वतो ऽवलोक्य)—प्रियारामा[2] हि सर्वथा वैदेह्य् आसीत् एतानि तानि नाम कान्ताराणि । किम् अतः परं भयानकं स्यात् ? (सास्रम्)

त्वया सह निवत्स्यामि वनेषु मधु-गन्धिषु[3] ।
इतीहारमते[4] चासौ स्नेहस् तस्याः स तादृशः ॥ १८ ॥
न किम् चिद् अपि कुर्वाणः सौख्यैर्[5] दुःखान्य् अपोहति[6]
तत् तस्य किम् अपि द्रव्यं यो हि यस्य प्रियो जनः ॥ १९ ॥

शम्बूकः—तद् अलम् एभिर् दुरासदैः[7] । अथैतानि मद-कल-मयूर-कण्ठ-कोमल-च्छविभिर्[8] अवकीर्णानि पर्यन्तैर् अविरल-निविष्ट-नील-बहल-च्छाया-तरुण-तरु-षण्ड-मण्डितान्य्[9] असंभ्रान्त-विविध-मृग-यूथानि पश्यतु महानुभावः प्रशान्त-गम्भीराणि मध्या-रण्यानि ।

इह समद-शुकुन्ताक्रान्त-वानीर-मुक्त-
प्रसव-सुरभि-शीत-स्वच्छ-तोया[10] वहन्ति ।

---

1. भूत-पूर्व-खरालयम्—पूर्वं भूतः भूत-पूर्वः (सुप्-सुप् समासः) भूत-पूर्वः खरस्य आलयः यः स तम् ।

2. प्रियारामा— प्रियः आरामः (उपवन) यस्याः सा ।

3. मधु-गन्धिषु—मधुनः गन्धः अस्य ास्तीति मधुगन्धिन् तेषु ।

Sloka **17-18-19.** **Metre:** Anuṣṭubh. (See P. 10)

4. '**āramate**'—The construction is against the rules of Pāṇini. √ram preceded by 'vi' 'ā' and 'pari' takes *parasmaipada*. The choice of the reading इति हा रमते चासौ is notd. ba

5. सौख्यम—सुखम् एव इति (सुख+ष्यञ) स्वार्थे ।

6. '**apohati**'--Present of √apa + ūh to remove, to destroy.

7. दुरासदैः—दुःखेन आसाद्यन्ते इति (दुर् + आ + सद् + खल् ।

८. मद-कल-इत्यादि (समासः) मदेन कलः मयूरः तस्य्

Rāma—*I see this Janasthāna, formerly the landmark of Khara, and I feel, again the events of yore, as if they were happening before my eyes.* (17)

(*Looking around*). Yet the Princess of Videha always loved these delightful gardens. These are indeed those woods ....What could be more terrible than that ?.........(*With tears*)

"*With you I shall live in these woods full of sweet fragrance.*" *Thus she used to take delight* (*in these words*); *so great was her love.* (18)

(*A sweet-heart*) *does not do anything, yet thanks to her comforts, she drives away all miseries,—such an indescribable treasure she is for him, who possesses a sweet-heart.* (19)

Śambūka—Leave off, then, these inhospitable places. Your Majesty may rather see:—Strewn with the outskirts having delicate beauty of the throat of peacock singing out of joy,—adorned with the clusters of young trees densely grown and yielding bluish shade,—with their herds of different animals roaming undisturbed—Here are peaceful and profound, these forests of the central region.

Here,—with their crystalline cool waters perfumed with flowers detached from the Vānīra (*reed*) *creepers thronged with birds intoxicated with love,—*

कण्ठः तद्वत् कोमला छविः येषां ते तैः ।

9. अविरल-इत्यादि— (समासः) अविरलं निविष्टाः नीलबहल-च्छायाः तरुणाः च तरवः तेषां यत् षण्डेन मण्डितानि यानि तानि । **Śloka 20—Metre :** Mālinī. (See P. 33). An example of '*turgid or bombastic*' style which some Skt. authors term 'gauḍī rīti', others "pauṣā rīti" (cf. Sāhityadarpaṇa 637).

ओजः प्रकाशकैर् वर्णैं बन्ध आडम्बरः पुनः । समास-बहुला गौड़ी ।

समद-इत्यादि— (समासः) मदेन सह इति समदाः ये शकुन्ताः तै आक्रान्ताः (व्याप्ताः) ये वानीराः तेभ्यः मुक्ताः ये तासां प्रसवाः(पुष्पाणि) तैः सुरभिः शीतं स्वच्छं च तोयं यासां ताः तथोक्ताः ।

फल-भर-परिणाम-श्याम-जम्बू-निकुञ्ज-
स्खलन-मुखर-भूरि-स्रोतसो[1] निर्झरिण्यः ॥ २० ॥

अपि च—

दधति कुहर-भाजाम्[2] अत्र भल्लूक-यूनाम्
अनुरसित-गुरूणि स्त्यानम्[3] अम्बू-कृतानि[4] ।
शिशिर-कटु-कषायः स्त्यायते[3] सल्लकीनाम्
इभ-दलित-विकीर्ण-ग्रन्थि-निष्यन्द-गन्धः[5] ॥ २१ ॥

रामः—(सबाष्प-स्तम्भम्)—भद्र, शिवास् ते पन्थानो, [6] देवयानं प्रतिपद्यस्व पुण्येभ्यो लोकेभ्यः ।

शम्बूकः—यावत् पुराण-ब्रह्म-वादिनम् अगस्त्यम् ऋषिं अभिवाद्य शाश्वतं पदम् अनु-प्रविशामि (इति निष्क्रान्तः)

रामः—एतत् तद् एव हि वनं पुनर् अद्य दृष्टं
यस्मिन्न् अभूम चिरम् एव पुरा वसन्तः ।
आरण्यकाश् च गृहिणाश् च रताः स्व-धर्मे
सांसारिकेषु च सुखेषु वयं रसज्ञाः ॥ २२ ॥

---

1. फलभर-इत्यादि—(समासः) फल-भरस्य यः परिणामः (पक्वता) तेन श्यामः जम्बू-निकुञ्जः तस्मिन् स्खलनेन मुखराणि भूरीणि स्रोतांसि यासां ताः तथोक्ताः ।

Śloka **21**—**Metre** : Mālinī (See P. 33)

2. कुहर-भाजां—कुहरं भजन्ते ये ते तेषाम् ।

3. **Styāyate, Styānam** – From √styai + lyuṭ to increase, to spread out. Ordinary the root is *Parasmaipada*. *Ātmanepada* is irregular.

4. अम्बू-कृतानि—अनम्बू अम्बु कृतानि इति अम्बु+च्वि+कृ+क्तः (कर्माणि) ।

5. इभ-दलित-इत्यादि—(समासः) इभैः दलिताः (भिन्नाः)

6. The passage is ambiguous. Kane translates. "*May the paths—called Devayāna be safe to you, Mayest thou vanish towards the holy world !*" S. Ray Translates : "*May your journey be safe. Take the divine car for the holy regions !*" We have followed the translation of madame Stchoupak.

with their multiplex streams gliding through the Jambū groves which are dark with their ripened wealth of fruits,—roll the torrents of the mountains. (20)

Besides—

Here, the slabberings of young bears dwelling in the caves reverberate, being amplified by the echo;—cool, sharp and poignant odour of the Sallakī plant being distilled from the joints (of their stalks) and crushed and scattered about by the elephants is spreading all round. (21)

Rāma (*Suppressing his tears*) – *Bon Voyage* ! my friend, may you attain the means of conveyance of gods which may lead you to the heavenly regions !

Śambūka—No sooner I have saluted the sage Agastya – the interpreter of the ancient Veda, than I will enter the eternal habitation.

Rāma—*Here is that forest; now I see it again… …It is there that we lived formerly, hermits and householders devoted to our duties as well as experiencing the flavour of the worldly pleasures.* (22)

विकीर्णाश्च ये ग्रन्थयः तेषां निष्यन्दः तस्य गन्धः यः सः ।

6. 'Deva-yāna', *path of the gods*, which is opposed to pitṛ-yāna, *path of the manes* of Chāndogya Up. (V.3,2). *path which leads to the celestial blessedness, or to the imperishable light.* (Cf. H. Nyberg, Cosmogony…, J. A. CC XIX (1931, P. 122–3). To take 'deva-yāna' as *aerial-car* (Puṣpaka) is unlikely. Among two paths of the Upaniṣads viz. 'deva-yāna' and 'pitṛ-yāna', the former leads the wise people through various stages towards *Brahman* from which there is no return; the latter, in requital for sacrifices, words of piety and asceticism, guides to the *Candra-loka*, (lunar region), where a person stays temporarily so long as the fruits of his good *Karmans* exist and then he returns to the earth. (Cf. also Bhagavadgītā VIII,23 – 26.)

Śloka 22 – 23 – Metre : Vasantatilakā (See P. 11.)

एते त एव गिरयो विरुवन्-मयूरास्
तान्य् एव मत्त-हरिणानि वन-स्थलानि ।
आमुञ्ज-वञ्जुल-लतानि[1] च तान्य् अमूनि
नीरन्ध्र[2]-नील-निचुलानि[3] सरित्तटानि ॥ २३ ॥
मेघ-मालेव यश् चायम् आराद्[4] अपि विभाव्यते
गिरिः प्रस्रवणः सोऽयम् यत्र गोदावरी नदी ॥ २४ ॥
अस्यैवास्मिन् महति शिखरे गृध्र-राजस्य वासस्[5]
तस्याधस्ताद् वयम् अपि रतास् तेषु पर्णोटजेषु ।
गोदावर्याः पयसि वितत-श्यामलानोकह-श्रीर्[6]
अन्तः-कूजन्-मुखर-शकुनो[7] यत्र रम्यो वनान्तः ॥ २५ ॥
अत्रैव सा पञ्चवटी यत्र निवासेन[8] विविध-विश्रम्भाति-प्रसंग-साक्षिणः प्रदेशाः प्रियायाः प्रिय-सखी च वासन्ती नाम वन-देवता । किम् इदम् आपतितम् अद्य रामस्य ? संप्रति हि—
चिराद् वेगारम्भी[9] प्रसृत इव तीव्रो विष-रसः
कुतश् चित् संवेगात् प्रचल इव शल्यस्य शकलः ।
व्रणो रूढ-ग्रंथिः स्फुटित इव हृन्मर्मणि पुनर्
घनीभूतः शोको विकलयति मां नूतन इव ॥ २६ ॥
तथापि तान् पूर्व-सुहृदो भूमि-भागान् पश्यामि ।
(निरूप्य) अहो अनवस्थितो भूमि-संनिवेशः ।

---

1. आमञ्जु-वञ्जुल-लतानि—आमञ्जवः वञ्जुल-लताः येषु तानि ।

2. नीरन्ध्राः —निर्गतं रन्ध्रं येभ्यः ते ।

3. Kane translates the passage: "*Nicula trees that are deeply merged into the water.*"

Ray translates: "*Nicula clumps without an opening.*" We have followed Madame Stchoupak.

4. 'ārāt'—is an *Avyaya* (indeclinable Particle) meaning both 'near' or 'far off'.

Śloka—**25**. **Metre** : Mandākrāntā. (See P46.)

5. वासः—उष्यते अस्मिन् इति वस्+घञ् ।

Here are the same mountains where the peacocks used to warble. There are the same wood-lands with their intoxicated deer,—and there are the same banks of the river with the branches of the Bamboos producing harmonious murmur with their heavy canes, dark and blue. (23)

That which, like the garland of clouds spreads out at distance, is the mountain Prasravaṇa. *It is there that the Godāvarī is found.* (24)

It was on its gigantic summit that there was the abode of the King of Vultures (Jaṭāyus). *At its foot we also enjoyed in the leafy huts !—And here, extending on the banks of Godāvarī, the dusky splendour of its dark trees full of chirping and cooing birds, are the exquisite outskirts of the woods.* (25)

Here is that Pañcavaṭī, where, during our long sojourn, these sites bear the testimony of our extreme love, and where lived the friend of my beloved, a deity of the forest, Vāsantī by name. What then has happened to-day to the wretched Rāma ? For now :

Since long active, such a burning poison is spreading (*in me*). *Such a splinter of arrow is thrown off with great force, I know not with what motive. Such cicatrised* (*the mouth of which is healed up*) *wound is burst at the vitals of my heart. Intense, my sorrow is making me faint, as if it were recent.* (26)

Nevertheless I see the same landscapes—my old friends. (*Seeing carefully*) The configuration of the landscape is altered. For example, (*observing*).

---

6. **वितत-श्यामल-इत्यादि (समासः)**—विततः श्यामलानां अनोकहानां (वृक्षाणां श्रीः (शोभा) यस्मिन् स तथोक्तः ।

7. **अन्तः-इत्यादि—(समासः)** अन्तः कूजन्तः अत एव मुखराः यस्मिन् ते तथोक्ताः ।

8. **'Nivāsen'**—*Instrument of duration*. Used rarely in classical Skt. (Renou. Gramm. 219 d.)

Śloka 26—Metre : Śikhariṇī (See P. 38).

9. **वेगारम्भी**—वेगेन आरब्धुं शीलं अस्य इति (वेग+आ+रभ्+णिनि) कर्तरि ।

पुरा यत्र स्रोत: पुलिनम् अधुना तत्र सरितां
विपर्यासं[1] यातो घन-विरल-भाव: क्षितिरुहाम्[2] ।
बहोर् दृष्टं कालाद् अपरम् इव मन्ये वनम् इदम्[2]
निवेश:[3] शैलानां तद् इदम् इति बुद्धिं द्रढ़यति[4]॥ २७ ॥

हन्त पहिरन्तम् अपि मां पञ्चवटी-स्नेहो वनाद् आकर्षतीव ।
(सकरुणम्)

यस्यां ते दिवसास् त्वया सह मया नीता यथा स्वे गृहे
यत्संबन्धि[5]-कथाभिर् एव सततं दीर्घाभिर् आस्थीयत[6] ॥
एक: संप्रति नाशित-प्रियतमस् ताम् अद्य राम: कथं
पाप: पञ्चवटीं विलोकयतु वा गच्छत्व् असंभाव्य वा ॥ २८ ॥

(प्रविश्य) शम्बूक.—जयतु जयतु देव: भगवान् अगस्त्य: मत्त श्रुत-भगवत्-संनिधानस् त्वाम् आह—परिकल्पितावतरणा-मङ्गला[7] प्रतीक्षते वत्सला लोपामुद्रा[8] सर्वे च महर्षय: । तद् एहि संभावयास्मान् । अथ प्रजविना पुष्पकेण स्व-देशम् उपगम्याश्वमेधाय सज्जो भविष्यसीति ।

Śloka 27 – Metre : Śikhariṇī. This verse has been cited by Kṣemendra in his Aucityavicāra-carcā (P. 147) as an example of 'deśaucitya' *conformity of the place ;* by Sarasvāti (III, 41) as an example of 'Smaraṇa' *remembrance* (a secondary sentiment) ; by Kuvalayānanda (23,26) as an example of Samāsokti Figure, which consists in attributing a declared thing to that which is undeclared. Here the words of Rāma are applied to the changing a spect of the human life. परोक्ति-भेदकै: श्लिष्टै: समासोक्ति: (Kā. Pra. 10)'

1. विपर्यासम्—वि + परि + अस् + घञ् (भावे) ।
2. क्षितिरुहाम्—क्षितौ रोहन्ति इति (क्षिति + रुह् + क्विप्) ते तेषाम् ।
3. निवेश:—सं + नि + विश् + घञ् (भावे) ।
4. 'dṛḍhayati'--Denominative verb from the noun 'dṛḍha-

Where formerly there was a water-current, the rivers today have sandy banks. Density and inter-space of it is interchanged. Seen after a long time, this forest appears to me quite a different one; but the configuration of the rocks confirms my belief that it is the same. (27)

Alas, in vain I avoid ; my affection for the Pañcavatī seems to attract me by force. (*With a pathetic tone*)

Pañcavaṭī—where, in her company, I passed these days as if in my own house,—the object of our long conversations which endlessly kept us engaged with each other ;—Rāma, alone now, having destroyed that which was dearest to him, how, the culprit, is he going to survey or leave without paying respect to it. (28)

Śambūka—victory, victory to the King. Sire, the revered Agastya, having learnt from me your presence, informs you thus : "The motherly Lopāmudrā who made all the preparations for the welcome ceremony of your descent from the 'air-ship' is awaiting you and so also all the great Ṛṣis. Come, therefore, to greet us. Afterwards on the speedy Puṣpaka you will return to your country to prepare yourself for the Aśvamedha.

Śloka 28.—Śārdūla-vikrīḍitam (See P. 54)

5. यत्सम्बन्धि--यस्याः सम्बन्धः सो ऽस्यास्ति इति यत् सम्बन्ध+इनि।

6. आस्थीयत—स्था + (लङ्) त (भावे) passive imperfect 3rd pers. Sing. of √ā · sthā.

7. 'Avataraṇa-maṅgala'—*the ceremony of descent.* 'A mystic rite consisting of waving cocoanuts, rice mixed with curds and other things over a person and then keeping aside the things so waved where four roads meet ! (Kane n. P. 76). But no Canonical Text mentions this ceremony. As it is accomplished by Lopāmudrā. This too like the ceremony of 'saṃkhyā maṅgala' (infra P.106) was performed by ladies. (stry ācāra).

8. Lopāmudrā—Wife of Agastya and daughter of a King of Vidarbha.

रामः—यथाज्ञापयति भगवान् ।

शम्बूकः—इतस् तर्हि देवः प्रवर्तयतु पुष्पकम् ।

रामः—(पुष्पकं प्रवर्तयन्)—गुरु-जनोपरोधात्[1] तवापि क्षम्यताम् अतिक्रमो रामस्य । देव पश्य, पश्य ।

गुञ्जत् कुञ्ज-कुटीर-कौशिक-घटा घूत्कार-वत्-कीचक-
स्तम्बाडम्बर-मूक-मौकुलि-कुलः[2] क्रौञ्चावतो[3] ऽयं गिरिः ।
एतस्मिन् प्रचलाकिनां[4] प्रचलताम्[5] उद्वेजितः कूजितैर्
उद्वेल्लन्ति पुराण-रोहिण-तरु-स्कन्धेषु कुम्भीनसाः[6] ॥२९॥

अपिच......

एते ते कुहरेषु गद्गद-नदद्-गोदावरी-वारयो[7]
मेघालम्बित-मौलि-नील-शिखराः[8] क्षोणीभृतो दाक्षिणाः ।
अन्यो-ऽन्य-प्रतिघात-संकुल-चलत्-कल्लोल-कोलाहलैर्[9]
उत्तालास् त इमे गभीर-पयसः[10] पुण्याः सरित्-संगमाः ।३०।

(इति निष्क्रान्तौ)

इति पञ्चवटी-प्रवेशो नाम द्वीतीयो ऽङ्कः

Śloka 29 – Metre : Śārdūla-vikrīḍitam (See P.54) The verse is full of alliteration (anuprāsa).

1. उपरोधः—उप + रुध + घञ् (भावे)

2. गुञ्जत-इत्यादि—(समासः)गुञ्जतः कुञ्जानां कुटीराः तेषु ये कौशिकाः तेषां ये घटाः (समूहाः) तेषां यः घूत्कारः तद्वंतः कीचकाः तेषां ये स्तम्बाः तेषां आडम्बराः तैः मूकानि मौकुलीनां कुलानि यस्मिन् स तथोक्तः ।

3. 'Krauñcāvata'—Another reading 'Kuñjāvata—The name as the mountain has nowhere been attested. Krauñca, on the contrary, occurs in Rāmāyaṇa (IV.43)

4. प्रचलाकिनाम्—(प्रचलाकः वर्हं) अस्यास्तीति ।

5. प्रचलताम्-genitive pl. of Present participle of √pra + cal.

6. कुम्भीनसः— कुम्भी इव नासिका यस्य स तथोक्तः ।*Serpent.*

Rāma—As the venerable (Ṛṣi) commands.

Śambūka—Then, Your Majesty be pleased to direct your Puṣpaka to this side.

Rāma—Venerable Pañcavaṭī, since there is a pressure from the elders, pardon me, for a moment, this breach of etiquette.

Śambūka Look, Sire, look.

This is the mountain called Krauñcāvata, with its humming murmer, in the bower-hovels, of the troops of owls filling with their ululation the the groves of noisy reeds (Bamboos), forcing silence upon the group of crows ;—there, seized with terror at the sharp notes of the dancing peacocks, the pythons coil round and round the trunks of ancient sandal-wood trees. (29)

Moreover—

Here are, in the midst of the caverns sobbing and roaring waters of the Godāvarī, here are with the clouds hanging upon the tops of their blue summits, the mountains of the South;—agitated by the violent fracas of the terbulent waves, dashing against one another, in a tumultuous scuffle,—here are with their profound waters, the sacred junctions of the rivers. (30)

End of the Second Act called "The Arrival at the Pañcavaṭī,"

---

and Mahāvīra. (II, 17), which the comm. takes as forest (Krauñca-vana')

Śloka 30 Metre : Śārdūla-vikrīḍitam.

7. गद्-गद-नद—इत्यादि—(समास:) गद्गदं नदन्ति गोदावर्या: वारीणि येषु ते ।

8. मेघालम्बित-इत्यादि—(समास:) मेघै: आलम्बिता: मौलय: तेषां अतएव नीलानि शिखराणि येषां ते तथोक्ता: ।

9. अन्योन्य-इत्यादि—(समास:) अन्य: अन्यस्य प्रतिघात: इति अन्योन्य-प्रतिघात: तेन संकुला: चलन्तश्च ये कल्लोला: तेषां कोलाहल: । 10. गभीर-पयसाम् । गभीरं पय: येषां ते तेषाम् ।

तृतीयो ऽङ्कः

(ततः प्रविशति नदी-द्वयम्)

एका—सखि मुरले, किम् असि संभ्रान्तेव ?

मुरला—सखि तमसे, प्रेषितास्मि भगवतो ऽगस्त्यस्य पत्न्या लोपामुद्रया सरिद्वरां गोदावरीम् अभिधातुम्। "जानास्य् एव यथा वधू-परित्यागात् प्रभृति—

"अनिर्भिन्नो[1] गभीरत्वाद् अन्तर्-गूढ-घन-व्यथः ।
पुट-पाक[2]-प्रतीकाशो रामस्य करुणो रसः ॥ १ ॥"

"तेन च तथा-विधेष्ट-जन-कष्ट-विनिपात-जन्मना प्रकर्ष-गतेन दीर्घ-शोक-सन्तानेन सम्प्रति परिक्षीणो रामभद्रः। तम् अवलोक्य कम्पितम् इव मे सबन्धनं हृदयम्। अधुना च प्रतिनिवर्तमानेन रामभद्रेण नियतम् एव पञ्चवटी-वने वधू-सह-निवास-विस्रम्भ-साक्षिणः प्रदेशा द्रष्टव्याः। तत्र च निसर्ग-धीरस्याप्य् एवं-विधायाम् अवस्थायाम् अति-गम्भीराभोग-शोक-क्षोभ संवेगात् पदे पदे महान्ति प्रमाद-स्थानानि शङ्कनीयानि। तद् भगवति गोदावरि, तत्र त्वया सावधानया भवितव्यम्।

"वीची-वातैः शीकर-क्षोद-शीतैर्[3]
आकर्षाद्भिः पद्म-किञ्जल्क-गन्धान्।
मोहे मोहे रामभद्रस्य जीवं
स्वैरं स्वैरं प्रेरितैस् तर्पयेति" ॥ २ ॥

Notes, Grammatical Notes, Samāsas etc.

In act III the opening dialogue between two River-deities prepares the audience to meet the hero and the heroine of the drama quite accidentlly and unknown to each other

1. अनिर्भिन्नः—निर् + भिद् + क्तः = निर्भिन्नम् तत् अस्ति अस्य इति निर्भिन्नः, न निर्भिन्नः।

Third Act

(*Then enter two Rivers*)

One – Friend Muralā, why do you look so excited ?

Muralā – Friend Tamasā, the wife of venerable Agastya, Lopāmudrā sends me to the best of the Rivers, Godāvarī, to deliver this message : "You know well, how, since the repudiation of her young wife—

"*Too profound to be manifested outwardly, causing secretly an intense pain at the core, like a philter boiled in a closed vessel is the sentiment of Rāma—the pity.* (1)

"Therefore, arising from the loss of such a dear person, this long and terrible affliction, having reached to its climax, makes dear Rāma pine away. On seeing him my heart trembles, as it were, with its delicate joints. Now having returned to the forest of Pañcavaṭī dear Rāma will certainly see again the sites bearing testimony of intimate confidence produced by his stay in these places in company of his young spouse. And there, under these circumstances, inspite of his inborn steadiness, the violence of his immense and too profound emotion is at every step, apprehensive of serious accidents. That is why, venerable Godāvarī, you must be full of solicitude there."

"*With the breezes of your waves, made cool by the particles of spray and ladden with the perfumes of the pollen of the lotuses and wafted gently and gently, bring back our dear Rāma to consciousness, every time he is seized with vertigo......*" (2)

---

2. पुटपाक—A medical term, unattested in other literary texts, of cooking the ingredients in a close vessel covered with plaster of clay and the vessel intervened.

Śloka 2.—Metre : Mālinī (See P. 33).

3. शीकर-क्षोद-शीतैः—शीकरस्य क्षोदाः (चूर्णानि) तैः शीताः ये ते तैः ।

तमसा—उचितम् एव दाक्षिण्यं[1] स्नेहस्य । संजीवनोपायस् तु मौलिक एव रामभद्रस्य संनिहितः ।

मुरला—कथम् इव ?

तमसा—श्रूयताम् । पुरा किल वाल्मीकि-तपोवनोपकण्ठात् परित्यज्य निवृत्ते लक्ष्मणे सीता देवी प्राप्त-प्रसव-वेदनं अति-दुःख-संवेगात् आत्मानं गङ्गा-प्रवाहे निक्षिप्तवती[2] । तदैव तत्र दारक-द्वयं च प्रसूता । भगवतीभ्यां पृथ्वी-भागीरथीभ्याम् अभ्युपपन्ना रसातलं[3] च नीता । स्तन्य-त्यागात् परेण दारक-द्वयं च तस्याः प्राचेतसस्य महर्षेर् गङ्गा-देवी स्वयम् अर्पित-वती ।

मुरला—(सविस्मयम्)

ईदृशानां विपाको ऽपि जायते परमाद्भुतः ।
यत्रोपकरणी-भावम्[4] आयात्य् एवं-विधो जनः ॥३॥

तमसा—इदानीम् तु शम्बूक-वृत्तान्तेनानेन संभावित-जन-स्थानागमनं रामभद्रं सरयू-मुखाद् उपश्रुत्य भगवती भागीरथी यद् एव भगवत्या लोपामुद्रया स्नेहाद् आशङ्कितं तद् एवाशङ्क्य सीता-समेता केन चिद् इव गृहाचार-व्यपदेशेन गोदावरीं विलोकयितुम् आगता !

---

1. दाक्षिण्यम्—दक्षिणस्य भावः ।

2. **Suicide** of Sītā is an innovation of Bhavabhūti. Sītā of the Rāmāyaṇa says on the contrary (VII. 41.8) : 'I cannot even..... throw myself into the waters of the Gaṅgā, for I cannot destroy the royal descendants of my lord'.

3. 'Rasātala'—One of the 7 nether worlds (pātāla) inhabited by the demons or rather spirits etc. This must not be confounded with *naraka*. The names and order of these regions differ according to different texts. In the Epic the 'rasātala' forms

Tamasā—Ingenious care befits her (Lopāmudrās) affection, but the means of reviving dear Rāma is original and at hand to-day.

Muralā—How so?

Tamasā—Listen. Formerly, it is said, when Lakṣmaṇa had left the neighbourhood of the hermitage of Vālmīki, where he abandoned the queen Sīta, seized with the throes of child-birth, urged by an impulse of extreme anguish she precipitated herself in the stream of the Gangā. Immediately she brought into the world a couple of children. Helped by both the venerable Earth and the Ganga, she was conducted to the nether world. After they had been weaned from the mother's milk, the Goddess Gangā personally confided them to the great sage—the son of Pracetas.

Muralā (*With astonishment*)—

For such persons, even the adverse stroke of fortune turns up wonderful since the rôle of auxiliary is assumed by the persons of so high importance. (3)

Tamasā—Now, actually having learnt from the lips of Sarayū that after the adventure of Śambūka, dear Rāma had planned to come to Janasthāna, the venerable Bhāgīrathī, having apprehended the same fears which the affection of Lopāmudrā has already done, accompanied by the queen Sītā, has come to see the Godāvarī on the pretext of performing some domestic rites.

---

the inferior division. (Cf. W. Kirfel, Die Kosmographie. der Inder P. 14-147).

4. 'Stanya-tyāgāt pareṇa'—*Grammatically* it is quite irregular. Adverbs ending in '*ena*' (like pareṇa) govern the *accusative* or *genitive* (Cf Pā. II. 3. 41).

5. उपकरणीभावम्—उपक्रियते अनेन इति (उप + कृ + ल्युट्) उपकरणम् । अनुपकरणम्—उपकरणं भवति [उपकरण + च्वि + भू + (लट्) ति] इति उपकरणीभवति । उपकरणस्य भावः इति (उपकरण + च्वि + भू + घञ्) उपकरणीभावः ।

मुरला—सुचिन्तितं भगवत्या भागीरथ्या। राजधानी-स्थितस्यास्य खलु तैस् तैर् जगताम् आभ्युदयिकैः कार्यैः व्यापृतस्य रामभद्रस्य नियताश् चित्त-विक्षेपाः। अव्यग्रस्य पुनर् अस्य शोक-मात्र-द्वितीयस्य पञ्चवटी-प्रवेशो महान् अनर्थ इति। तत् कथम् इदानीं सीतादेव्या रामभद्र आश्वासनीयः स्यात्।

तमसा—उक्तम् अत्र भगवत्या भागीरथ्या—"वत्से, देवयजन-सम्भवे, सीते, अद्य खल्व् आयुष्मतोः कुश-लवयोर् द्वादशस्य जन्म-वत्सरस्य संख्या-मङ्गल-ग्रन्थिर्[1] अभिवर्तते। तद् आत्मनः पुराण-श्वशुरम् एतावतो मानवस्य[2] राजर्षि-वंशस्य प्रसवितारं सवितारम् अपहत-पाप्मानं स्वहस्तापचितैः पुष्पैर् उपतिष्ठस्व। न त्वाम् अवनि-पृष्ठ-वर्तिनीम् अस्मत्-प्रसादाद् वन-देवता अपि द्रक्ष्यन्ति किं पुनर् मर्त्या इति। अहम् अप्य् आज्ञापिता—"तमसे त्वयि प्रकृष्ट-प्रेमैव वधूर् जानकी। अतस् त्वम् एवास्याः प्रत्यन्तरीभवेति।" साहम् अधुना यथादिष्टम् अनुतिष्ठामि।

मुरला—अहम् अप्य् एतं वृत्तान्तं भगवत्यै लोपामुद्रायै निवेदयामि। रामभद्रो ऽप्य् आगत एवेति तर्कयामि।

तमसा—तद् इयम् गोदावरी-ह्रदान् निष्क्रम्य—

परि-पाण्डु-दुर्बल-कपोल-सुन्दरम्[3]
दधति विलोल-कबरीकम् आननम्।

---

1. 'Saṃkhyāmaṅgala'—The commentator Vīra says: "मङ्गलार्थं करे पट-सूत्रादिना स्त्रियो ग्रन्थिं कुर्वन्ति"—

For the sake of propitiation the women tie in the hand a knot of silken thread. (Cf. supra P notes.)

2. मानवस्य—मनोर् अयं मानवः। *Manu Vaivasvata*, son of the Sun (*Vivasvant*) is the ancestor of the dynasty of Ayodhya. According to Rāmāyaṇa (Bal. 70, also Ayodhyā 110) in the genealogy of Rāma, his descent

Muralā—The venerable Bhāgīrathī has had an excellent idea. In fact, as long as dear Rāma finds himself in his capital and is occupied with all sorts of business pertaining to the prosperity of the people, distraction of his mind is checked. But, from the time that he is unoccupied and that he remains alone with his grief, his arrival in the Pancavatī is a great calamity for him. But how could dear Rāma be consoled by the queen Sītā ?

Tamasā—The venerable Bhāgīrathī has said: "my dear child Sītā, born of the place of Divine Sacrifice, you know, today is the happy return of the 12th anniversary of Lava and Kuśa—long be their lives!—That is why, with the flowers picked by your own hands, you should go to pay homage to your ancient father-in-law, the ancestor of the race of royal sages, descendant of Manu—the Sun-god, the banisher of the evil. As long as you will find yourself on the surface of the earth, thanks to our power, even the sylvan-deities shall not see you, much less the mortals. As for myself, I have received orders thus: "Tamasā, the young queen Jānakī is greatly attached to you. So you should keep her company." Here I am, now to do what has been ordered to me.

Muralā—As far myself, I am going to communicate this news to the venerable Lopāmudrā. Dear Rāma, I suppose, must already have arrived.

Tamasā—Here she is coming out of the waters of Godāvarī.

Wearing a handsome face, altogether pale, with emaciated cheeks, and dangling locks—Incarnation of

---

is traced from Brahmā, whose son was Marīci, whose son was Kaśyapa, whose son was *Vivasvant*—the sun. *Manu* was the son of *Vivasvant*. Rāma was 37th in descent from *Vivasant*.

Śloka 4—Metre: Mañjubhāṣiṇī (See P. 26).

3. परिपाण्डु-इत्यादि—परिपाण्डू दुर्बलौ च यौ कपोलौ ताभ्यां सुन्दरम् ।

सीता—(ससम्भ्रमं कति चित् पदानि गत्वा) अज्जउत्त, परित्ताहि परित्ताहि मह तं पुत्तअम्! (स्मृतिम् अभिनीय सवैकल्यम्) हद्धी, हद्धी, ताइं जेव्व चिर-परिचिदाइं अक्खराइं पञ्चवटी-दंसणेण मं मन्द-भाइणीं अणुबन्धन्ति। हा अज्जउत्त! (इति मूर्च्छति)

[(ससंभ्रमम् कतिचित् पदानि गत्वा) आर्यपुत्र, परित्रायस्व, परित्रायस्व मम तं पुत्रकम् (स्मृतिम् अभिनीय सवैकल्यम्)—हा धिक्, हा धिक् तान्य् एव चिर-परिचितान्य् अक्षराणि पञ्चवटीदर्शनेन मां मन्दभागिनीम् अनुबध्नन्ति। हा आर्यपुत्र, (इति मूर्च्छति)]

(प्रविश्य) **तमसा**—वत्से, समाश्वसिहि समाश्वसिहि. (नेपथ्ये) वामन-राज, अत्रैव स्थीयताम्।

सीता—(समाश्वस्य ससाध्वसोल्लासम्) अम्हहे, जल-भर-भरिअ-मेह-मन्थर-त्थणिअ-गम्भीर-मंसलो[1] कुदो णु एसो भारई-णिग्घोसो भरन्त-कण्ण-विवरं मं वि मन्द-भाइणीं झत्ति उस्सावेदि[2] ?

[अहो, जल-भर-भरित-मेघ-मन्थर-स्तनित-गम्भीर-मांसलः[1] कुतो न्व् एष भारतीं-निर्घोषो भ्रियमाण-कर्ण-विवरां माम् अपि मन्दभागिनीं झटित्य् उच्छ्वासयति[2]]

तमसा—(सस्नेहास्रम्) अयि वत्से,
अपरिस्फुट-निक्वाणे कुतस्त्ये[3] ऽपि त्वम् ईदृशी।
स्तनयित्नोर्[4] मयूरीव चकितोत्कण्ठिता स्थिता ॥७॥

1. जल-भर-इत्यादि—जलस्य भरेण भरितो यः मेघः तस्य मन्थरं स्तनितं तद्वत् गम्भीरः मांसलः यः स तथोक्तः।

गम्भीर-तार-धीर-नाद-भरित-कर्ण-विवरम्...व्याहरति
मालती० vii 1-27
वाङ्-नीर-घोषः कर्ण-विवरम् आप्याययति
(महावीर० II 21-22)

Sītā—(*Alarmed, walking a few steps*) my Lord, save, save, the poor darling of mine. (*Gesticulating recollection, with despair*). Alas! alas! Those long familiar words, at the sight of Pañcavaṭī haunt me, the unfortunate that I am! Ah my dear lord! (*She swoons*).

(*Enter*) Tamasā—My child compose yourself compose yourself. (*Behind the scenes*)—O best among, the 'air-ships', it is here that you must hault,

Sītā (*Coming to her senses, with fear and joy*)—Ah! powerful and deep; like the rumbling of the cloud laden with water, filling my ears, where from comes such a sound which again soothes me—a luckless person.

Tamasā (*Tenderly with tears in the eyes*)—O my child!

At the slightest indistinct sound coming from an unknown direction, you are startled like a peahen at the roaring sound of thunder, quivering and restless, (7).

2. उच्छ्वासयति—*Denominative* verb from the noun 'ucchvāsa.'

3. कुतस्त्ये-कुत आगत इति (कुतस्+त्यप्) constructed on the analogy of दाक्षिणात्य etc.

4. 'Stanayitnoḥ' *of the cloud* from √*stan+itnu* (affix) *locative singular.*

सीता—भअवदि किं भणासि अपरिप्फुडेति ? मए उण सर-संजोएण पच्चभिआणिदं अज्जउत्तो एव्व वाहरदित्ति।

[भगवति, किं भणस्य् अपरिस्फुटेति ? मया पुनः स्वर-संयोगेन प्रत्य-भिज्ञातम् आर्यपुत्र एव व्याहरतीति]

तमसा—श्रूयते तपस्यतः[1] किल शूद्रस्य दण्ड-धारणार्थम् ऐक्ष्वाको[2] राजा जनस्थानम् आगत इति।

सीता—दिट्ठिआ अपरिहीण-राअ-धम्मो क्खु सो राआ।

[दिष्ट्या अपरिहीन-राज-धर्मः खलु स राजा] (नेपथ्ये)

यत्र द्रुमा अपि मृगा अपि बन्धवो मे
यानि प्रिया-सह-चरश् चिरम् अध्यवात्सम्[3]
एतानि तानि बहु-निर्झर-कन्दराणि[4]
गोदावरी-परिसरस्य गिरेस् तटानि ॥८॥

सीता—(दृष्ट्वा) हा कहं पहाद-चन्द-मण्डलापाण्डुर-परिक्खाम-दुब्बलेन[5] आआरेण अअं णिअ-सोम्म-गम्भीराणुभावमेत्त-पच्चहि-जाणिज्जो अज्जउत्तो एव्व। भअवदि तमसे, धारेहि मां (इति तमसाम् आश्लिष्य मूर्च्छति)

[हा कथं प्रभात-चन्द्र-मण्डल पाण्डुर-परिताम-दुर्बलेना[5] कारेणाय निज-सौम्य-गम्भीरानुभाव-मात्र-प्रत्यभिज्ञेय आर्यपुत्र एव। भगवति तमसे, धारय माम्]

तमसा—(धारयति) वत्से समाश्वसिहि, समाश्वसिहि।

1 तपस्यतः—Genitive singular of the present participle (*tapasyat* from *tapasyati*—a denominative verb from the noun *tapas*.

2. ऐक्ष्वाकः—इक्ष्वाकोर्गोत्रापत्यं पुमान् (इक्ष्वाकु+अञ्)

Śloka 8.—Metre : Vasanta-tilaka (See P. 11) The last stanza seems to allude to the scene of Rāmāyaṇa (III 60 *ff.*) where Rāma, after the disappearance of Sītā, questions the animals and trees. This simply is not a coincident that Bhavabhūti has followed the compound : गिरिश् चायं बहु-निर्झर-कन्दरः।

Sītā—Venerable lady, why do you say "indistinct"? At the combination of the articulation, I have recognised: "It is my noble lord who has spoken."

Tamasā—It is heard that in order to inflict punishment on a Śūdra, who was practising penances, the King—descendant of Ikṣvāku, has arrived at the Janasthāna.

Sītā—Thank God. He is a king who does not derogate from his kingly duties. (*Behind the screen.*)

These places where even the trees and the animals are like friends to me,—where I have lived for a long time in company of my beloved,—here are,—with their multiplex of waterfalls and caverns in the neighbourhood of the Godāvarī, these slopes of the mountain. (8)

Sītā—(*Percieving* [Rāmā]) Ah, what! with his face resembling the disc of the moon at the sun-rise, altogether pale, emaciated and enfeebled,—it is only through his exquisite, grave and inborn majesty that my lord is still recognisable! Venerable Tamasā, support me (*She faints, embracing Tamasā*).

Tamasā-(*Supporting her*)—compose yourself my child, compose yourself.

---

3. 'Adhyavātsam'—Aorist of √adhi+vas. '*vas*' when preceded by 'upa', 'adhi' and 'ā' takes the *accusative* and not the *locative* as it in case of '*vas*' alone. (उपान्वध्याङ् वसः पा० I.4.48.)

4. बहु-निर्झर-कन्दराणि—बहवः निर्झराः कन्दराश्च येषु तानि।

5. प्रभात-चन्द्र-इत्यादि—(समासः) निजः सौम्यः गंभीरश्च अनुभावः स एव मात्रा तेन प्रत्यभिज्ञातः यः स तथोक्तः।

(नेपथ्ये) – अनेन पञ्चवटी-दर्शनेन—

अन्तर-लीनस्य दुःखाग्नेर्[1] अद्योद्दामं ज्वलिष्यतः[2] ।
उत्पीड इव धूमस्य मोहः प्राग् आवृणोति माम् ॥ ९ ॥

हा प्रिये जानकि......

तमसा – (स्वगतम्)– इदं तद् आशङ्कितं गुरु-जनेन ।

सीता—(समाश्वस्य) हा, कहं एदं ? [हा कथम् एतत् ?]

(पुनर् नेपथ्ये) हा देवि, दण्डकारण्य-वास-प्रिय-सखि, विदेह-राज-पुत्रि ! (इति मूर्च्छति)

सीता—हद्धी, हद्धी, मं मन्द-भाइणीं वाहरिअ आमीलन्त-णेत्त-णीलुप्पालो[3] मुच्छिदो एव्व । हा कहं धरणी-पिट्ठे णिरुद्ध-णिस्सास-णीसहं विपल्हत्थो[4] । भअवदि तमसे, परित्ताएहि परित्ताएहि ! जीवावेहि अज्जउत्तं ! (इति पादयोः पतति)

[हा धिक्, हा धिक् मां मन्दभागिनीं व्याहृत्यामीलन्नेत्र-नीलोत्पलो[3] मूर्च्छित एव । हा कथं धरणी-पृष्ठे निरुद्ध-निःश्वास-निःसहं विपर्यस्तः[4] । भगवति तमसे, परित्रायस्व, परित्रायस्व ! जीवयार्यपुत्रम् !]

तमसा— त्वम् एव ननु कल्याणि संजीवय जगत्पतिम् ।
प्रिय-स्पर्शो हि पाणिस् ते तत्रैष निरतो जनः ॥ १० ॥

सीता—जं होदु तं होदु । जह भअवई आणवेइ । (इति स-सम्भ्रमं निष्क्रान्ता)

(ततः प्रविशति भूम्यां निपतितः सास्रया सीतया स्पृश्यमानः साह्लादोच्छ्वासो रामः)

सीता—(किं चित् सहर्षम्)—जाणे उण पच्चाअदं विअ जीविअं तेलोअस्स ।

[जाने पुनः प्रत्यागतम् इव जीवितं त्रैलोक्यस्य]

Śloka 9—13—Metre : Aunuṣṭubh (See P. 10)

1. दुःखाग्निः—दुःखं अग्नि इव (कर्म०) ।

2. ज्वलिष्यतः—*Genitive* of future participle from √jval.

(*Behind the screen*) – at the sight of Pañcavaṭī—

Like a column of smoke arising from the fire of my grief smouldering within, but ready at this moment, to blaze with a violent flash,—a stupor envelops me at first. (9)

Ah, dear Jānakī.........

Tamasā—That is what was apprehended by our elders.

Sītā—(*Coming back to her senses*) Ah; how that ?...

(*Again behind the screen*) – Ah, queen dear companion of my sojourn in the Daṇḍaka forest, Princess of Videha .....(*Swoons*).

Sītā—Alas, alas, having called me—the luckless that I am, closing his lolus-eyes, he loses his consciousness. Ah, how, here he is, on the ground, with dis breath stopped, powerless, and altogether changed. Venerable Tamasā, help, help. Bring my dear husband back to life. (*She throws herself on the feet of Tamasā*).

Do yourself, o beneficient lady, bring to lie the lord of the world,—for agreeable is the touch of your hand; therein alone lies the voluptuousness of this man. (10)

Sītā—Happen what may. As the venerable lady bids. (*Exit in a haste.*)

[*Then enter Rāma lying on the ground, delightfully regaining consciousness at the touch of Sītā in tears*]

Sītā—(*With somewhat joy*)—I feel, as if the three worlds seem to revive.

---

3. अमील-न्नेत्रोत्पलः – आ (ईषत्) मीलत् नेत्रं एव उत्पलं यस्य सः ।

4. विपर्यस्तः – वि + परि + अस् + क्तः ।

रामः—हन्त भोः किम् एतत् ?

आश्च्योतनं[2] नु[1] हरि-चन्दन-पल्लवानां
निष्पीडिते[3]न्दु-कर-कन्दलजो नु[1] सेकः ।
आतप्त-जीवित-तरोः[4] परितर्पणो ऽयं
संजीवनौषधि-रसो नु[1] हृदि प्रसिक्तः ? ॥ ११ ॥

अपिच—

स्पर्शः पुरा परिचितो नियतं स एव
संजीवनश् च मनसः परिमोहनश् च ।
संतापजां सपदि यः परिहृत्य मूर्च्छाम्
आनन्दनेन जडतां पुनर् आतनोति ॥ १२ ॥

सीता—(ससाध्वसोत्कम्पम् अपसृत्य)—एत्तिअं एव्व दाणीं मए बहुदरं । [एतावद् एवेदानीं मे बहुतरम्]

रामः (उपविश्य)—न खलु वत्सलया सीता-देव्याभ्युपपन्नो ऽस्मि ?

सीता—हद्धी, हद्धी, किंत्ति मं अज्जउत्तो मग्गिस्सदि ।
[हा धिक्, हा धिक्, किम् इति माम् आर्यपुत्रो मार्गयिष्यति]

रामः—भवतु पश्यामि ।

Śloka 11—Metre : Vasanta-tilakā (See P. 11) The 3rd pāda is controversial. Kane rejects the reading '°jīvita-taroḥ' which we have adopted. So does Kale on the ground that 'the comparison of the life to a tree is not quite happy' (?) But this idea has been expressed elsewhere (IV,2) in Uttararāmacarita :

हृदि नित्यानित्यानुषक्तेन सीता शोकेन तप्यते ।

अन्तः प्रसुप्त-दहनो ज्वलन्निव वनस्पतिः ॥ And, if we examine the contents, all the four images : *viz. pallava, kandala, taru* and *oṣadhi* offer a symmetry of construction and pertain to the botanical species.

Rāma—Ah, ah, what is this ?

Is it the juice which flows from the off-shoots of the golden-coloured sandal-wood,—or the fluid caused to be gushed out in pressing the buds of the moon-beams?—Or a refreshment of the tree of my life or the essence of the life-giving plants which is poured into my heart. (11)

Moreover.........

Surely, this is the same touch which was familiar to me formerly. It revives my spirit at the same time fascinates it ;—dissipating all of a sudden my swoon caused by grief, by its thrill, it prolongs once more my mental aberration. (12)

Sītā—(*Withdrawing precipitately and altogether trembling*)—That is already too much for me.

Rāma—(*Sitting up*)—Is'nt it, that I am favoured by my affectionate queen Sītā ?

Sītā—Alas, alas, is my lord going to search for me ?

Rāma—Well, I am going to find he

---

1. आश्च्योतनम्—आ + श्च्युत् + ल्युट् भावे ।

2. *Nu.........nu.........nu*—The tripple interrogation is frequent in Kālidāsa also (Cf. Śak. VI 11).

3. निष्पीडित इत्यादि—(समासः)—निष्पीडिताः इन्दुकरा एव कन्दलाः तेभ्यः जायते यः स तथोक्तः ।

4. जीवित-तरोः—जीवितं तरुः इव (कर्मधारयः)

Śloka 12—**Metre :** Vasanta-tilakā (See P. 11)
Compare :

तव स्पर्शे स्पर्शे मम च परिमूढेन्द्रियगणो ।
विकारश्चैतन्यं भ्रमयति समुन्मूलयति च ॥

सीता—भअवदी तमसे, ओसरह्म दाव । मं पेक्खिअ अणा॰ ॰भणुण्णादेन संनिहाणेण राआ अहिअं कुप्पिस्सदि ।

[भगवति तमसे, अपसरावस तावत् । मां प्रेक्ष्यानभ्यनुज्ञातेन संनिधानेन राजाधिकं कोपिष्यति]

तमसा—अयि वत्से, भागीरथी-प्रसादाद् वन-देवतानाम् अप्य् अदृश्यासि संवृत्ता ।

सीता—अं अत्थि खु एदं । [आम् अस्ति खलु एतत्]

रामः—हा प्रिये जानकि !.........

सीता—(समन्यु-गद्गदम्) अज्जउत्त, असरिस्सं क्खु एदं वअणं इमस्स वुत्तन्दस्स । (सास्रम्) अहवा किंत्ति वज्जमई जम्मन्तरेसु वि पुणो असंभाविअ-दुल्लह-दंसणास्स मं एव्व मन्द-भाइणिं उद्दिसिअ वच्छलस्स एव्वं-वादिणो अज्जउत्तस्स उवरि णिरणुक्कोसा भविस्सं ? अहं एदस्स हिअअं जाणामि ममावि एसो ।

[आर्यपुत्र, असदृशं खल्व् एतद् वचनम् अस्य वृत्तान्तस्य......। अथवा किम् इति वज्रमयी जन्मान्तरेष्व् अपि पुनर् असंभावित-दुर्लभ-दर्शनस्य माम् एव मन्द-भागिनीम् उद्दिश्य वत्सलस्यैवं वादिन आर्य-पुत्रस्योपरि निरनुक्रोशा भविष्यामि ? अहम् एतस्य हृदयं जानामि ममाप्य् एषः]

रामः—(सर्वतो ऽवलोक्य सानिर्वेदम्)—हा न किंचिद् अत्र !

सीता—भअवदि तमसे, तह णिक्कारणा-परिच्चाइणो वि एदस्स एव्वंविधेण दंसणेण कीदिसो विअ मे हिअआणुबन्धोत्ति ण जाणामि [भगवति तमसे, तथा निष्कारण-परित्यागिनो ऽप्य एतस्यैवंविधेन-दर्शनेन कीदृश इव मे हृदयानुबन्ध इति न जानामि]

Śloka 13—Metre : Śikhariṇī (See P. 38) Figure : Utprekṣā, *Assimilation*.

Sītā - Venerable Tamasā, let us move off. Seeing me approaching him without permssion, the King will be all the more angry.

Tamasā — Well, my child, by favour of Bhāgīrathī you have become invisible even to the silvan deities.

Sītā – Oh, yes, that is so !

Rāma – Ah, dear Jānakī......

Sītā – (*Faltering with excitement*), my lord, these words are not quite in keeping with what has happened. (*Crying*). But why, hard as the adamant, shall I be pitiless towards my lord — he whose glimpse, even in my lives hereafter, will be difficult beyond imagination to have, — he who, full of affection speaks thus of me, poor unfortunate that I am. I know his heart and he mine.

Rāma — (*Looking all round with despair*). — Ah, no one here !......

Sītā — Venerable Tamasā, on seeing him thus, who, although repudiated me without cause, I do not know what is the inclination of my heart !

---

1. **तटस्थ**—तटे तिष्ठति इति (तट + स्था + क:) (कर्तरि) ।
2. **नन्दिनि**— नन्दयति या सा (नन्द् + णिच् + णिनि) तत् संबुद्धौ ।
3. **अगाध-इत्यादि**—(समास:) अगाध: दर्शित: स्नेह-संभार: येषां ते तथोक्ता: । (सम् + भृ + घञ् भावे)
4. **निष्कारण—इत्यादि** (समास:) निष्कारणेन परित्यागेन शल्यं अस्य संजातम् इति (शल्यित:) य: स: ।

तमसा—जानामि वत्से, जानामि।

तटस्थं[1] नैराश्याद् अपि च कलुषं विप्रिय-वशाद्
वियोगे दीर्घे ऽस्मिन् झटिति-घटनोत्तम्भितम्[1] इव।
प्रसन्नं सौजन्याद् दयित-करुणैर् गाढ-करुणम्
द्रवी-भूतं प्रेम्णा तव हृदयम् अस्मिन् क्षण इव ॥ १३ ॥

रामः—देवि,

प्रसाद इव मूर्तिस् ते स्पर्शः स्नेहार्द्र-शीतलः
अद्याप्य् आनन्दयति मां त्वं पुनः कासि नन्दिनि[2] ? ॥१४॥

सीता—एदे क्खु ते अगाध-दंसिद-सिणेह-संभारा[3] आणन्द-णिस्सन्दिणो सुहामआ अज्जउत्तस्स उल्लावा। जाणं पच्चएण णिक्कालण-परिच्चाअ-सल्लिदो[4] वि बहु-मदो मह जम्मलाहो।

[एते खलु ते अगाध-दर्शित-स्नेह-संभारा[3] आनन्द-निष्यन्दिनः सुधामया आर्यपुत्रस्योल्लापाः, येषां प्रत्ययेन निष्कारण-परित्याग-शल्यितो ऽपि बहु-मतो मम जन्म-लाभः]

रामः—अथवा कुतः प्रियात्मा ? नूनं सङ्कल्पाभ्यास-पाटवोपादान एष रामभद्रस्य भ्रमः।

(नेपथ्ये)—महान् प्रमादः, प्रमादः !

सीता-देव्या स्व-कर-कलितैः सल्लकी-पल्लवाग्रैर्
अग्रे लोलः करि-कलभको यः पुरा पोषितोऽभूत्।

रामः—(सकरुणौत्सुक्यम्)—किं तस्य ?

(पुनर् नेपथ्ये)—

वध्वा सार्धं पयसि विहरन् सो ऽयम् अन्येन दर्पाद्।
उद्दामेने द्विरद-पतिना सन्निपात्याभियुक्तः ॥६ पूर्वम् ॥

सीता—को दाणीं अहिउज्जिअस्सदि ?

[क इदानीम् अभियोक्ष्यते ?]

रामः—क्वासौ क्वासौ दुरात्मा यः प्रियायाः पुत्रकं वधू-द्वितीयम् अभिभवति ?

---

1. उत्तम्भित—उद् + स्तम्भ् + णिच् + क्तः (कर्मणि)।

Tamasā—I know my child, I know.

Indifferent on account of disappointment and slighted by the insult, during this long separation, excited though at a sudden contact, limpid on account of innate nobleness, pitying his beloved yet stricken with pity, melted as if under the effect of love,—such is at present thy heart (13).

Rāma—Queen.

Like the favour incarnate, your cantact—refreshing —being saturated with affection, delights me even now, ...but where are you, O source of joy! (14)

Sītā—Ah, certainly, ladden with love, of which they reveal an unfathomable depth, pouring felicity, nectar-like,—such are the lamentations of my dear husband which certainly prove that, although pierced by a dart of unjustifiable abandonment, my existence is worth the name.

Rāma—Why, no, how could my darling be here? Certainly it is allusion of poor Rāma fitted to concentrated intensity of his desire,......

(*Behind the screen*), A great misery! Misery!

This young elephant, gambling formerly before her, was nourished by the Queen Sītā by the sprigs of Sallaki.........

Rāma—What has happend to him?

(*Again behind the screen.*)

Here, while sporting in the water with his mate, he has been defiantly attacked by another elephant leader, infatuated with conciet, who, while encountering him, has rushed on him.

Sītā—Who is now being attacked?

Rāma—Where is that, where is that infamous, who is attacking my beloved's pet, accompanying its mate?

(प्रविश्य संभ्रान्ता) वासन्ती—कथं देवो रघुनन्दनः !

सीता—कहं पिअसही मे वासन्दी !

[कथं प्रियसखी मे वासन्ती !]

वासन्ती—जयतु जयतु देवः ।

रामः—(निरूप्य) कथं देव्याः प्रियसखी वासन्ती !

वासन्ती—देव, त्वर्यतां त्वर्यताम् ! इतो जटायु-शिखरस्य दक्षिणेन सीता-तीर्थेन[1] गोदावरीम् अवतीर्य संभावयतु देव्याः पुत्रकं देवः ।

सीता—हा ताद, जडाओ सुण्णं तुए विणा इदं जणट्ठाणम् ।

[हा तात, जटायो, शून्यं त्वया विना इदं जनस्थानम्]

रामः—अहह ! हृदय-मर्म-च्छिदः खल्व् अमी कथोद्घाताः[2] ।

वासन्ती—इत इतो देवः ।

सीता—भअवदि, सच्चं एव्व वणदेवदा वि मं ण पेक्खदि ।

[भगवति सत्यम् एव वनदेवताऽपि मां न प्रेक्षते]

तमसा—अयि वत्से, सर्व-देवताभ्यः प्रकृष्टम् ऐश्वर्यं मन्दाकिनी-देव्याः । तत् किम् इत्य् आशङ्कसे ?

सीता—तदो अणुसरह्म । (इति परिक्रामति)

[ततो ऽनुसरावः]

रामः—भगवति गोदावरि, नमस्ते ।

वासन्ती—(निरूप्य) देव, मोदस्व विजयिना वधू-द्वितीयेन देव्याः पुत्रकेण ।

रामः—विजयताम् आयुष्मान् !

---

1. Sita-Tirtha—A pier named after Sita.

2. कथोद्घातः—उद् + हन् + घञ् (भावे) कथायाः उद्घातः (प्रस्तावः) ।

Vāsantī—(*Enters quite bewildered*)—Ah, what the king, descendant of Raghu!

Sītā—Ah, what! my dear friend Vāsanti!

Vāsantī—Victory, victory to my lord!

Rāma—(*Observing her carefully*) Eh, what! This is Vāsantī the dear friend of the queen!

Vāsantī—Sire, look sharp, look sharp! Crossing the Godāvarī at the Sītā pier, to the south of the Jaṭayu-summet, may Your Highness come to the rescue of the pet of the queen.

Sītā—Ah, father Jaṭāyu, the Janasthana is a desert without you!

Rāma—Ah, these recollections of the past incidents, in reality break the vitals of my heart.

Vāsantī—This way, this way, Sire.

Sītā—Venerable, it is true, even the sylvan dieties do not see me.

Tamasā—Oh, yes my child, the power of the Goddness Mandākini (Gangā) is superior to all the divinities. What have you to be afraid of?

Sītā—Then, let us follow them. (*She then walks about*).

Rāma—Venerable Godāvari, I salute you.

Vāsantī—(*Observing carefully*) Rejoice, my lord, the young pet of the queen has come out victorious and is accompany his mate now.

Rāma—May he live long and be victorious!

In terms of dramaturgy this is one of the three means of reconnecting the prologue to the principal action, *cf*, *Theatre Indien*, (138).

सीता—अह्महे ! ईदिसो मे पुत्तओ संवुत्तो !
[अहो ! ईदृशो मे पुत्रकः संवृत्तः !]

रामः—हा देवि, दिष्ट्या वर्धसे !

येनोद्गच्छद्-बिस-किसलय-स्निग्ध-दन्ताङ्कुरेण[1]
व्याकृष्टस् ते सुतनु लवली-पल्लवः कर्ण-मूलात् ।
सोऽयं पुत्रस् तव मद-मुचां[2] वारणानां विजेता
यत् कल्याणं वयसि तरुणे भाजनं तस्य जातः ॥१५॥

सीता—अविउत्तो दाणिं अअं दीहाऊ इमाए सोम्म-दंसणाए होदु ! [अवियुक्त इदानीम् अयं दीर्घायुः अनया सौम्य-दर्शनया भवतु]

राम—सखि वासन्ति, पश्य, पश्य ! कान्तानुवृत्ति-चातुर्यम् अपि शिक्षितं वत्सेन ।

लीलोत्खात-मृणाल-काल-कवल-च्छेदेषु सम्पादिताः[3]
पुष्यत्-पुष्कर-वासितस्य पयसो[4] गण्डूष-संक्रान्तयः ।
सेकः शीकरिणा करेण विहितः कामं विरामे पुनर्
यत् स्नेहाद् अनराल-नाल-नलिनी-पत्रातपत्रम् धृतम्॥१६॥

---

3. Sloka 15 – Meter Mandā mrantā (See P......

1. उद्गच्छत् इत्यादि (समासः)—उद्गच्छन् बिस-किसिलवत् स्निग्धः दन्ताङ्कुरः यस्य स तेन ।

2. Mada-mucaṃ vāranānām—*Elephants or oozing rut.* This is a poetic convention (*Kavi-samavakyatih*) that the young elephants when in fury or stupour ooz rut ichor. But the fact has no scientific confirmation. (*Cf* J. Fillozat, Les Gajaśāstra J. A. T. CCXXII P. 168.)

3. लीलोत्खात इत्यादि (समासः) लीलया उत्खातानि मृणाल-काण्डानि तेषां ये कवलाः तेषां छेदेषु (विरामेषु) ।

Sita—Oh, that is how my youngster has become!

Rama—Ah, queen, you are to be felicitated!

He who with his buddisk, glistening na tender dntug like the sprouting lottus-stem, plucked, O my pretty, e leaf of the Lavali (*Liana creeper*) *from your ears,—here has your child, victorious over the elephants shedding rut, has become the paragon of that which brings charm to the juvenile years.*

Sitā—May he live long, and be inseparable from his good-looking mate!

Rāma—Friend Vāsanti, look, look; my dear child has even learnt the art of courting his beloved.

In sport he extripates the fragments of lotust-twigs, and as soon she has finished swalling them, he passes unto her, mouth-fuls of water perfumed with blooming lotuses; with his glistening trunk he sprinkles at will, then in the interval, tendenly he presents to her a parasol of lotus-leaves, with twigs erect. (*16*).

---

4. पुष्यत्पुष्करः इत्यादि—(समासः) पुष्यत् यत् पुष्करं (कमलं) तेन वासितः यः स तस्य ।

Śloka 16—*Meter* : Śārdūla-Vikriḍitam (See P. 54) Cf. Mālatimādhava IX 34 (*na snehād*). A reversed picture occurs in Kumāra-Saṃbhava, where she-elephant offer smouthfuls of water to her mate :

दृदौ रसात् पङ्कज-रेणु-चन्धि

गजाय गण्डूष-जल करेणुः । III 37.

सीता—भअवदि तमसे, अयं दाव ईरिसो जादो। दे उण ण आणामि कुस-लवा एत्तिएण कालेण कीरिषा संवुत्तेति।

[भगवति तमसे, अयं तावत् ईदृशो जातः। तौ पुनर् न जानामि कुशलवाव् एतावता कालेन कीदृशौ संवृत्ताव् इति।]

तमसा—यादृशोऽयं तादृशौ ताव् अपि।

सीता—ईदिसी अहं मन्द-भाइणी जाइ ण केवलं णिरन्तरं अज्जउत्त-विरहो पुत्तविरहो वि।

[ईदृश्य् अहं मन्द-भागिनी यस्या न केवलं निरन्तरम् आर्यपुत्र-विरहः पुत्र-विरहोऽपि]

तमसा—भवितव्यतेयम् ईदृशी।

सीता—किंवा मए पसूदाए जेण तादिसं पि मह पुत्तआणं ईसि-विरल-कोमल-धवल-दसणुज्जल-कपोलं[1] अणुवद्ध-मुद्ध-काअली[2]-विहसिदं णिवद्ध-काक-सिहण्डअं[3] अमल-मुह-पुण्डरीअ-जुअलं ण परिचुम्बिअं अज्ज-उत्तेण।

[किम् वा मया प्रसूतया येन तादृशम् अपि मम पुत्रकयोर् ईषद्-विरल धवल-कमल-दशनोज्ज्वल-कपोलम्[1] अनुबद्ध-मुग्ध-काकली[2]-विहसितं निबद्ध-काक-शिखण्डकम्[3] अमल-मुख-पुण्डरीक-युगलं न परिचुम्बितम् आर्यपुत्रेण]

तमसा—अस्तु देवता-प्रसादात्।

सीता—भअवदि तमसे, एदिणा-अवच्च-संसुमरणेण उस्स-सिद-पण्हुदत्थणी ताणं अ पिदुणो संणिहाणेण खण-मेत्तं संसा-रिणीह्मि संवुत्ता।

[भगवति तमसे, एतेनपात्य-संस्मरणेनोच्छ्वसित-प्रस्नुत-स्तनी तयोश् च पितुः संनिधानेन क्षणमात्रं संसारिण्य् अस्मि संवृत्ता]

---

1. **ईषद्विरल इत्यादि**—(**समासः**) ईषद् विरलाः कोमलाः धवलाः च ये दशनाः तैः उज्ज्वलौ कपोलौ यस्य स तम्।

2. Kakalī—Sweet, indistinct prattles.

Sita—Venerable Tamasa that is how my young one has become! But I do not know what has all this time become to Kuśa, and Lava.

Tamasā—As this one, so they are.

Sīta—How unfortunate am I, that I am separated not only from my husband, but also from my sons!

Tamasā—Such is the Destiny.

Sitā—To what propose have I given birth to my sons, since such a couple of pure lotus-like faces, with blooming cheeks, and slightly interspaced teeth—delicate and white,—those ever smiling faces, accompanied by their charming prattle, and wearing locks of hair adorned with the feathers of crow,—have not been kissed by my husband.

Tamasa—May that happen by the grace of the gods!

Sitā—Venerable Tamasa, at the recollection of my children, my breasts are throbbing and overflowing with milk......In the presence of their father, here I have become again, for a while, a wordly woman.

---

3. **Kāka-Śikhaṇḍa**—Madame Stchoupak translates: "Crow's fhathers. But Kṣīrasvamin takes it as "creast, or trimmed locks of hair"

"क्षत्रियाणां डा कागपक्ष इति गौडः" ।

तमसा—किम् अत्रोच्यते । प्रसवः खलु प्रकर्ष-पर्यन्तः स्नेहस्य । परं चैतद् अन्योन्य-सश्लेषणं पित्रोः ।

अन्तकरण-तत्त्वस्य दम्पत्योः स्नेह-संश्रयात् ।
आनन्द-ग्रन्थिर् एकोऽयम् अपत्यम् इति बध्यते ॥१७॥

वासन्ती—इतोऽपि देवः पश्यतु ।

अनुदिवसम्[1] अवर्धयत् प्रिया ते
यम् अचिर-निर्गत-मुग्ध-लोल-बर्हम्[2] ।
मणि-मुकुटइवोच्छिखः[3] कदम्बे
नदति स एष वधू-सखः[4] शिखण्डी ॥१८॥

सीता—(सकौतुक-स्नेहास्नम्) एसो सो, एसो सो !
[एष स, एष सः !]

रामः—मोदस्व वत्स ! मोदस्व !

सीता—एव्वं होदु । [एवं भवतु]

रामः—भ्रमिषु कृत-पुटान्तर्-मण्डलावृत्ति-चक्षुः
प्रचलित-चटुल-भ्रू-ताण्डवैर् मण्डयन्त्या ।
कर-किसलय-तालैर् मुग्धया नर्त्यमानम्,
सुतम् इव मनसा त्वां वत्सलेन स्मरामि ॥१९॥

Sloka 18—Metre Puṣpitāgrā (See Act IV 4).

1. अनुदिवसम्—(समासः) दिवसे दिवसे अनु (अव्ययीभावः) ।

2. अचिर-(समासः) अचिरं निर्गतं मुग्धं लोलं च बर्हं यस्य स तम् ।

3. उच्छिखः—(समासः) उद्गता शिखा यस्य स तम् ।

वधूसखः—(समासः) वध्वाः सखा वधूसखः (तत्पुरुषः) ।
"The reading—
'अतरुण-मद-ताण्डवोत्सवान्तेषु" in the first quarter"

Tamasa—Why to talk of this subject? The child is in reality the highest point of affection. Besides it is the noblest bond which unites the parents.

For the inner self of the parents who engenders their affection in himself and who is a unique knot of bliss; he is called; the child.

Vasanti—May Your Majesty see in this direction.

Your beloved wife who day after day bought it up—with its tails recenily unfirled and graciously fluttering, its crest raised up like a diadem of precious stones on a a Kadamba tree,—here it is that peacock uttering its cry by the side of its pea-hen. (18).

Sitā—(*With tears of tender affection*)—It is the same, it is the same.

Rama—Rejoice, my child, rejoice!

Sitā—Be it is so.

Rama—*At your polkas (turnings in a dance) embellishing by her quick and alert dances, the eye revolving round and round inside the eye-lids, and beating time with her tender leaf-like plams, my mininon* (Sitā) *made you dance......How like a son I remember you with an affectionate heart.* (19).

---

says Mr. P. V. Kane, "brings before us the peacock abruptly and the words of Sitā *viz* '*eso so*' that follow the verse cannot be properly connected with it (Kane notes P. 92.—)

Śloka 19—*Meter*: Mālini. (See P. 33).

1. कृत-पुटान्त इत्यादि—(समासः) कृता पुटस्य अन्तः मण्डलावृत्तिः याभ्यां ते, कृत-पुटान्त-मण्डला-वृत्तिनी, ते च चक्षुषी च, प्रचलिते चटुले च भ्रुवौ तयोः ताण्डवानि ।

हन्त, तिर्यञ्चोऽपि परिचयम् अनुरुध्यन्ते ।
कतिपय कुसुमोद्गमः कदम्बः,
प्रियतमया परिवर्धितो ऽयम् आसीत् ।

सीता—(सास्रम्) सुट्ठु पच्चहिआणिदं अज्जउत्तेण ।
[सुष्ठु प्रत्यभिज्ञातम् आर्यपुत्रेण]

रामः—स्मरति गिरि-मयूर एष देव्याः ।
स्वजन इवात्र यतः प्रमोदम् एति ॥२०॥

वासन्ती—अत्र तावद् आसन-परिग्रहं करोतु देवः ।(राम उपविशति)

वासन्ती—एतत् तद् एव कदली-वन-मध्यवर्ति,
कान्ता-सखस्य शयनीय-शिलातलं ते ।
अत्र स्थिता तृणम् अदाद् बहुशो यद् एभ्यः
सीता ततो हरिणकैर् न विमुच्यते स्म ॥२१॥

रामः—इदं तावद् अशक्यम् एव द्रष्टुम् ।
(इत्य् अन्यतो रुदन्न् उपविशति)

सीता—सहि वासन्दि, किं तुए किदं अज्जउत्तस्य मह अ एदं दंसअन्तीए । हद्धी, हद्धी, सो ज्जेव अज्ज-उत्तो, तं एव्व पञ्चवटी-वनं, सा एव्व पिअसही वासन्दी, दे एव्व विविह-विसम्भ-सक्खिणो गोदावरी-काणणुद्देसा, दे एव्व जाद-णिव्विसेसा मिअ-पक्खि-पाअवा, सा जेव्व चाहम् । मह उण मन्द-भाइणीए दीस्सन्तं वि सव्वं एव्व एदं णत्थीत्ति ता ईदिसो जीव-लोअस्स परिवत्तो ।

[सखि वासन्ति, किं त्वया कृतम् आर्यपुत्रस्य मम च एतत् दर्शयन्त्या । हा धिक् हा धिक् ! स एव आर्यपुत्रस् तदेव पञ्चवटी-वनं, सा एव प्रियसखी वासन्ती, त एव विविध-विस्रम्भ-साक्षिणो गोदावरी-काननं देशास् त एव जातिनिर्विशेषाः मृग-पक्षि-पादपाः, सा एव चाहम् । मम पुनर् मन्दभाग्याया दृश्यमानम् अपि एतत् नास्तीति, तद् ईदृशो जीवलोकस्य परिवर्तः]

Ah, even the animal conform themselves to the familiar faces.

The Kadamba tree where a few flower have blossmed was reared by my darling ....

Sītā – (*Tearfully*)—My dear lord has quite recognised it.

Rāma – *This peacock of the mountain remembers the queen, since, as amongst his own kith and kin, he gives itself up to ecstasy* (20).

Vāsantī – Let your Majesty be seated here. (Rāma *sits down.*)

Vāsantī—*Here, placed in the middle of the plantain-grove, is the stone-slab, which served to you and your boved as bed. Seated here,* Sītā *used to effer herbs to the deer. Hence this place has not been deserted by them* (*even now*). (21)

Rāma—No, 1 cannot see that. (*He sits down elswhere and weeps*).

Sītā – Friend Vāsantī, what have you done this? while showing this to my husband and me? Alas, alas, here is my lord, the same........Here is the forest Pañcavaṭī. the same ....Here, is my friend Vāsantī the same......Here are the testimony of our multiplex intimacy, the same wooded sites of Godāvarī...... These deer, these birds and these trees that were children to us, are the same ..And here I am, the same. But for me, poor luckless that I am, even when I see it all, this does not seem to exist,—such is the vicissitude of the world of the living beings!

Śloka 20—Metre : Puṣpitāgrā (see act IV. 4......)

Śloka 21—Meter : Vasanta-tilaka (see page 11.)

L. 15. Mme. Stchoupak translates : "Alas! here they did not quit her."

वासन्ती—सखि सीते, कथं न पश्यसि रामभद्रस्य अवस्थाम् ?

नव-कुवलय-स्निग्धैर् अङ्गैर् ददन् नयनोत्सवम्,
सततम् अपि नः स्वेच्छा-दृश्यो नवो नव एव यः ।
विकल-करणः[1] पाण्डु-च्छायः शुचा परिदुर्बलः
कथम् अपि स इत्य् उन्नेतव्यस्तस् तथापि दृशोः प्रियः ॥२२॥

सीता—पेक्खामि, सहि पेक्खामि । [प्रेक्षे, सखि प्रेक्षे]

तमसा—पश्यन्ती प्रियं भूयाः ।

सीता—हा देव्व, एसो मए विणा अहं वि एदेण विणेत्ति सिविणे पि केण संभाविदं आसि । ता मुहुत्तमेत्तं जम्मन्तरादो विअ लद्ध-दंसणं वाह-सलिलन्तरेसु पेक्खामि दाव वच्छलं अज्जउत्तम् ।
[हा देवि, एष मया विना अहम् अप्य् एतेन विना इति स्वप्नेऽपि केन सभावितम् आसीत् । तत् मुहूर्त-मात्रं जन्मान्तराद् इव लब्धदर्शनम् बाष्प-सलिलान्तरेषु प्रेक्षे तावद् वत्सलम् आर्यपुत्रम्]

(इति पश्यन्ती स्थिता)

तमसा—(परिष्वज्य सास्रम्)

विलुलितम् अति पूरैर् बाष्पम् आनन्दशोक-
प्रभवम् अवसृजन्ती तृष्णयोत्तान-दीर्घा ।
स्नपयति हृदयेशं स्नेह-निष्यन्दिनी ते
धवल-मधुर-मुग्धा दुग्ध-कुल्येव दृष्टिः ॥२३॥

वासन्ती—

ददतु तरवः पुष्पैर् अर्घ्यं फलैश् च मधुश्च्युतः[2]
स्फुटित-कमलामोद-प्रायाः प्रवान्तु वनानिलाः ।

Śloka 22—Meter : Hariṇi (see page 28).

1. विकल-करण:—(समासः)—विकलानि करणानि (इन्द्रियाणि) यस्य स तथोक्तः ।

Vāsanti —Friend Sitā don't you see the condition of dear Rāma?

His limbs, smooth like a fresh lotus, offered a feast to our eyes; always we used to see him at our will and continually he seemed new and new to us, all new .. With a body of decaying, complexion, pale and completely enfeebled with grief, now he is hardly to be recognised as the same one,—nevertheless he is sweet to look at. (22)

Sītā — I see, friend, I see.

Tamasā — May you ever have a deligheful sight of your beloved!

Sītā —Ah, Destiny,—he without me and I without him, who would have imagined it even in a dream! Let me, even for a moment, like an other existence, through the torrents of my tears, behold my sweet lord, as long as it is possible for we to see him. (*See remains staring at him.*)

Tamasā—(*Embracing her with tears in her eyes*) *They shed tears which roll ond overflow under the effect of joy and pain; they are expanded and dilated through intense longing; they pour affection, and bathe the lord of your heart, as if in a stream of milk; they are bright sweet and candid —such are your eyes!*(23.)

Vāsanti —*May the trees dripping honey bring to you 'arghya' (offering of fruits and flowers); may the sylvan breezes blow (unto you) ladden with the perfume of biossomed lotuses; may the birds distraught*

---

2. मधुश्चुतः—(समासः) मधुश् च्योतन्ति इति मधुश्च्युतः ।

14. Śloka 24—Metre: Harini (see page 28).

कलम् अविरल रज्यत्कण्ठाः क्वणन्तु शकुन्तयः
पुनर् इदम् अयं देवो रामः स्वयं वनम् आगतः ॥२४॥

रामः—एहि सखि वासन्ति, नन्व् इतः स्थीयताम्।

वासन्ती—(उपविश्य सास्रम्) महाराज, अपि कुशलं कुमारलक्ष्मणस्य ?

रामः—(अश्रुतिम् अभिनीय)

कर-कमल-वितीर्णैर् अम्बु-नीवार-शष्पैः
तरु-शकुनि-कुरंगान् मैथिली यान् अपुष्यत्।
भवति मम विकारस् तेषु दृष्टेषु कोऽपि
द्रव इव हृदयस्य प्रस्तरोद्भेद-योग्यः[1] ॥२५॥

वासन्ती—महाराज, ननु पृच्छामि—"अपि कुशलं कुमारलक्ष्मणस्य ?"

रामः—(आत्मगतम्) अये, महाराजेति निष्प्रणयम् आमन्त्रण-पदम्। सौमित्रि[2]-मात्रे बाष्प-स्खलिताक्षराः कुशल-प्रश्नः। तथा मन्ये विदित-सीता-वृत्तान्तेयम् इति। (प्रकाशम्)—आम्, कुशलं कुमारस्य।

वासन्ती—(रुदति) अयि देव, किं परं दारुणः खल्व असि !

सीता—सहि वासन्दि, किं तुमं एव्वं-वादिनी होसि ? पिआरुहो क्खु सव्वस्स अज्जउत्तो विसेसदो मह पिअ-सहीए।

[सखि वासन्ति, किं त्वं एवं-वादिनी भवसि ? प्रियार्हः[3] खलु सर्वस्यार्यपुत्रो विशेषतो मम प्रिय-सख्याः।]

Śloka 25—Metre : Mālini (see page......33 ....).
Figure : Yathāsaṃkhyā, as water, rice and hers are offered to trees, birds and deer respectively.
यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः (काव्य. X)

1. प्रस्तरोद्भेद-योग्यः—(समासः) प्रस्तरस्य उद्भेदः

with love tune up their melodious songs.—Here again the King Rāma has returned personally to our forest. (24).

Rāma—Come, friend Vāsantī, be seated this way.

Vāsantī—(*Sitting down*) Great King, how does Prince Lakṣmaṇa do?

Rāma—(*Gesticulating as if he has not heard*)—

Scattering with her lotus-hands, water, rice and grass (respectively) to these trees, birds and dear, Maithilī. *nourished them all; on beholding them, I experience some strange emotion,—as if it is a metled liquid of the heart itself, capable of shattering a rock to pieces,* (25)

Vāsantī—Great King, but am I not asking about the news of the Prince Lakṣaṇa?

Rāma—(*Aside*) Ah! She addresses me "Great King."—Her mode of address is devoid of affection; and only she is enquiring of the news of the son of Sumitrā (Lakṣmaṇa), with her speech interrepted by tears. Therefore, I suppose, she is in the the know of Sītā's affair. (*Aloud*), Oh, the prince is doing excellent.

Vāsantī—(*Cries*)—Ah, king, Why are you so cruel?

Sītā—Friend Vāsantī, why do you speak thus? My lord is worthy of evenybody's love and above all of my dear friend.

तस्मिन् योग्यः यः सः । The reading "*prasravodbheda-* etc." is unacceptabe. The commentator Ghanaśyāma expounds : प्रस्तरस्य पाषाणस्य उद्भेदः (द्रवः) तद् योग्यः—which is inappropriate as the emotion cannot be like the melting of a stone. (cf Kane p. 97.)

2. सौमित्रः—सुमित्रायाः अपत्यं पुमान् सौमित्रिः लक्ष्मणः ।
—a metronyme of Lakṣmaṇa.

3. प्रियार्हः—(समासः) प्रियं अर्हति इति प्रियार्हः ।

वासन्ति—त्वं जीवितं त्वम् असि मे हृदयं द्वितीयं
त्वं कौमुदीर् नयनो अमृतं त्वम् एव ।
इत्यादिभिः प्रिय-शतैर् अनुरुध्य मुग्धां
ताम् एव शान्तम् अथवा किम् इहोत्तरेण ॥२६॥

(इति मूर्च्छति)

तमसा—स्थाने वाक्य-निवृत्तिर् मोहश् च ।

रामः—सखि, समाश्वसिहि, समाश्वसिहि !

वासन्ती—(समाश्वस्य) तत् किम् इदम् अकार्यम् अनुष्ठितं देवेन ।

सीता—सहि, वासन्दि, विरम ! [सखि, वासन्ति, विरम]

रामः—लोको न मृष्यतीति ।

वासन्ती—कस्य हेतोः ?

रामः—स एव जानाति किम् अपि ।

तमसा—चिरात् उपालम्भः ।

---

1. Ślaka 26—Metre : Vasanta-tilaka (see p 11) This verse is a fine example of Bhavabhūtis power of expressing the sentiment of Pothos with a smplicity of unique character.

The verse is again cited by Daśarūpaka (III 15) as an example of Vāk-Keli which consits in the suspension of the speech. (cf. Théatre Indien 114-15). Alaṅkāra-Kaustubha (P. 308) explains it as *Ākṣepa, Figure of Interruption*, as the sentences are cut short by the very person who utters them. Cf. also Mahā. V 62.

Vasantī —"*Thou art my life, thou art my second heart. moonshine for my eyes and embrosia to my body.*" —*With these and hundreds of other affectionate words having cajoled the artless one, it is she that thou art—or else.........what more to say about it?* (26)

(*She faints*).

Tamasā—It is quite oppertunely that she stops speaking and faints.

Rāma—Compose yourself, friend, compose yourself.

Vāsantī—(*Regaining consciousness*)—But why then have your honour comitted such an unworthy act?

Sītā—Friend Vasantī, enough.

Rāma—Because the people would not spare.

Vāsanti—On what ground ?

Rāma—They alone know it.

Tamasā—The reproach comes too late.

Mme. Stchoupak remarks: *that the taste of Bhavabhūti for the technical terms, was so remarkable that that was probably not an accident that the following cue (Vākya-nivrtti) recalled the very exprssion which the rhetoricians had used to define the Vak-Keli (Vākyasya ......vinivartanam......Vāk* "—)

Kaumudīr nayanayor—cf. Mālatī-Mādhava I. 34.

2. कस्य हेतोः—षष्ठी हेतु-प्रयोगे (पा० II. 3. 26.)

The rejoinder of Rāma is ironical here, since he was convinced of Sītā's innocence. Rhetoricians call it: "काकुः आक्षिप्तम् व्यङ्गम" (cf. Kāvya Pr. V 1.) which is indicated by an intonation in the speech.

तमसा—वत्से, साम्प्रतिकम् एवैतत्। कर्तव्यानि खलु दुःखितैर् दुःख-निर्वापणानि।

पूरोत्पाडे तटाकस्य परीवाहः[1] प्रतिक्रिया।
शोक-क्षोभे च हृदयं प्रलापैर् एव धार्यते ॥२९॥

विशेषतो रामभद्रस्य यस्य बहु-प्रकार-कष्टो जीव-लोकः।

इदं विश्वं पाल्यं विधिवद् अभियुक्तेन मनसा
प्रिया-शोको जीवं कुसुमम् इव घर्मो ग्लपयति।
स्वयं कृत्वा त्यागं विलपन-विनोदोऽप्य् असुलभस्
तद् अद्याप्य् उच्छ्वासो भवति ननु लाभो हि रुदितम् ॥३०

रामः—कष्टं भो, कष्टम्!

दलति हृदयं गाढोद्वेगं द्विधा तु न भिद्यते
वहति विकलः कायो मोहं न मुञ्चति चेतनाम्।
ज्वलति तनूम् अन्तर् दाहः करोति न भस्मसात्
प्रहरति विधिर् मर्मच्छेदी न कृन्तति जीवितम् ॥३१॥

सीता—एवं एणोदं। [एवं नु इदम्]

रामः—हे भवन्तः पौर-जानपदाः!.........।

न किल भवतां देव्याः स्थानं गृहे ऽभिमतं ततस्
तृणम् इव वने शून्ये त्यक्ता न चाप्य् अनुशोचिता।
चिर-परिचितास् ते ते भावाः परिद्रवयन्ति माम्
इदम् अशरणैर् अद्यास्माभिः प्रसीदत रुद्यते ॥३२॥

Śloka 29 Metre: Anuṣṭubh

1. परीवाहः—(Etymology)—जलं परिवहति (प्रवृद्धम् उच्छ्वसति यैः मार्गैः) ते परीवाहाः। Grammatical Note:

The upasarga '*pari*' optionally becomes long as it has been indicated by Pāṇini himself:

उपसर्गस्य घञ्य् मनुष्ये बहुलम् (पा० VI. 3. 122)

Tamasā—My child, that is just the time. The afflicted must find relief from their affliction

When a tank is too full, an overflow is a remedy for it; when the sorrow agitates it, the heart sustains itself by lamentations. (29)

This is especially the case of dear Rāma for whom this world is full of all sorts of cares.

All this must be governed with vigilent mind,—the remorse with regard to his beloved is fading his heart away as heat does a flower.........Having repudiated himself, he cannot even seek comfort in his lamentations,—yet he is alive; is not therefore, crying a souce of happiness to him? (30).

Rāma - Ah, misery, misery!

My heart – a prey to the profound emotion, does not split in two; my fainting body is enevlopped in stupour, yet it does not loose consciousness This internal fire inflames my flesh and yet it does not reduce it to ashes. Destiny strikes the vital parts of my soul, yet it does not cut off my life (31)

Sītā —True that it is.

Rama—O, you citizens and country-people!

The sojourn of the queen Sītā *in my house was not desired by you then. Like a blade of grass, she had been abandoned in the desolate forest and no one even shed a drop of tear for her...In front of all those things long familiar to me, I an metled emotionally —Helpless as I am today, pardon me, if I cry.* (32)

Śloka 30 Metre : Śikhariṇī. (See Page 38)

Śloka 31 Metre : Hariṇī. (See Page 28)

The verse 31 occurs in Mal. IX 12; also it is quoted by *Sāhityadarpaṇa* as an example of '*kheda*' tormentation, or exhausion.

वासन्ती—(स्वगतम्) अतिगम्भीरं आपूरणं शोकसागरस्य ! (प्रकाशम्) देव, अतिक्रान्ते धैर्यम् अवलम्ब्यताम् ?

रामः—सखि, किम् उच्यते धैर्यम् इति ?

देव्या शून्यस्य जगतो द्वादशः परिवत्सरः ।
प्रणष्टम् इव नामापि न च रामो न जीवति ॥३३॥

सीता—मोहिदह्मि एदेहिं अज्जउत्त-वअणेहिं ।

[मोहितास्मि एतैर् आर्यपुत्र-वचनैः]

तमसा—एवम् एव, वत्से !

नैताः प्रियतमा वाचः स्नेहार्द्राः शोक-दारुणाः ।
एतास् ता मधुनो धाराः श्चोतन्ति सविषास् त्वयि ॥३४॥

राम—अयि, वासन्ति, मया खलु—

यथा तिरश्चीनम्[1] अलात-शल्यं
प्रत्युप्तम्[2] अन्तः सविषश् च दंशः ।
तथैव तीव्रो हृदि शोक-शंकुर्
मर्माणि कृन्तन्न् अपि किं न सोढः ? ॥३५॥

सीता—एवं ह्मि मंद-भाइणी पुणो वि आआस-आरिणी अज्जउत्तस्स ।

[एवम् अस्मि मन्दभागिनी पुनर् अप्य् आयास-कारिण्य् आर्यपुत्रस्य]

रामः—एवम् अति-निष्कम्प-स्तम्भितान्तःकरणस्यापि मम संस्तुत-तत्-तत्-प्रिय-वस्तु-दर्शनाद् उद्दामोऽयम् आवेशः । तथाहि—

लोलोल्लोल-क्षुभित-करुणोज्जृम्भण-स्तम्भनार्थं[3]
यो यो यत्नः कथम् अपि मया धीयते तं तम् अन्तः ।

Śloka—35. Matre: Upajāti (See Page 18)

1. तिरश्चीनम्—तिर्यच् + ईन ।

2. प्रत्युप्तम्—प्रति + वप् + क्तः । सोढः—सह् + क्तः ।

Sloka 35. Matre: Mandakrānta

Vāsanti –(*Aside*) Unfathomable fulness of an ocean of sorrow ! (*Loudly*). King ! one must uphold one's courage for what has passed.

Rāma—Friend, why to speak of courage ?

In this world devoid of Sitā, *two years has elsaped. Her name has even disappeared, and* Rāma *has not ceased to live.* (33)

Sītā—I am altogether bewildered by these words of my lord.

Tamasā—That is quite so, my child !

These words are not such that one would like them all the more; bathed in tenderness, they are also harsh on account of sorrow ; these are the drops of honey fall on you, mixed with poison. (34)

Rāma—Ah, Vāsanti, have'nt I indeed.—

Like the sharp glowing amber, piercing the anterior of my heart, or like a venomous sting. such is in my heart, or else the sharp shaft of sorrow, which is tearing my vital points,—have'nt I endured it ? (35)

Sitā –Here again the poor unfortunate that I am, I have become the source of trouble to my lord.

Rāma —In this way, although I have checked the least unsteadiness of my heart, yet, at the sight of the things so familiar and so loved, my emotion breaks its bounds. So it is indeed:—

Whatever effort I do, howsoever hard it may be to check the outburst of my sorrow, swelled with a palpilating agitation

---

3. लोलोल्लोल इत्यादि—(समासः)—लोलाः याः उल्लोला यस्य सः लोलोल्लोलः (ऊर्मयः) क्षुभितः यः करुणाः तस्य उज्जम्भणां (वृद्धिः) तस्य स्तम्भनार्थम् । Kane gives the reading.

भित्वा भित्वा प्रसरति बलात् कोऽपि चेतोविकारस्
तोयस्येवाप्रतिहत-रयः सैकतं सेतुम् ओघः ॥३६॥

सीता—एदिणा अज्जउत्तस्स दुव्वार-दारुणारंभेण दुक्ख-संखोएण परिमुसिअ-णिअ-दुक्खं किं वि पमुद्धं मे हिअअं।

[एतेनार्यपुत्रस्य-दुर्वार-दारुणारम्भेण दुःख-संक्षोभेण परिमुषित-निज-दुःखं किम् अपि प्रमुग्धं मे हृदयम्]

वासन्ती—(स्वगतम्) कष्टम् अभ्यापन्नो देवः। तद् अन्यतः क्षिपामि तावत्। (प्रकाशम्) चिर-परिचितान् इदानीं जन-स्थान-भागान् अवलोकनेन मानयतु देवः।

रामः—एवम् अस्तु (उत्थाय परिक्रामति)।

सीता—संदीवण एव्व दुक्खस्स पिअसहीए विणोदणोवाओ इति तक्केमि। [संदीपन एव दुःखस्य प्रियसख्या विनोदोपाय इति तर्कयामि]

वासन्ती—(सकरुणम्) देव, देव !
अस्मिन्न् एव लतागृहे त्वम् अभवस् तन्मार्ग-दत्तेक्षणः
सा हंसैः कृत-कौतुका चिरम् अभूद् गोदावरी-सैकते।
आयान्त्या परिदुर्मनायितम् इव त्वां वीक्ष्य बद्धस् त्वया
कातर्याद्[1] अरविन्द-कुड्मल-निभो मुग्धः प्रणामाञ्जलिः॥३७॥

"वेलोल्लोल—" etc. This is not a happy reading as it is wanting in proper alliteration and the simple repetition which accurs in all the three pādas. Others read करण (meang: अन्तःकरणम्) for करुण which equally bad.

1. Sloka 37. Metre: Sardūla-vikriḍitam. See Page 54)

I do not know what mental franzy just breaks it violently or like a torrent dashing with an irresitible speed dashes through a sandy embankment. (35).

Sītā—To see such an outburst of the sorrow of irresitible violence of my lord, my heart, plundered of its own sorrow, is greatly bewildered.

Vāsanti (*Aside*)—The king is at the hight of his distress. I will, therefore, change the topic (*Aloud*) Let my lord honour, now, these long, familiar regions of Janasthāna by looking at them.

Rāma—Just as you wish. (*He rises up and walks about.*)

Sītā—The device of diverson adopted by my dear friend, I believe, is rather kinding up the sorrow.

Vāsanti—(*Pathetically*) King, King!

It is here, in this creeper-bower that you fixed your eyes on her path, when she, her curiosity being attracted by the swans, was belated on the sandy banks of the Gadāvarī *On her return seeing you a little vexed, she folded, out of timidity, her hands like lotus-buds, and saluted you innocently.* (37.)

This verse has been cited by Daśarūpaka (IV. 54) as an example of Praṇavamāna—an amorous depiction."

Paridurmanāyitm—Past Participle of the denominative verb '*durmanayate*' with *Pari*.

कातर्यम्—कातरस्य भाव: कातर्यम् ।

सीता—दारुणासि वासन्दी, दारुणासि, जा एदेहिं हिअअ-मम्म-सल्ल-संघट्टणेहिं पुणो पुणो वि मं मन्द-भाइणिं अज्जउत्तं अ संदावेसि ।

[दारुणासि वासन्ति, दारुणासि यैर् एतैर् हृदय-मर्म-गूढ-शल्य-संघट्टनैः पुनः पुनर् अपि मां मन्दभागिनीम् आर्यपुत्रं च सन्तापयसि]

रामः—अयि चण्डि ! जानकि ! इतस्ततो दृश्यस इव न चानुकम्पसे ।

हा ! हा ! देवि, स्फुटति हृदयं ध्वंसते देह-बन्धः
शून्यं मन्ये जगद् अविरत-ज्वालम् अन्तर् ज्वलामि ।
सीदन्न् अन्धे तमसि विधुरो मज्जतीवान्तरात्मा
विष्वङ् मोहः स्थगयति कथं मन्द-भाग्यः करोमि ॥३८॥

(इति मूर्च्छति)

सीता—हद्धी, हद्धी, पुणो वि पमूढो अज्जउत्तो ।
[हा धिक्, हा धिक्, पुनर् अपि प्रमूढ आर्यपुत्रः]

वासन्ती—देव, समाश्वसिहि, समाश्वसिहि !

Śloka 38—Metre: Mandakrānta (See Page 46)

Kane regards this verse as masterpiece of Bhavabhūti's example of pathetic sentiments. This varse occurs in Mālatīmādhava IX, 20 with a slight variation. Compare: Mahāviracaritam. V. 22.]

[illegible] मज्जति मनः ।

अविरत-ज्वालम्—(यथा [illegible]) अविरलाः ज्वाला यथा स्युः तथा ([illegible]) ।

The commentator Jagddhara explains the Vyabhi-

Sīta—You are cruel, Vāsantī, you are cruel! While hurling thus the pointed shafts at the most sensible part of the heart, you torture—the luckless that I am, my noble lord.

Rāma—Ah, cruel Jānakī, you seem to be present somewhere, but you do not take pity on me.

Alas! Alas! Queen, my heart breaks; the whol frame of my body is shattered; the universe seems a desert to me; ceaselessly I am consumed by a fire within! Thus Consumed and tormented, my soul seems, as it were, to sink in a pitch darkness, a stupour envelopes me all over ....unfortunate that I am, what shall I do? (38.)
(*He swoons away.*)

Sītā—Alas! Alas! here again my lord has lost consciousness.

Vāsantī—My lord compose yourself compose yourself.

---

cāribhāvas of the sentiment of Pathos. They are:

(१) द्विधा भवति हृदयम् इति व्रीडाः। (२) अवयय-सन्धिः शिथिली भवतीत्य् अस्वस्थता। (३) विश्वं शून्यं मन्ये इति बाह्या-संवेदना निर्वेदः। (४) अविरलज्वालं ज्वलामि इति चिन्ता जनितो दाहः। (५) अन्तरात्मः निरालम्बः सीदन्......अन्धकारे मज्जति इति ग्लानिः। (६) विश्वङ् मोहश् छादयदि इति मोहः। (७) मन्दभाग्योऽहं किं करोमीति दैन्यम्।

सीता—अज्जउत्त, मं मन्दभाइणीं उद्दिसिअ सअल-जीवलोअ-मंगलाधारस्स दे वारं वारं संसइद-जीविअ-दालुणो दसापरिणामो त्ति । हा हदह्मि ! (इति मूर्च्छति)

[आर्यपुत्र, मां मन्दभागिनीम् उद्दिश्य सकल-जीवलोक-मङ्गला-धारस्य ते वारं वारं संशयित-जीवित-दारुणो दशा-परिणाम इति । हा हतास्मि !]

तमसा—वत्से, समाश्वसिहि, समाश्वसिहि ! पुनस् त्वत्पाणि-स्पर्श एव संजीवनोपायो रामभद्रस्य ।

वासन्ती—कथम् अद्यापि नोच्छ्वसिति ! हा प्रियसखि ! सीते ! कासि ? सम्भावयात्मनो जीवितेश्वरम् । (सीता ससम्भ्रमम् उपसृत्य हृदि ललाटे च स्पृशति) ।

वासन्ती—दिष्ट्या ! प्रत्यापन्न-चेतनो रामभद्रः ।

रामः—आलिम्पन्न् अमृत-मयैर् इव प्रलेपैर्
अन्तर् वा बहिर् अपि वा शरीरधातून् ।
संस्पर्शः पुनर् अपि जीवयन्न् अकस्माद्
आनन्दाद् अपर-विधं तनोति मोहम् ॥३६॥

(सानन्दम् उन्मीलिताक्ष एव)—सखि वासन्ति, दिष्ट्या वर्धसे !

वासन्ती—देव, कथम् इव ?

रामः—सखि, किम् अन्यत् ? पुनः प्राप्ता जानकी ।

वासन्ती—अयि देव रामभद्र, का सा ?

रामः—(स्पर्शसुखम् अभिनीय) पश्य, किन्व् इयं पुरतः एव ।

वासन्ती—अयि देव ! किम् इति मर्म-च्छेद-दारुणैर् एभिः प्रलापैः प्रियसखि-विपत्ति-दुःख-दग्धाम् अपि मां पुनर् मन्द-भाग्यां दहसि ?

Śloka 39 – Metre Praharṣiṇī yam (See Page 40)

Sīta—Alas, my noble lord, you who are the adobe benediction of all the living beings, for my sake, you are undergoing this cruel change of condition, which, many a time, is puting your life in danger. Ah, I am so miserable. (*She swoons.*)

Tamasā. Compose yourself, my child, compose yourself, The touch of your hand alone will bring dear Rāma to life.

Vāsantī—Why? He has not come to his senses yet. Ah, Sītā dear friend, where are you? Come to the rescue of the lord of your life!

(Sītā *approaches suddently and touches the heart and forhead of Rāma*)

Vāsantī—Thank God, dear Rāma is coming to himself.

Rāma—*Caressing as though, with embrosial ointment from within as well as from without, the vital elements ef my heart,—her contact once more suddenly reviving, by dint of happiness prolongs in me a torpor of a different nature.* (39.)

(*Closes slighly his eyes out of joy*)

Friend Vāsanti, be congratulated.

Vāsantī—But why Sire?

Rāma—What else? once more I have found Jānakī.

Vāsantī—Oh, king, dear Rāma, where is she?

Rāma—(*Gesticutating enjoyment of touch.*) Look, indeed she is in front of you.

Vāsantī—Ah, my lord, why then with you cruel divagations, which break my heart, are you consuming me, the luckless one, who has already been consumed by the grief of having lost my dear friend'!......

Sarīra-dhātu—Constituent elements of the body. They are generally 7 in nubmer: blood, Merasles, flesh, bones, marrow, veins and semon.

सीता—ओसरिदुं इच्छम्मि । एसो उण चिर-सब्भाव-सोम्म-सीअलेण अज्जउत्त-प्फरिसेण दीह-दारुणं वि झत्ति संदावं हरंतेण वज्जलेवोवणिबद्धो विअ सिज्जंत-णीसह-विपल्हत्थो वेअणसीलो अवसो विअ मे हत्थो ।

[अपसर्पितुम् इच्छामि । एष पुनश् चिर-सद्भाव-सौम्य-शीतलेनार्यपुत्र-स्पर्शेण दीर्घ-दारुणम् अपि झटिति सन्तापं हरता वज्र-लेपोपनिबद्ध इव स्विद्यन्निःसह-पर्यस्तो वेपन-शीलोऽवश इव मे हस्तः]

रामः—सखि ! कुतः प्रलापाः ?

गृहीतो यः पूर्वं परिणय-विधौ कंकण-धरः
चिरं स्वेच्छा स्पर्शैर् अमृत-शिशिरैर् यः परिचितः ।

सीता—अज्जउत्त, सो एव्व दाणिं सि तुमं ।

[आर्यपुत्र, स एव इदानीम् असि त्वम्]

रामः—स एवायं तस्यास् तुहिन-निकरौपम्य-सुभगो
मया लब्धः पाणिर् ललित-लवली-कन्दल-निभः ॥४०॥

(इति गृह्णाति)

सीता—हद्धी, हद्धी ! अज्जउत्त-प्फरिस-मोहिदाए पमादो क्खु मे संवुत्तो ।

[हा धिक् ! हा धिक् ! आर्यपुत्र-स्पर्श-मोहितायाः प्रमादः खलु मे संवृत्तः]

रामः—सखि वासन्ति, आनन्द-निमीलितेन्द्रियः साध्वसेन परवान् अस्मि । तत् त्वम् अपि धारयैनाम् ।

वासन्ती—कष्टम् ! उन्माद एव !

(सीता ससम्भ्रमं हस्तम् आक्षिप्यापसर्पति)

रामः—हा धिक् ! प्रमादः !

Śloka 40. Metre: Śikhariṇī. (See Page 38)
This verse has been cited by Sarasvatī-Kaṇṭha

Sītā – I wish to retire, but—a mark of our long affection, cool and refreshing—this contact of my dear husband suddenly removes my long and cruel suffering, and fastened, as if, by adamentine cement, all perspiring, powerless, paralysed and trembling, my hand seems to lose its control.

Rāma – Friend, why to speak of divagation.

The hand which for the first time was accepted by me and which was adorned with nuptial bracelet at the time of our wedding,—which by voluntary contact cool like embrocia, was long familiar to me.

Sītā—Noble lord, you are the same even now. today ?

Rāma – *It is that very hand which, I am holding, delightful for its resemblance to a copious snowflake like the tender shoot of tremulous* Lavalī *flowers* (40).

(*He Holds it*)

Sītā – Alas ! Alas ! Charmed by the tuoch of my dear lord, I have committed a mistake.

Rāma – Friend, Vāsantī ! my senses are patrified with joy, my emotion is stronger than myself; therefore, you may hold it.

Vāsantī – Alas, that is madness pure and simple. (Sītā *bewildered withdraws her hand, and goes away*) !

Rāma – Ah, what blunder !

---

bharaṇa as an illustration of a Secondary sentiment Śmaraṇa" *Remembrance.*

कर-पल्लवः स तस्याः सहसैव जडो जडात् परिभ्रष्टः ।
परिकम्पिनः प्रकम्पी करान् मम स्विद्यतः स्विद्यन् ॥४१॥

सीता—हद्धी हद्धी! अज्जवि अणावत्थिद-त्थिमिद-मूढ-घूणन्त-णअणो ण पज्जवत्थावेदि अत्ताणं ।

[हा धिक् ! हा धिक् ! अद्यापि अनवस्थित-स्तिमित-घूर्णन्नयनो न पर्यवस्थापयत्य् आत्मानम्]

तमसा—(सस्नेह-कौतुक-स्मित निर्वर्ण्य)

सस्वेद-रोमाञ्चित-कम्पिताङ्गी
जाता प्रिय-स्पर्श-सुखेन वत्सा ।
मरुन्न्-नवाम्भः-प्रविधूत-सिक्ता
कदम्ब-यष्टिः स्फुट-कोरकेव ॥४२॥

सीता—(स्वगतम्) अम्महो ! अवसेन एदेण अत्ताणएण लज्जाविदह्मि भअवदीए तमसाए । किंत्ति किल एसा मण्णिस्सदि एसो दे परिच्चाओ एसो अहिसंगोत्ति ।

[अम्हो ! अवशेनैतेनात्मना लज्जापितास्मि भगवत्या तमसया । किम् इति किलैषः मंस्यत एष ते परित्याग एषोऽभिषङ्ग इति ।

राम -(सर्वतोऽवलोक्य) हा कथं नास्त्य् एव ! नन्व् अकरुणे वैदेहि……

Śloka 41 Metre : – Āryā

Page 42. This verse describes the natural conquences (sattva-vibbāva) which are present with the sentiment of Love (Sṛṅgāra-rasa). They are (ranspiration (sveda), standing of the hair on end (romāñca), and trembling (kampana or Vepana (cf. Mukerjee "Le Rasa" 17.

This verse is the typical example of Bhabhūti's one of the finest similes (Upamā). Here the *body* of Sītā is compared to a *Kodambatwig*, her *trembling* due to mental affliction is compared to the *trembling*

That leaf-like hand of her, like a lifeless (object), has suddenly fallen from my trembling (hand) (41).

Sītā – Alas! Alas! Now even with his looks, at times vocillating, at times fixed, at times agitated, he has not been able to control himself.

Tamasā – (*Looking at her with a smile of tender concern*),

Perspiring and her hair erect on her trembling body, so has became my dear child under the effect of delight caused by her beloved's contact. It appears, as if shaken by the wind and washed by the fresh water, a Kadamba-twig, has suddenly brought forth its buds. (42)

Sītā – (*Aside*) The venerable Tamasā has put me to shame, for I have lost control over myself, what would she think to behold this repudiation, and my attachment!

Rāma – (*Looking around*) Ah, what.

She is no more here, indeed, O pitiless daughter of Videha!

---

of the tree by the wind, *perspiration* to fresh *water* and her *hair on their end* to *buds*. It is said that Kadamba tree blossoms only when the rain-drops fall on it. Then, the sudden blowing of the Kadamba has became proverbial: "Kadamba-koraka-nyāyen"—*maxim of Kadamakorka* is referred to the sudden and simultaneous action or consequences. (Mme. Stchoupak P. 68).

सीता—सच्चं अकरुणाह्मि जा एवंविहं तुमं पेक्खन्ती जीवेमि एव। [सत्यम् अकरुणास्मि यैवंविधं त्वां प्रेक्षमाणा जीवाम्य् एव]

रामः—क्वासि प्रिये ? देवि, प्रसीद, प्रसीद ! न माम् एवंविधं परित्यक्तुम् अर्हसि।

सीता—अयि अज्जउत्त, विवरीदं विअ एदं।

[अयि, आर्यपुत्र, विपरीतम् इवैतत]

वासन्ती—देव प्रसीद, प्रसीद ! स्वेनैव लोकोत्तरेण धैर्येण संस्तम्भयातिभूमिगतविप्रलम्भम् आत्मानम्। कुतोत्र मे प्रियसखी ?

रामः—व्यक्तं नास्त्य् एव। कथम् अन्यथा वासन्त्य् अपि तां पश्येत् ? अपि खलु स्वप्न एष स्यात् ? न चास्मि सुप्तः। कुतो रामस्य निद्रा ? सर्वथा स एवैष भगवान् अनेकवार-परिकल्पना-निर्मितो विप्रलम्भः पुनः पुनर् अनुबध्नाति माम्।

सीता—मए एव्व दारुणाए विप्पलद्धो अज्जउत्तो।

[मयैव दारुणाया: विप्रलब्ध आर्यपुत्रः]

वासन्ती—देव, पश्य, पश्य !

पौलस्त्यस्य जटायुषा विघटितः कार्ष्णायसोऽयं रथस्
ते चैते पुरतः पिशाच-वदनाः कङ्काल-शेषाः खराः।
खड्ग-छिन्न-जटायु-पक्षतिर् इतः सीता चलन्तीं वहन्न्
अन्तर्-व्याकुल-विद्युद् अम्बुद इव द्याम् अभ्युदस्थाद् अरिः ॥४३॥

सीता—(सभयम्) अज्जउत्त ! तादो वावादीअदि अहं वि अवहरिज्जामि। ता परित्ताहि, परित्ताहि ! [आर्यपुत्र ! तातो व्यापाद्यते अहम् अप्य् अपह्रिये। तस्मात् परित्रायस्व परित्रायस्व !]

Śloka 43 – Metre : Śārdūla-Vikrīditam, (See P. 54)

2. कार्ष्णायसः—कृष्णं अयः तस्मात् निर्मितः।

पिशाच-वदनाः—(समासः)—पिशाचानां इव वदनाः येषां ते। "पक्षात् तिः" (पा० V. 2. 25).

Sītā—Pitiless, certainly, I am, for I am still alive to see you in such a plight!

Rāma—Where are you, sweetheart? Be gracious, be gracious! You cannot abandon me in this state.

Sītā—My dear Lord, I think it is contrary to facts.

Vāsantī—King. Be gracious, be gracious, with the firmness which is thine and which is superior to that of the common folk, master your heart with fortitude—the heart of which the bewilderment has crossed all limits.

Rāma Evidently she is not there, or else, should not even Vāsantī see her? Would it be a dream? But I am not asleep. Wherefore, would sleep come to Rāma Verily, it is the same powerful spirit of deception created by the multiplex efforts of my imagination, which haunts me ever and anon.

Sītā - It is by me—the cruel one, that my noble lord has been deceived!

Vāsantī—my lord, look, look.

Here, broken by Jatāyus, is the iron-Car of the son of Paulastya (Rāvaṇa). *In front of us are the demoniac-faced asses reduced to skeletons. Here, snipped by sword are the wings of* Jaṭāyus ; *from this place, dragging the trembling* Sītā, *and resembling a cloud enclosing within a tremulous lightening, rose the enemy in the sky.* (43)

Sītā—(Frightfully). My noble lord, our father succumbs, and myself, I am being carried away. Help, help!

Abhyudasthāt—Aorist of *thā* with *abhi* and *ud*.

This trick of dramaturgy is called a "sandhyaṅga" nameed : "toṭaka"—"an angry speech.

रामः—(सवेगम् उत्थाय) आः ! पाप ! तात-प्राण-सीतापहरिन् ! क्व यासि ?

वासन्ती—अयि देव ! राक्षस-कुल-प्रलय-धूमकेतो ! किम् अद्यापि ते मन्यु-विषयः ?

सीता—अह्मो ! अहं वि उब्भन्तह्मि ।

[अहो ! अहम् अप्य् उदभ्रान्तास्मि]

रामः—अन्य एवायम् अधुना विपर्ययो वर्तते ।

उपायानां भावाद् अविरत-विनोद-व्यतिकरैर्
विमर्दैर् वीराणां जगति जनिताद्भुत-रसः ।
वियोगो मुग्धाक्ष्याः स खलु रिपु-घातावधिर् अभूत्
कथं तूष्णीं सह्यो निरवधिर् अयं त्व् अप्रतिविधः ॥४४॥

सीता—णिरवधित्ति हा हदह्मि मन्दभाइणी !

[निरवधिर् इति हा हतास्मि मन्दभागिनी !]

रामः—हा कष्टम् !

व्यर्थं यत्र कपीन्द्र-सख्यम् अपि मे वीर्यं हरीणां वृथा
प्रज्ञा जाम्बवतोऽपि यत्र न गतिः पुत्रस्य वायोर् अपि ।
मार्गं यत्र न विश्वकर्म-तनयः कर्तुं नलोऽपि क्षमः
सौमित्रेर् अपि पत्रिणाम् अविषये तत्र प्रिये क्वासि मे ? ॥४५

सीता—बहुमणाविदह्मि तं पुव्वविरहं ।

[बहुमानितास्मि तं पूर्व-विरहम्]

Śloka **44**. Metre :—Śikhariṇī. (See Page 38)

This verse contains *adbhuta-rasa* (**Sentiment of wonderment**), one of the main Rasas explained by the rhetoricians. A light is also thrown upon the previous work of the poet namely the Mahāvīracarita in which the sentiments *Vīra* and *Adbhuta* dominates throughout the work. (Mme Stchoupak P. 70 cf. Mv. I. 6. and Tod. Mall Notes 219.)

Rāms—(*Rising with headlong haste*). Ah, villain, ravisher of the life of my father and my Sī ā ! where dost thou go ?

Vāsantī—Oh King, Fire that you are of the race of the Rākṣasas, what is then the object of your wrath ?

Sītā—Ah, I am completely bewildered !

Rāma—Quite strange is the adversity which is befalling us.

There had been then the means to act. and the constant combination of the diversions, the murderous assaults of the heroes produced in this world, a sentiment of extreme wonderment; consequently, my separation from my fawneyed beloved ended in the destruction of the enemy...... But how to endure silently this one, which is endless and irremediable ? (44)

Sītā—" Endless " he says.........Ah, poor luckless that I am, I am lost.

Rāma—Ah, misery !...

Where even the friendship of the Prince of the apes and the volour of the monkeys is useless to me; in vain where is the wisdom of Jāmbavant ; *where the son of the Wind* (Hanumān) *himself would be without resource and the son of* Viśvakarman, and *Nala himself would,be powerless to track a path ; where the arrows of the son of Sumitrā would be without aim,my beloved where are you, for me ?* (45)

Sītā—This makes me appreciate the former separation.

Śloka 45. Metre : -Sārdūla-Vikrīḍitam (See P. 54)
This verse has been cited by Sarasvatī-Kaṇṭhābharaṇa as an example of " Viṣāda " a *despair* as a secondary sentiment.

Kapīndra—Sugrīva, son of the Wind, Hanumān.

Mārgam ..Viśvakarma-tanayam—**Allusion** is to the bridge constructed by Nala over the sea, in order to let the army of Rāma to reach Laṅkā.

रामः—सखि वासन्ति! दुखायैव सुहृदाम् इदानीम् रामस्य दर्शनम्। कियच् चिरं त्वां रोदियिष्यामि। तत् अनुजानीहि मां गमनाय।

सीता—(सोद्वेग-मोहं तमसाम् आश्लिष्य) भअवदि तमसे! कहं गच्छदि एव अज्जउत्तो ?

[भगवति तमसे! कथं गच्छतीदानीम आर्यपुत्रः ?]

(इति मूर्च्छति)

तमसा—वत्से! समाश्वसिहि, समाश्वसिहि! नन्व् आवाम् आयुष्मतोः कुशलवयोर् वर्ष-वर्धन-मंगलानि संपादयितुं भागिरथी-पदन्तिकम् एव गच्छावः।

सीता—भअवदि, पसीद! खणमेत्तं वि दाव दुल्लह-दंसणं जणं पेक्खामि।

[भगवति प्रसीद। क्षणमात्रम् अपि तावत् दुर्लभदर्शनं जनं प्रेक्षे।

रामः—अस्ति चेदानीम् अश्वमेधाय सहधर्म-चारिणी मे।

सीता—(सोत्कम्पम्) अज्जउत्त का ? [आर्यपुत्र का ?]

रामः—हिरण्यमयी सीता-प्रतिकृतिः।

सीता—(सोच्छ्वाससास्रम्) अज्जउत्तो दाणिं सि तुमम्। अह्महे! उक्खाणिदं दाणिं मे परिच्चाअ-लज्जा-सल्लं अज्जउत्तेण।

[आर्यपुत्र इदानीम् असि त्वम्। अहो, उत्खातम् इदानीम् मे परित्याग-लज्जा-शल्यम् आर्यपुत्रेण]

रामः—तत्रापि तावत् वाष्प-दिग्धं चक्षुर् विनोदयामि।

सीता—धण्णा खु सा जा एव्वं अज्जउत्तेण बहुमण्णीअदि, जा अ अज्जउत्तं विणोदयन्दी आसा-णिबन्धणं जादा जीअ-लोअस्य।

[धन्या खलु सा या एवम् आर्यपुत्रेण बहु मन्यते, या चार्यपुत्रं विनोद-यन्त्य् आशा-निबन्धनं जाता जीवलोकस्य]

Rāma—Friend Vāsantī, the sight of Rāma serves now only to inflict pain to his friends. How long shall I make you weep? Allow me now to depart.

Sītā—(*Infatuated with emotion, leaning on* Tamasā) Venerable Tamasā, my lord is departing presently? (*She swoons*).

Tamasā - My child, compose yourself, compose yourself, We have also to present ourselves to the revered Bhāgīrathī in order to perform the propicious ceremony at the occasion of the anniversary of Kuśa and Lava—may they live long!

Sītā—Have mercy revered lady, Let me behold, even for a while, him, who is difficult to be seen!

Rāma – I have now someone to be participated with me in the rites of Aśvamedha.

Sītā—(*With a start*)—Who, my noble lord?

Rāma – A golden effigy of Sītā.

Sītā—(*Heaving a sigh of relief, with tears*)—my noble lord, you are indeed the same. Ah, my noble lord has just plucked out of me the dart of shame of my repudiation!

Rāma—It is near her that I am going to feast my eyes bedecked with tears.

Sītā—Blessed is that (image) whom my noble lord esteems so highly—she who, by comforting him has in reality become a link of hope for the world of the living beings!

तमसा—(सस्मित-स्नेहास्रम् परिष्वज्य) अयि वत्से ! एवमात्मा स्तूयते ।

सीता—(सलज्जम् अधोमुखी स्वगतम्) परिहसिदह्मि भअवदीए ।

[परिहसितास्मि भगवत्या]

वासन्ती—महान् अयं व्यतिकरोऽस्माकं प्रसादः । गमनं पुनर् यथा कार्यहानिर् न भवति तथास्तु ।

सीता—पडिऊला दाणिं मे वासन्दी संवुत्ता ।

[प्रतिकूलेदानीम् मे वासन्ती संवृत्ता]

तमसा—वत्से ! एहि, गच्छावः ।

सीता—(सकष्टम्) एवं करह्म ।

[एवं करिष्यावः]

तमसा—कथं वा गम्यते ? यस्यास्तव—

प्रत्युप्तस्येव दयिते तृष्णा-दीर्घस्य-चक्षुषः ।
मर्म-च्छेदपरैर् यत्नैर् आकर्षो न समाप्यते ॥४६॥

सीता—णमो णमो अपुव्व-पुण्ण-जनिद-दंसणाणं अज्जउत्त-चलणकमलाणाम् ।

[नमो नमोऽपूर्व-पुण्य-जनित-दर्शनाभ्याम् आर्यपुत्र-चरण-कमलाभ्याम्]

(इति मूर्च्छति)

तमसा—वत्से समाश्वसिहि ! समाश्वसिहि !

सीता—(समाश्वस्य) कियच्चिरं वा मेहन्तरेण पुण्णिमा-चन्दस्स दंसणम् ।

[कियच् चिरं वा मेघान्तरेण पूर्णिमा-चन्द्रस्य दर्शनम्]

Śloka 46. Metre :—Anuṣṭubh.

Pratyuptam—A term of jewellery. Inlaying of precious stones. *Inlaid, fixed.*

Tamasā—(*Embracing her with a tender smile and tears in her eyes*)—In this way you are flattering yourself.

Sītā—(*Lowering her head in coufusion—Aside*). The venerable cuts a joke on me.

Vāsantī—This encounter has been a great favour to me ; but as far your departure, we must act in such a way that there should be no omission towards our duty.

Sītā—Well, Vāsantī has now turned against me.

Tamasā—Come my child, let us depart.

Sītā—(*With distress*) That must be done.

Tamasā—

How to go away? Fixed as if, on the beloved, your eyes, being lengthened by the longing, inspite of the heart-rending effects, are not checked. (46)

Sītā—I bow repeatedly to a couple of lotus-feet of my lord, whose sight is obtained through unprecedented merits. (*She swoons*).

Tamasā—My child! compose yourself!

Sītā—(*Regaining consciousness*). How long the full moon is visible across the clouds.

तमसा—अहो संविधानकम् ।
एको रसः करुण[1] एव निमित्त-भेदाद्
भिन्नः पृथक् पृथग् इवाश्रयते विवर्तान् ।
आवर्त-बुद्बुद-तरङ्गमयान् विकारान्
अम्भो यथा सलिलम् एव तु तत् समग्रम् ।।४७।।

Śloka 47.—**Metre** :—Vasanta-tilaka (See P. 10).

1. Karuṇa rasaḥ—Sentiment of Pathos. It is this sentiment which is a touch-stone of excellence in a drama. The other sentiments *viz.*, 'vīra and śṛṅgāra' are only '*developments*' or '*manifestations*' (*vivarta*).

Figure—Nidarśanā. In Vedanta philosophy the unity of the matter under different forms is greatly employed metaphorically. Even the metaphor of water (Samudra—*Sea*) has been used by Shaṅkara in his commentary on Vedānta-Sūtra. (II. 1. 13) : the foam, waves and bubbles etc., (Phena-vīci-taraṅga-budbudāḥ) are different forms (vikāras) of the sea ; they are not different from the water. Similarly, the pathetic sentiment is the principal sentiment of this drama, all others being subservient to 'karuṇa' alone.

Rasa—sentiment. There are 8 sentiments.

शृङ्गार, हास्य, रौद्र, वीर, भयानक, बीभत्स, अद्भुत, and शान्त ।

Definition of Rasa :—

विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा ।

रसतामेति इत्यादि स्थायिभावः सचेतसाम् ।। साहित्यदर्पण III

Tamasā—What a chain of events !

This sentiment of pity, though diversified by various causes, seems, turn by turn, to take distinct developments: whirlpool, bubbles or waves,—The water assumes various forms, but all this is, nevertheless, a water only. (47)

When रतिः—Love and the like, the permanent moods in a composition are developped with विभाव, अनुभाव and सञ्चारिभाव, the Rasa is produced. There are 8 sthāyī-bhāvas *secondary sentiments* corresponding to each of the Rasa. They are : रतिः, हासः, शोक, क्रोधः, उत्साहः, भयं, जुगुप्सा and विस्मयः, The Vibhāvas are the causes of the sthāyi-bhāvas. Vibhāvas again are of two kinds. आलम्बन-विभाव and उद्दीपन-विभाव Women for men and men for women are the ālambana-vibhāva, because they produce sthāyibhava—*the rati*. Rising of the moon, spring, flowers are uddīpana-vibhāvas, because they kindle *rati* (love). Under anubhāvas are included 7 Sāttvika-bhāvas *viz*, स्वेद. रोमाञ्च, स्वरभंगः, वेपथुः, वैवर्ण्यं, अश्रुः, प्रलयः . Vyabhicāri-bhāvas produce Sthāyi-bhāvas (*effects of love*). They are not permanent. They disappear like the different forms of ocean (froth, waves, bubbles etc). They are 33 in numbers.

(१) निर्वेदः (२) आवेगः (३) दैन्यं (४) श्रमः (५) मदः (६) जड़ता, (७) औग्र्यं (८) मोहः (९) विबोधः (१०) स्वप्नः (११) अपस्मारः (१२) गर्वः (१३) मरणम् (१४) अलसता, (१५) अमर्ष (१६) निद्रा (१७) अवहित्था, (१८) औत्सुक्यम् (१९) उन्मादः

रामः—वामनराज ! इतः इतः ! (सर्वे उत्तिष्ठन्ति)

तमसा-वासन्त्यौ । (सीता-रामौ प्रति)

अवनिर् अमर-सिन्धु[1] : सार्धम् अस्मद्-विधाभिः
स च कुल-पतिर्[2] आद्यश् छन्दसां यः प्रयोक्ता ।
स च मुनिर् अनुयातारुन्धतीको वसिष्ठः
त्वयि वितरतु भद्रं भूयसे लङ्गलाय ॥४८॥

(इति निष्क्रान्ताः सर्वे)

इति छाया[3] नाम तृतीयोऽङ्कः

---

(२०) शङ्का (२१) स्मृति-व्याधिः (२२) मति-व्याधिः (२३) व्याधिः (२४) संत्रासः (२५) लज्जा (२६) हर्षः (२७) असूया (२८) विषादः (२९) धृतिः (३०) चपलता (३१) ग्लानिः (३२) चिन्ता, (३३) वितर्कः ।

In this drama, therefore, Karuṇā is the principle sentiment. Various places pointed out are the Sāttvika-bhāvas and Vyabhicārī-bhāvas. Sitā and Rāma are the Ālamban-vibhāvas to each other. The sight of pañcavaṭī, Janasthāna and the other reminiscences are the uddīpana-vibhāvas. (See also Introduction).

Sloka 48.—Metre : Mālinī.

1. **Amara-sindhu**—The river Ganges.

Rāma—O the best of the aeriel cars! This way, this way! (*All rise*).

Tamasā—(*Addressing respectively to* Sītā *and* Rāma)

May the Earth and the Divine River, together with dieties of our kind and that of the chief of the family, who was the best artisan of the metres, and the sage Vasiṣṭha *accompanied by* Arundhatī—*all bestow upon you, their benedictions for the great prosperity.* (48).

(*Exeunt all*)

End of III Act called "The Apparition."

---

2. कुलपतिः—मुनीनां दश-साहस्रं योऽन्नदानादि पोषणात् ।
अध्यापयति विप्रर्षिर् असौ कुलपतिः स्मृतः ॥

Here the commentator take 'Kula-pati' as the Sun. But according to Mme. Stchoupak, it could be the Vālmiki himself (cf. II 5/6 : ādyaḥ kavir asi and VII 14) : This verse makes a rejoinder to the action called 'ākṣepa' (Théatre Indien, 47)—an allusion to the catastophy which will have a happy ending through the kindness of the personages mentioned in the verse.

3. **Chāyā nāma**—this act is named as Chāyā, as Sītā was present throughout in the form of an apparition. This boon of invisibility was rendered to her through the gift of Bhāgīrathī (*The Ganges*).

चतुर्थो अङ्कः

—::—

(ततः प्रविशतस् तापसौ)

एकः—सौधातके ! दृश्यताम् अद्य भूयिष्ठ-सन्निधापितातिथि-जनस्य समाधिकारम्भ-रमणीयता भगवतो वाल्मीकेर् आश्रम-पदस्य तथाहि—

नीवारौदन-मण्डम् उष्ण-मधुरं सद्यः-प्रसूत-प्रिया-
पीताद् अभ्यधिकं तपोवन-मृगः पर्याप्तम् आचामति।
गन्धेन स्फुरता मनाग् अनुसृतो भक्तस्य सर्पिष्मतः
कर्कन्धू-फल-मिश्र-शाक-पचनामोदः[3] परिस्तीर्यते[4] ॥१॥

सौधातकिः[1]—साअदं अणज्झाअ-कारणं सविशेष-भूदं अज्ज जिण्ण-कुच्छाणं।

[स्वागतम् अनध्याय-कारणं सविशेष-भूतं जीर्ण-कूर्चानाम्[2]]

प्रथमः—(विहस्य) अपूर्वः कोऽपि ते बहु-मान-हेतुर् गुरुषु सौधातके ।

Act IV—*Time and Situation*: Hermitage of Vālmiki. The incidents of this Scene are just after those of the Act IV. The arrival of the mothers of Rama to Vālmīki's hermitage at the end of 12 years of *Sattra* of Ṛṣyaśṛṅga.

1. सौधातकिः—सुधातुः गोत्रापत्यं पुमान् इति सुधातु+अक्+इञ्। The word occurs in the Vārtikas on Pāṇini (IV. I. 97) in which this patronyme is derived from sudhātṛ.

Śloka 1.—Metre : Śardūla-vikrīḍitam (See Page 54).

ACT IV.

(*Enter a couple of Ascetic*).

Fist Ascetic—Saudhātaki, look! These number of guests who have just arrived and the extraordinary prepartions made for their reception, with which this hermitage of venerable Vālmīki has become pleasant to look at! In fact:

The foamy beverage of rice is warm and sweet and the deer of the hermitage sips it to its fill—that which is left over and is more than what has been drunk by its mate cubbed recently Slightly mixed with piquant perfune of grilled in Ghee, *the odour of the vegitable-jujube broth is spread all over.* (1).

Savdhātaki—welcome are in particular the elderly folk with their bent eye-brows, thanks to whom we have got this holiday.

Fist Ascetic—(*Laughing*) Strange is the cause of your respect for the elders, Saudhātaki!

जीर्ण-कूर्चानाम्—(समासः)—जीर्णं कूर्चं (श्मश्रुः) येषां ते तेषाम् ।

कर्कन्धू—इत्यादि (समासः)—कर्कन्धूफलैः बदरैः मिश्रः यः शाकः तस्य पचनं तस्य आमोदः ।

Paristīryate—Passive of pari + √stṛ *to be spread.*

सौधातकिः—भो दण्डाअण ! किंणाम-हेओ दाणिं एसो महन्तस्स इत्थिआ-सत्थस्स धुरंधरो अज्ज अदिही आअदो ?

[भो दण्डायन ! किंनाम-धेय इदानीम् एष महतः स्त्री-सार्थस्य धुरन्धरोऽद्यातिथिर् आगतः]

दण्डायनः—धिक् प्रहसनम् ! नन्व् अयम् ऋष्यशृङ्गाश्रमाद् अरुन्धती-पुरस्कृतान् महाराज-दशरथस्य दारान् अधिष्ठाय भगवान् वसिष्ठः प्राप्तः । तत् किम् प्रलपसि ?

सौधातकिः—हुं वसिट्ठो ! [हुं वसिष्ठः !]

दण्डायनः—अथ किम् ।

सौधातकिः—मए उण जाणिदं वग्घो विओ वा एसोत्ति ।

[मया पुनर् ज्ञातं व्याघ्रो वृको वैष इति]

दण्डायनः—आः किम् उक्तं भवति !

सौधातकिः—जेण परावडिदेण एव्व सा वराई कविला-कल्लाणी मडमडाइआ ।

[येन परापतितेनैव सा वराकी कपिला कल्याणी मडमडायिता]

दण्डायनः—समांसो मधुपर्क इत्य् आम्नायं बहुमन्यमानाः श्रोत्रियायाभ्यागताय वत्सतरीं महोक्षं वा महाजं वा निर्वपन्ति गृह-मेधिनः । तं हि धर्मं धर्म-सूत्रकाराः समामनन्ति ।

सौधातकिः—भो ! णिग्गिहीदोसि । [भो ! निगृहीतोऽसि]

दण्डायनः—कथमिव ?

महोक्षः—(समासः) महाँश्चासौ उक्षा च महोक्षः ।

महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत् । (याज्ञ. १-११०)

According to the rule of Pāṇini (V. 4. 77,) mahat+ ukṣan becomes ukṣa.

Saudh—Eh ! Daṇḍāyana, what is the name of the guest who has just arrived today, roping along a big caravan of women-folk?

Daṇḍ—Shame to you for joke ! From the hermitage of Ṛṣyaśṛṅga, accompanied by the wives of the great king Daśaratha headed by Arundhatī, it is the venerable Viśvāmitra who has just arrived. What makes you rave like that ?

Saudh—Hum, Vasiṣṭha ....?.

Daṇḍ—why, yes.

Saudh—But I thought it was a tiger or wolf.

Daṇḍ—No sooner he arrived than he gluttonously crunched the reddish heifer.

Daṇḍ—well, Madhuparka (*i.e. offerings of hospitality*) admits of meat ; that is why, respectful to the sacred tradition, the house-holders offer the reverd Brāhmaṇā-guest a heifer, a bull or ram, for this duty has been prescribed by the authors of the Dharma-Śūtra.

Saudh—Oh, you are caught.

Daṇḍ—How so?

गृह-मेधिनः -गृहैः (दारैः) मधन्ते (सङ्गच्छन्ते) इति ।

Who observe the rits dometic (*medha*) (Stchoupak)

Dharma Sūtra—concise aphorism pertainning to the duties of the four castes distinguished as the Dharma-Sūtra—treatise on Law—which are made in verse. The duties of the rites of hospitality are described in the text of the rituel called the Srauta-sūtra and the domestic rites called Gṛhya-sūtra.

सौधातकिः—जेण आअदेसु वसिट्ठ-मिस्सेषु वच्छदरी विस-सिदा। अज्ज एव पच्चाअदस्स राएसिणो जणअस्स भअवदा वम्मीइणा दहिमहूहिं एव णिव्वत्तिदो महुवक्को। वच्छतरी उण विसज्जिदा। [येनागतेषु वसिष्ठ-मिश्रेषु वत्सतरी विशसिता। अद्यैव प्रत्या-गतस्य राजर्षेर् जनकस्य भगवता वाल्मीकिना दधि-मधुभ्याम् एव निर्वर्तितो मधुपर्कः वत्सतरी पुनर् विसर्जिता]

दण्डायनः—अनिवृत्त-मासानाम् एवं कल्पम् ऋषयो मन्यन्ते। निवृत्तमांसस् तु तत्रभवान् जनकः।

सौधातकिः—किं णिमित्तम् [किम् निमित्तम्]

दण्डायनः—यद् देव्याः सीतायास् तादृशं दैव-दुर्विपाकम् उपश्रुत्य वैखानसः संवृत्तः। तथास्य कतिपये संवत्सराश् चन्द्रद्वीप-तपोवने तपस् तप्यमानस्य।

सौधातकिः—तदो किंति आअदो ? [ततः किम् इत्य् आगतः?]

दण्डायनः—चिरंतन-प्रिय-सुहृदं भगवन्तं प्राचेतसं द्रष्टुम्।

सौधातकिः—अवि अज्ज संबन्धिणीहिं समं संवुत्तं से दंसणं ण वेत्ति। [अप्य् अद्य सम्बन्धनीभिः समं संवृत्तम् अस्य दर्शनं न वेति]

दण्डायनः—संप्रत्य् एव भगवता वसिष्ठेन देव्याः कौसल्यायाः सकाशं भगवत्य् अरुन्धती प्रहिता। यत् स्वयम् उपेत्य वैदेहो द्रष्टव्य इति।

सौधातकिः—जह एदे त्थविरा परप्परं मिलिदा तह अम्हे वि वडुहिं सह मिलिअ अणज्झाअ-महुस्सवं खेलन्तो संभवेह्म।
[यथैते स्थविराः परस्परं मिलितास् तथावाम् अपि वटुभिः सह मिलि-त्वानध्यायमहोत्सवं खेलन्तौ सम्भावयावः] (इति परिक्रामतः)

दण्डायनः—तद् अयं ब्रह्मवादी[1] पुराण-राजर्षिर् जनकः प्राचेतस-वसिष्ठाव् उपास्य संप्रत्य् आश्रमस्य बहिर् वृक्ष-मूलम् अधितिष्ठति। य एष—

Saudh—For heifer was only killed at the arrival of the venerable Vasiṣṭha—Now, today when the royal sage Janaka has arrived, the venerable Vālmīki offered Madhurparka consisting only of curds and honey. The heifer-sacrifice has been given up.

Daṇḍ—The sages have prescribed this form of sacrifice for non-vegitarians and the honourable Janaka is certainly a non-vegitarian.

Saudh—How so ?

Daṇḍ—Because having learnt the dreadful irony of Fate of the Queen Sītā, he became an anchorite. Thus he passed several years practising penance in the hermitage of Candra-dvīpa.

Saud—Why then has he arrived here ?

Daṇḍ—To see the venrable Vālmīki—his dear old friend.

Saduh—Has he had any appointment with his Kinsmen or not?

Daṇḍ—The venerable Vasiṣṭha has just now sent the venerable Arundhatī to go to the presence of the Queen Kauśalyā to tell her to go personally to see the King of Videha.

Saudh—Since these people have met one another, we (two) are also going to meet the other lads to celebrate amongst us, with play, the great festivity of this vacation. (*They move about.*)

Daṇḍ—Here is Janaka, the interprettor of the Sacred Texts, the ancient Royal Sage. After having paid his homages to Vālmīki and Vasiṣṭha, he is now seated under the foot of tree out-side the hermitage. Who...........

---

1. Brahm vādin—The King Janaka of Videha appears in the Bṛ Ār. Up. where he gets the doctrine of the Ātman revealed by Yajñavalkya. The Indian tradtion has confused the various kings of the dynasty in one only (Mme. Stchoupak P. 77 n.)

हृदि नित्यानुषक्तेन[1] सीता-शोकेन तप्यते।
अन्तः-प्रसृप्त-दहनो[2] जरन्न् इव वनस्पतिः ॥२॥

(इति निष्क्रान्तौ)

मिश्र-विष्कम्भकः[3]

(ततः प्रविशति जनकः)

जनकः—अपत्ये यत् तादृग् दुरितम् अभवत् तेन महता
विषक्तस् तीव्रेण व्रणित-हृदयेन व्यथयता।
पटुर् धारावाही नव इव चिरेणापि हि न मे,
निकृन्तन् मर्माणि क्रकच इव मन्युर् विरमति ॥३॥

कष्टम् एवं नाम जरया दुःखेन च दुरासदेन भूयः पराक[5]-सांतपन-[6] प्रभृतिभिस् तपोभिर् आत्त-रस-धातुर्[7] अनवष्टम्भो नाद्यापि मम दग्ध-देहः पतति। अन्ध-तामिस्रा[8] ह्य् असूर्या नाम ते लोकास् तेभ्यः प्रतिविधीयन्ते य आत्म-घातिन इत्य् एवम् ऋषयो मन्यन्ते। अनेक-

---

Śloka 2—Meter: Anuṣṭubh.

अनुषक्त—अनु+सञ्ज्+क्तः (कर्मणि कर्तरि वा)।

अन्तः-प्रसृप्त-दहनः—अन्ते प्रसृप्तः दहनः (अग्निः) यस्मिन्।

Compare: Rāmāyaṇa II 85, 17 with reference to Bharata:

1. अन्तर्-दाहेन दहनः सन्तपयति राघवम्।
2. वन-दाहाग्नि-सन्तप्तं गूढोऽग्निर् इव पादपम् ॥

3. Miśra-viṣkambhaka—This is also called Saṃkīrṇa-Viṣkambhaka:—An interlude played by middling or inferior personae speaking Prākṛt (*Théatre Indien 59.*) Kane remarks: "this is perhaps the finest Viśkambhaka in the drama. Pathos has been carried to the highest pitch in the preceding Act. The tansion is here relieved by the dialogue and bright similes by the two hermit-boys." (*Kane 123. n.*)

Tormented at heart by the grief for Sitā, *he is being consumed like a big worn-out tree, with a fire kindling within.* (2).

(*Exuent both*)

End of the Mixed-Intertude.

(*Enter Janaka*).

Janaka – *Such a bad-luck has befallen my child—so terrible so cruel and so heart-rending that I have an ulcer in my heart. Poignant, continuous like a stream, and new, as though long standing, it cuts like a saw, my vitals; the sorrow it has engendered has no end.* (3).

Alsa ! In this way, with old age and unendurble grief, beside, the penances like Parāka and Sāntapana *fasts and anstere practice*) have drained out the essence from its vital elements my accursed body, deprived of support, does not succumb : " Full of pitch darkness Sun-less worlds are assigned to those who commit suicide " thus think the sages.

Śloka 3—Metre : Śikhariṇī. (See P.........)

5. पराकः—द्वादशाहोपवासेन पराकः परिकीर्तितः। (या० III)

A Kṛcchra penance of 12 day's of fast.

Another kṛcchra penance.

6. सान्तपन—गोमूत्रं गोमयं क्षीरं दधि सर्पि कुशोदकम्।

एक-रात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम् ॥ (मनु XI 212)

7. आत्त-रस-धातुः—आत्तः—रस-धातुः यस्य। आत्तः—

Passive Past Participle of ā + $\sqrt{}$ dā.

8. Andhatamisra by asūryā nāma te lokāḥ—There

संवत्सरातिक्रमेऽपि प्रतिक्षण-परिभावना-स्पष्ट-निर्भासः प्रत्यग्र-दारुण इव न मे दुःख-संवेगः प्रशाम्यति । अयि मातर[1]! देव-यजन-संभवे ! सीते ! ईदृशस् ते निर्माणभागः परिणतो येन लज्जया स्वच्छन्दम् आक्रन्दितुम् अपि न शक्यते । हा पुत्रि !

अनियत-रुदित-स्मितं विराजत्
कतिपय-कोमल-दन्त-कुडमलाग्रम्[2] ।
वदन-कमलकं शिशोः स्मरामि,
स्खलद्-असमञ्जस-मञ्जु-जल्पितं[3] ते ॥४॥

---

is some difficulty of interpretation of the passage Kane takes 'andha-tāmisra' as a particular kind of hell, on the authority of a commentator on Amarakosa. Others take it as meaning "having pitch darkness.". अन्धं तमिस्र (तिमिरं) येषु According to Kane those who explain 'andha-tāmisra' as adj. qualifying 'lokāḥ' say that instead of "asūryāḥ" they should read 'asuryāḥ' (*fit for or belonging to Asuras*') as otherwise "asūryāḥ" would be superfluous when the worlds are said to be full of blinding darkness." But our contention is quite different. In most of the (cf. *Aśa.* Up. 3.) the reading is

असूर्या नाम ते लोकाः अन्धेन तमसा वृताः ।
ताँस् ते प्रत्यभिगच्छन्ति ये के चात्मनो जनाः ॥

cf. also Bāla Rāmāyaṇa II 32. It is not the word 'asuryāḥ' or 'asūryāḥ' which has provided embiguity, for the sun-less worlds are the only worlds which can be envelopped in darkness. The adjective 'asūryāḥ' is not superfluously used there. But the 'andha-tāmisra' hell is not testified by all the Iśopaniṣad. The phrase is 'andhena tamasā vṛtāh"—*shrouded in pitch darkness* can, therefore, be the appropriate sense here.

Many years have passed, yet the constant meditation our of all times, in its comple purity and poignant cruelty their always reveal a new pitch of sorrow death does not abate O! mother my Sītā—born out of the divine place of sacrifice, such was the irony of your Fate which has developed, for shame of which we cannot even cry to our satisfaction. Ah, my daughter......

The unrestricted crying or smiling which graced certain points of your soft bud-like teeth,—I remember your child-face resembling a lotus with its lisping prattle which though indistinct was sweet. (4)

---

1. **Mātar**—Janaka calls Sītā 'mātar' which is significant only of the affectionate respect for her as mother of her sons. (Cf Bāl. IV, 42 where he sage Satānanda also calls her 'mātar Maithili')

Sloka 4 Metre : Puspitāgrā (See Act III, 18

Figure—Pariṇāma—where the proper action to the object in question *i.e., vadna* is transported to the figured representation *i. e., kadamba* (Cf. sāhitya. Dar X 50).

1. विषयात्मतयारोप्ये प्रकृतार्थोपयोगिनि परिणामो ···भवेत् ।

2 विराजत् इत्यादि (समासः)—विराजन्ति कतिपयानि कोमलानि दन्त-कुड्मलाग्राणि (दन्ता एव कुड्मलाः तेषां अग्राणि)

3. स्खलद् इत्यादि (समासः) स्खलत् असमञ्जसं मञ्जु (सुन्दरं जल्पितं यस्मिन् ।

This idea may be compared to a passage in Śakuntalā VII

अलक्ष्य-दन्त-मुकुलान् अनिमित्त-हासैर्
अव्यक्त-वर्ण-रमणीय-वचः प्रवृत्तीन् ।
अङ्काश्रय-प्रणयिनस् तनयान् वहन्तो
धन्यास तद्-अङ्ग-रजसा मलिनी भवन्ति ॥

Kane remarks that the idea of Bhavabhuti is perhaps happier than that of Kālidāsa in the cohice of metre and the alliteration Anuprāsa (p. 125).

भगवति वसुंधरे ! सत्यम् अतिदृढासि—

त्वं वह्निर् मुनयो वसिष्ठ-गृहिणी गङ्गा च यस्या विदुर्
माहात्म्यं यदि वा रघोः कुल-गुरुर् देवः स्वयं भास्करः ।
विद्यां वाग् इव याम् असूत भवती तद्वत् तु या दैवतं
तस्यास् त्वद् दुहितुस् तथा-विशसनं किं दारुणेऽमृष्यथाः ॥५॥

(नेपथ्ये) इत इतो भगवती-महादेव्यौ ।

जनकः—(दृष्ट्वा) अये ! गृष्टिनोपदिश्यमानमार्गा भगवत्य् अरुन्धती । (उत्थाय) कां पुनर् महादेवीत्य् आह ? (निरूप्य) हा ! हा ! कथम् इयं महाराज-दशरथस्य धर्मदारा प्रियसखी मे कौसल्या । क एतां प्रत्येति सैवेयम् इति ।

आसीद् इयं दशरथस्य गृहे यथा श्रीः,
श्रीर् एव वा किम् उपमान-पदेन सैषा ।
कष्टं ! बतान्यद् इव दैव-वशेन जाता,
दुःखात्मकं किम् अपि भूतम् अहो विपाकः ! ॥६॥

अयम् अपरः पापो दशाविपर्यासः ।

य एव मे जनः पूर्वम् आसीन् मूर्तो महोत्सवः ।
क्षते क्षारम् इवासह्यं जातं तस्यैव दर्शनम् ॥७॥

(ततः प्रविशत्य् अरुन्धती कौसल्या कञ्चुकी च)

अरुन्धती—ननु ब्रवीमि द्रष्टव्यः स्वयम् उपेत्यैव वैदेह इत्य् एव वः कुल-गुरोर् आदेशः । अत एव चाहं प्रेषिता । तत् कोऽयं पदे पदे महान् अनध्यवसायः ?

कञ्चुकी—देवि ! संस्तभ्यात्मानम् अनुरुध्यस्व भगवतो वसिष्ठस्यादेशम् इति विज्ञापयामि ।

Śloka –5 – Metre : Śārdūla-vikrīḍitam (See P. 54). Dharma-dārāḥ – This does not mean only a legitimate wife, but a wife who participates in the accomplishments of the religious rites (Cf. sahadharmacāriṇī) (III 45/40 dharma-cārṇī VII, 19.) She observes her duties which are assigned to her.

Venerable Earth, in reality you are very hard!

You are the fire, whose magnonimity was known to the sages, to the wife of Vsiṣthta *and the* Gaṅgā *or even to the Sun— the ancient ancestor of the family of Raghu himself; you, who gave her* (Sītā) *birth, as the goddess of Learning does to the Science, a divinity like her,*—O *cruel, how have you tolerated such an assassination of your daughter?* (5) (*Behind the scenes*)

This, this way your exaulted Highness and the great Queen.

Janaka.—(*Looking*) Oh, here comes the Venerable Arundhatī conducted to the path by Gṛṣṭin, (*He rises*). But whom is he calling: "Great Queen"? (*Looking carefully*) Ah, it is the legitimate wife of the great king Daśaratha, my dear friend Kauśalyā. Who could recognise it she was?

In the house of Daśaratha, she was like a splendour or even the Splendour incarnate;—To what purposed is is this word of simile?—Ah, misery! alas! She has become a changed person—all grief.........Ah, what a catastrophy! (6).

And here is another accursed change condition!

The person, who formerly was a feast incornate to my eyes, his very sight has now became to me a corrosive on a wound, (7).

(*Enter Arundhatī, Kansalyā and Kañcukin.*)

Arundhati—Why yes. I tell you: "You must go in person to see the king of Videha,"—such is the order of the spiritual teacher of our family. Was it for this very errand that I was sent? But why this great hesitation at very step?

Chamberlain—Queen, be firm, comply with the order of the venerable Vasiṣṭha.

She must be the woman of the same caste and eldest of all other wives. Daśaratha, though married several wives, excepting Kauśalyā, no one was entitled to the privilege of being called a 'Dharma-dārā' (Stchoupak *n*. 80).

Sloka 6. Meter: Vasanta-tilaka. (See Act I, 33)
Śloka 7. Meter: Indra-vajrā. (See Act I, 11)

कौसल्या—ईरिसे काले मिहिलाहिवो[1] मए दिट्ठिव्वोत्ति समं एव्व सव्वाइं दुःखाइं समुब्भवन्ति। ता ण सक्कुणोमि उव्वट्टमाण-मूल-बन्धणं[2] हिअअं पज्जवत्थावेदुम्।

[ईदृशे काले मिथिलाधिपो[1] मया द्रष्टव्य इति समम् एव सर्वाणि दुःखान्य् उद्भवन्ति। तस्मान् न शक्नोम्य् उद्वर्तमान-मूल-बन्धनं[2] हृदयं पर्यवस्थापयितुम्]

अरुन्धती—अत्र कः सन्देहः ?

सतान-वाहीन्य्[3] अपि मानुषाणां
दुःखानि सद्-बन्धु-वियोगजानि।
दृष्टे जने प्रेयसि दुःसहानि
स्रोतः-सहस्रैर् इव संप्लवन्ते ॥८॥

कौसल्या—कहं णु खु वच्छाए मे वहूए एवंगदे तस्स राएसिणो मुहं दंसम्ह ?

[कथं नु खलु वत्साया मे वध्वा एवंगते तस्य राजर्षेर् मुखं दर्शयामः]

अरुन्धती—एष वः श्लाघ्य-संबन्धी जनकानां कुलोद्वहः।
याज्ञवल्क्यो मुनिर् यस्मै ब्रह्म-पारायणं जगौ ॥९॥

The idea is where the sorrow prolongs, it loses its effects and remains no more unbearable. But at the sight of the dear ones, it is revived and becomes more unbearable than when it had befallen.

Compare the idea in Kumarsambhava IV, 26.

तमवेक्ष्य रुरोद सा भृशं, स्तन-संबाधमुरो जघान च।
स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते ॥

Mithilādhipa—The king of Mithilā—Janaka.

Sarvāṇi duhkhāni—All the calamities such as the death of Daśaratha, the exile of Rāma, and the abandonment of Sītā.

उद्वर्तमान-इत्यादि-समासः—उद्वर्तमानं (उद्गच्छत्) मूलबंधनं यस्य।

पर्यवस्थापयितुम —परि+अव+स्थाप+तुमुन

Kauśalyā—At this time, I have to see the King of Mithilā—at this thought all my sorrows come back to me all together. That is why I am unable to compose my heart, the interior chords of which are shattered.

Arundhatī—There is no doubt about it.

Flowing continuously, the sorrows of the mortals, born out of the separation of a dear relation, incoercible, they flow in a thousand streams at the sight of a beloved person (8).

Kauśalyā—How, indeed, after that what has happened to my dear child, my bride, shall I see face to face that royal sage ?

Arundhatī—*Here is your esteemed relative, leader of the family of the Janakas to whom the sage Yājñavalkya revealed the integral Science of the Holly Texts* (9)

Śloka 8 —Metre : Indra-vajrā (See Act I. 11)
सन्तानवाहीनि-(समासः) सन्तानेन वहन्तीति ।

Śloka 9—Metre : Anuṣṭubh Prose order—
एष जनकानां कुलोद्वहः वः श्लाघ्यः सम्बन्धी (अस्ति) यस्मै याज्ञवल्क्यः मुनि : ब्रह्म पारायणं जगौ ।

कुलोःद्वह –One who continues and brings up the family an Epic compound Raghūdvaha cf. IV : 22 Mahāvīra-carita 1. 13 ; V, 45/46 also met with in Raguvaṃśa IX, 9.

Yājñavalkya—was the expounder of Brahman cf. Br. Ar. up. IV. 2. 1.

Jagau—Perfect from √gai to sing.

Kane remarks : the reading '*sad bandhu*' is not good, as it introduces unnecessary limitations ? No doubt one feels sorrow even for an ordinary relative, but one feels more sorrow if the relative was good, effectionate and righteous so, we do not find any objection to this reading.

कौसल्या—एसो सो महाराअस्स[1] हिअआणन्दो वच्छाए वहूए पिदा राएसी। हद्धी ! हद्धी ! सुमारिदह्मि अणिव्वेद-रमणीए दिवहे। हा देव्व ! सव्वं एव्व तं णत्थि।

[एष स महाराजस्स[1] हृदयानन्दो वत्साया वध्वा पिता राजर्षिः। हा धिक् ! स्मारितास्मि अनिर्वेद-रमणीयान् दिवसान्। हा देव, सर्वम् एव तन् नास्ति]

जनकः—(उपसृत्य) भगवति अरुन्धति ! वैदेहः सीर-ध्वजो[2] ऽभिवादयते।

यया पूतं-मन्यो[3] निधिर् अपि पवित्रस्य महसः,
पतिस् ते पूर्वेषाम् अपि खलु गुरूणां गुरुतमः।
त्रिलोकी-माङ्गल्याम् अवनि-तल-लीनेन शिरसा
जगद्-वन्द्यां देवीम् उषसम् इव वन्दे भगवतीम् ॥१०॥

1, Mahārāja refers to Daśaratha.

2. Sīradhvaja—Lit. *He who has the plough as an ensign*. Prenomen of the father of Sītā. Janaka was the name of all the dynasty of Mithilā, The names with the ending *-dhvaja* and *-ketu* are also found in modern names e. g. Moradhvaja, Candraketu. etc. They are used with the names of a Kṣatriya. Besides the names significant with the plough are found elsewhere in ancient India e.g. Halāyudha, Lāṅgalāyudha (Mahābhātata). The legend of the miraculous birth Sītā *-furrow*—is probably associated with the name of her father, which figures in the geological list of the Purāṇas (Cf. Mme. Stchoupak 81. n. Pargitar, Tradition P. 147.)

Śloka 10—Metre : Śikhariṇī (See P I, 28)

पूतं-मन्यः—पूतं आत्मानं मन्यत इति पूतं-मन्यः (अथवा पूतमानी)।

This is the type of compound which has acc. sg. in the first member according to Pāṇini's aphorism

Kauśhalyā – Here is he who delighted the heart of the great king (*Daśaratha*), this royal sage the father of our dear bride, Alas, alas ! he reminds me of those exquisit days without sorrow!......Ah, Good Heavens ! all those are no more.

Janaka—(*Approaching*) Venerable Arundhatī, Sīradhvaja of Videha salutes you.

You, by whom, he (Daśaratha) thought himself purified, and who himself was the treasure of the purifying lustre – that your husband, who was the most respected teacher of the ancient teachers, and you, who are the benediction of the three worlds and adorable by all the universe, like the divine Dawn, with my head touching the soil, I salute you. (10)

आत्मने खश् च III. 2.83 when the second member signifies *which believes himself to be.*

त्रिलोकी—(समासः)—त्रयाणां लोकानाम् समाहारः त्रिलोकी (द्विगुः)

4. Jagad-vandyā—Verbal Adjective depended upon the second member, which is relatively rare (Renou, Grammaire P. 99.)

The simile "nidhir api pavitrasya mahasaḥ" refers to the Sun, who being the lover of the dawn, pays a homage to the Uṣas. (Cf. Ṛgveda 1, 155,2.) Kane. But Daśaratha suits the context better.

अरुन्धती—परं ते ज्योतिः प्रकाश्यताम्। अयं त्वां पुनातु देवः परोरजा[1] य एष तपति।

जनकः—आर्य गृष्टे! अप्य् अनामयम् अस्याः प्रजापालकस्य[2] मातुः?

कञ्चुकी—(स्वगतम्) निरवशेषम् अति-निष्ठुरम् उपलब्धाः स्मः। (प्रकाशम्) राजर्षे! अनेनैव मन्युना चिर-परित्यक्त-रामभद्र-मुख-चन्द्र-दर्शना नार्हसि दुःखयितुम अतिदुःखितां देवीम्। रामभद्रस्यापि दैव-दुर्योगः कोऽपि, यत् किल समन्ततः प्रवृत्त-बीभत्स-किंवदन्तीकाः पौर-जनपदा नाग्निशुद्धिम् अल्पकाः प्रतियन्तीति दारुणम् अनुष्ठितं देवेन।

जनकः—(सरोषम) आः! कोऽयम् अग्निर् नाम अस्मत्-प्रसूति-परिशोधने! कष्टम्! एवंवादिना जनेन रामभद्र-परिभूता अपि वयं पुनः परिभूयामहे!

अरुन्धती—(निश्वस्य) एवम् एतत्। 'अग्निर् अग्निर्' इति वत्सां प्रति परिलघून्य अक्षराणि। "सीता" इत्य् एव पर्याप्तम्। हा वत्से।…

शिशुर् वा शिष्या वा यद् असि तत् तिष्ठतु तथा
विशुद्धेर् उत्कर्षस् त्वयि तु मम भक्तिं द्रढयति।
शिशुत्वं स्त्रैणं वा भवतु वा ननु वन्द्यासि जगतां
गुणाः पूजा-स्थानं गुणिषु न च लिङ्गं न च वयः ॥११॥

---

1. परो-रजाः—(समासः) रजसः परः परोरजः।

Cf. Notes on पर : सहस्त्रा : Here again the sun is referred to—*The sun which is beyond sin* (*rajas*). It may also mean *beyond passion, or wordly attachment* etc. Three qualities (guṇas) are explained according to Sāmkhya Philosophy *sattva, rajas and tamas*, and 'paro rajā ya esa tapati' is a famous Upaniṣadic formula (cf, Bṛ. Ār. Up. V. 14. 3-6).

Arundhatī—May the supreme light shine for you! May he sanctify you, the god who shines above passions!

Janaka—Venerable Gṛṣṭi, is she in good health, the mother of the saviour of the people?

Kañcuki—(*Aside*) Well, we are very cruelly reprpached. (*Aloud*) Royal sage, it does not behove you to affict the queen with such a rage, deprived long as she is of the joy of seeing the moon-face of her dear Rāma, she is already much too afflicted. As for dear Rāma himself, it was some fatal coincidence that the citizens and country-people, as it is said, spread all round, some abominable rumours. The wretched people did not have confidence in the Fire-Test and that is why the King has committed this cruel act.

Janaka—(*In rage*)—Ah, who is this Fire that has something to do with regard to the purification of our daughter! Ah, misery. He, who makes such a suggestion, insults us again, we, who are already insulted by Rāma.

Arundhatī—(*Sighing*) Quite so, the Fire, the Fire—these words are derogatory for my daughter. 'Sītā' alon e is enough. Ah, my darling!...

Whether you are my child or disciple that does not matter much. It is the purity par excellence which fortifies my affection for you. Child or woman, you are a worshipful person for the world, for, in the virtuous, it is their virtues that are the object of worship, neither their sex nor age. (*11*).

---

2. **Prajā-pālaka**—This is said ironically.

It is called 'Kāku' which depends only upon the intonation of the speaker.

Śloka 11 Metre: Śikharinī (See P I, 28)
Compare: Kumāra-sambhava VI, 12.

स्त्री पुमान् इत्य् अनास्थैषा वृत्तं हि महितं सताम् ।
पदं हि सर्वत्र गुणैर् निधीयते । (रघुवंश III 62)

Figure: Arthāntara-nyāsa—A general idea corraborating another particular one which is announced. The definition given by kāvya Prakāśa is:—

कौसल्या—अहो उन्मीलन्ति वेअणाओ। (इति मूर्च्छति)

[अहो उन्मीलन्ति वेदनाः]

जनकः—हा कष्टं किम् एतत्।

अरुन्धती—राजर्षे ! किम् अन्यत्।

स राजा तत् सौख्यं स च शिशु-जनस् ते च दिवसाः
स्मृताव् आविर्भूतं त्वयि सुहृदि दृष्टे तद् अखिलम्।
विपाके घोरे ऽस्मिन् अथ खलु विमूढा तव सखी,
पुरंध्रीणां[1] चित्तं कुसुम-सुकुमारं हि भवति[2] ॥१२॥

जनकः—हन्त ! हन्त ! सर्वथा नृशंसो-ऽस्मि संवृत्तः, यश् चिरस्य दृष्टान् प्रिय-सुहृदः प्रियदारान् न स्निग्धं पश्यामि।

स संबन्धी श्लाघ्यः प्रिय-सुहृद् असौ तच् हृदयम्,
स चानन्दः साक्षाद् अपि च निखिलं जीवितफलम्।
शरीरं जीवो वा यद् अधिकम् अतोऽन्यत् प्रियतरं
महाराजः श्रीमान् किम् इव मम नासीद् दशरथः ॥१३॥

कष्टम् ! इयम् एव सा कौसल्या !

यद् अस्याः प्रत्युर् वा रहसि परमं दूषितम् अभूद्,
अभूवं दम्पत्योः पृथग् अहम् उपालम्भ-विषयः।
प्रसादे कोपे वा तदनु मदधीनो विधिर् अभूद्,
अलं वा तत् स्मृत्वा[3] दहति यद् अवस्कन्द्य हृदयम् ॥१४॥

अरुन्धती—हा, कष्टम् ! अतिचिर-निरुद्ध-निश्वास-निष्पन्द-हृदयम् अस्याः।

जनकः—हा प्रियसखि ! (इति कमण्डलूदकेन सिञ्चति)

सामन्यं वा विशेषो वा तदन्येन समर्थ्यते।
सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा ॥ (का० प्र० X)

पुरन्ध्री—पुरं गृहं धारयति इति।

Ślokas : 12-13-14—Metre : Śikharini (See P I, 28)

Kauśalyā—Ah, my wounds are being opened. (*She swoons*).

Janaka—Ah, misery ! what has happened ?

Arundhatī—Royal sage, how could it be otherwise ?

That king—that happiness—that child—and those days, all have come back to her memory on seeing you—her friend. In this catastrophy, your dear friend lost her senses, for, the heart of the Matrons is delicate as flower. (12).

Janaka—Alas, alas ! in reality, I have become cruel in everyway, since, having seen after a long time, the wife of my dear friend, I do not treat her affectionately.

That revered relation, my beloved friend, my heart, my joy incarnate, also the integral fruit of my body and my soul or entirely a different thing, more precious still—the great King—the glorious Daśaratha, what was'nt he to me ? (13)

Alas ! she is the same Kauśalyā !......

When she or her husband, in secret intimacy, experienced some complete contradiction, it was I who became the confident of the both the spouses. Whether in reconcilliation or in difference their behaviour depended upon me......But enough of these reminiscences ; they attack and break my heart. (14)

Arundhatī—Ah, misery ! her breath has long been retained, so I do not feel her heart beat.

Janaka—Alas ! dear friend !......(*He spinkles water from the ascetic-pot*).

---

2. **Compare :** Megha-Dūta 10.

आशाबन्धः कुसुम-सदृशं प्रायशो ह्यङ्गनानां ।
सद्यः पाति प्रणयि हृदयं विप्रयोगे रुणाद्धि ॥

3. **Alaṃ smṛtvā**—Absolute after 'alaṃ' in a prohibitive sense. (Cf. Pāṇini III, 4) a usual form of the Eastern Grammarians. But the same is quite prevalent in the Skt. Literature (cf. Renou Grammaire 103.)

कञ्चुकी—सुहृद् इव प्रगटय्य सुख-प्रदः,
प्रथमम् एकरसाम् अनुकूलताम् ।
पुनर् अकाण्ड-विवर्तन-दारुणो,
विधिर् अहो विशिनष्टि[1] मनो-रुजम् ॥१५॥

कौसल्या—(आश्वस्य) हा बच्छे, जाणइ, कहिं सि ? सुमरामि दे णव-विवाह-लच्छी-परिग्गहे-एक्क-मण्डनं पप्फुरन्त-सुद्ध-विहसिदं मुद्ध-मुह-पुण्डरीअं । आप्फुरन्त-चन्द-चन्दिआ-सुन्दरेहिं अंगेहिं पुणो वि मे जादे उज्जोएहि उच्छङ्गं । सव्वहा महाराओ एव्वं भणादि, "एसा रहु-उल-महत्तराणं वहू अम्हाणं दु जणअसुदा दुहिदेव्व ।"

[हा वत्से जानकि ! कुत्रासि ? स्मरामि ते नव-विवाह-लक्ष्मी-परिग्रहै-कमण्डनं प्रस्फुरत्-शुद्ध-विहसितं मुग्ध-मुख-पुण्डरीकम् । आस्फुरच्-चन्द्र-चन्द्रिका-सुन्दरैर् अङ्गैः पुनर् अपि मे, जाते, उद्द्योतयोत्सङ्गम् । सर्वदा महाराज एवं भणाति, "एषा रघु-कुल-महत्तराणां वधूर् अस्माकं तु जनक-सुता दुहितैव ।"]

कञ्चुकी—यथाह देवी—
पञ्च-प्रसूतेर् अपि तस्य राज्ञः,
प्रिया विशेषेण सुबाहु-शत्रुः[2] ।
वधू-चतुष्के ऽपि यथैव नान्या,
प्रिया तनूजास्य तथैव सीता ॥१६॥

जनकः—हा प्रियसख ! महाराज दशरथ ! एवमपि सर्व-प्रकार-हृदयङ्गमः कथं विस्मर्यसे ।

Sloka 15—Metre : Druta-vilambita. Pāda of 12 syllables, without pause.

Śloka 16—Metre : Upajāti (See P. 78). This verse occurs in Māl. IV. 7.

Kañcuki—*Like a friend who, lavishing bliss, unfolds at first, his kindness with a unique flavour and then with a sudden change becomes cruel, the destiny, alas! has changed the pain of my heart.* (15)

Kauśalyā—(*Regaining cosciousness*) Ah, my dear child, where are you? I remember your lovely lotus-face teething with the lustre of the recent marriage as its only ornament, and with an innocent smile twinkling upon it. Oh, my child, with your body as beautiful as the radiant lustre of the moon, illuminate once more my lap......Always the great king used to say: " She is my daughter-in-law of our mighty princes of the lines of Raghu, but for us, as the daughter of Janaka, she is our own daughter.

Kañcukī—*The king had five children, but the enemy of Subâhu* (Rāma) *was the most favourable son of him. He had four brides, but no one was so dear to him as his own flesh and blood, as Sītā.* (16)

Janaka—Ah, dear friend, Great King Daśaratha! so penetrated you are into my heart in every way,— how can I forget you?

---

1. **Viśinaṣṭi**—Present 3rd pers. sing from √śis + vi to aggravate.

2 **Subāhu-śatru**—Rāma killed Subāhu who polluted the sacrifice of Viśvāmitra (cf. Rāmāyaṇa I. 30.)

नव-विवाह- इत्यादि । (समासः) नवः विवाहः तस्य या लक्ष्मीः (शोभा) तस्याः परिग्रहः स एव मण्डनं यस्याः सा तम्. ।

कन्यायाः किल पूजयन्ति पितरो जामातुर् आप्तं जनं
सम्बन्धे विपरीतम् एव तद् अभूद् आराधनं ते मयि ।
त्वं कालेन तथा-विधोऽस्य् अपहृतः संबन्ध-बीजं च तद्,
घोरेऽस्मिन् मम जीव-लोक-नरके पापस्य धिग् जीवितम् १७

कौसल्या—जादे, जाणइ, किं करोमि ? दिढ-वज्ज-लेव-धटिअ-बन्ध-णिच्चलं हद-जीविदं मं मन्द-भाइणीं ण पडिच्चअदि ।

[जाते, जानकि, किं करोमि ? दृढ-वज्र-लेप-घटित-बन्ध-निश्चलं हत-जीवितं मां मन्द-भागिनीं न परित्यजति ।]

अरुन्धती—आश्वसिहि राजपुत्रि ! बाष्प-विश्रामोऽप्य् अन्तरे कर्तव्य एव । अन्यच् च किं न स्मरसि, यद् अवोचद् ऋष्यशृंगाश्रमे युष्माकं कुल-गुरुर् भवितव्यं तथेत्य् उपजातम् एव, किम् तु कल्याणोदर्कं भविष्यतीति ?

कौसल्या—कुदो अदिकन्द-मणोरहाए मह एदम् ?

[कुतोऽतिक्रान्त-मनोरथाया ममैतत् ?]

अरुन्धती—तत् किं मन्यसे राजपत्नि ! मृषोद्यं[1] तद् इति । न हीदं-सुक्षत्रियेऽन्यथा मन्तव्यम् । भवितव्यम् एव तेन ।

आविर्भूत-ज्योतिषां ब्राह्मणानाम् ,
ये व्याहारास् तेषु मा संशयोऽभूत् ।
भद्रा ह्य् एषां वाचि लक्ष्मीर् निषक्ता,
नैते वाचं विप्लुतार्थां वदन्ति ॥१८॥

(नेपथ्ये कलकलः । सर्वे आकर्णयन्ति ।)

Śloka 17—Metre : Śārdūla-vikrīḍitam (See p. 54.)

कल्याणोदर्के—कल्याणं उदर्के (अन्ते) यस्य स तम् ।

1. Mṛṣodya—Grammatical Note : This word is not frequently used in Sanskrit literature. Pāṇini cites it in the irregular forms.

The parents of the young bride, it is said, honour the nearest relatives of the son-in-law. In our relation it was the contrary. It was you who had regards for me. Such as you were, the death had carried you away, as well as the germ of our relation. In this world of living beings, resembling Hell, what a shame it is for me to live, sinful that I am? (17.)

Kauśalyā—Ah, my daughter, what shall I do? Affixed by the knots of the formidable adamentine cement, the wretched life does not leave me, the luck-less that I am.

Arundhatī—Calm yourself, Princess! You must, from time to time, check your tears. Besides, do'nt you remember what said in the hermitage, of Ṛṣya-śṛṅga, the spiritual teacher of your family?—"This was to be so, and it has happened so, but the end would be happy".

Kauśalyā—What good would it be to me when the object of my desire is no more?

Arundhatī—Then, Queen, do you believe, "Is it a false statement"? It does not behove a noble wife of a Kṣatriya to think otherwise. It is quite so that will happen.

The sacred light was revealed to the Brāhamanas. May there not to be any doubt with regard to their prophacy! A happy fortune dwells in their words. They never pronounce a deceitful statement. (18).

(An up-roar rises behind the scenes; all listen.)

राज-सूय-सूर्य-मृषोद्य- रुच्य-कुप्य-कृष्ट-पच्या व्यथ्याः पा० ३. १.

११४. मृषा उद्यते इति मृषोद्यः—उद्यते = वद् + क्यप्।

Śloka 18.—Metre : Śālinī. Pāda of 11 syllables pause after the fourth.

मगण	तगण	तगण	गु० गु०
S S S	S S I	S S I	S S
मा तौ गौ	चेच्छालि	नी भो गि	लो कैः

Compare : Ṛgveda X, 71, 2.

भद्रैषां लक्ष्मीर् निहिताधि वाचि।

जनकः—अये ! अद्य खलु शिष्टानध्याय इत्य् उद्धतं खेलतां वटुकनां कलकलः ।

कौसल्या—सुलह-सोक्खं दाव बालत्तणं होदि । (निरूप्य) अम्हए ! एदाणं मज्झे को; एसो रामभद्द-लच्छी-परिसोहिदेहिं साव-ट्ठम्भ-मुद्ध-ललिदेहिं अंगेहिं अम्हाणं लोअणाइं शीअलावेदि ?

[सुलभ-सौख्यं तावत् बालत्वं भवति । (निरूप्य) अहो ! एतेषां मध्ये क एष रामभद्र-लक्ष्मी-परिशभितैः सावष्टम्भ-मुग्ध-ललितैर् अंगैर् अस्माकं लोचनानि शीतलयति ?]

अरुन्धती—(अपवार्य[1] सहर्ष-वाष्पम्) इदं नाम तद् भागीरथी-निवेदितरहस्यं कर्णामृतम् । न त्व् एवं विद्मः कतरोऽयम् आयुष्मतोः कुशलवयोर् इति । (प्रकाशम्)

कुवलय-दल-स्निग्ध-श्यामः शिखण्डक-मण्डनो,
वटु-परिषदं पुण्य-श्रीकः श्रियेव सभाजायन् ।
पुनर् अपि शिशुर् भूतो वत्सः स मे रघु-नन्दनो,
झटिति कुरुते दृष्टः कोऽयं दृशोर् अमृताञ्जनम् ।।१६।।

कञ्चुकी—नूनं क्षत्रिय-ब्रह्मचारी दारकोऽयम् इति मन्ये ।

जनकः—एवम् एतत् । अस्य हि ।

---

1. **Apavārya or Apavāritam**—This stage-direction is used when character on a stage speaks to a person in such a way that only the person addressed hears it.
तद्भवेद् अपवारितम.
रहस्यं तु यद् अन्यस्य परावृत्य प्रकाश्यते ।

Janaka—Ah, in fact, there is to-day a holiday in the honour of the distinguished guests; hence the great noise of the sporting students.

Kauśalyā—Happiness is easily begot as long as youth losts, (*Looking*)—Ah, in the middle of these, who is that, who, with his well-set and gracious limbs embellished with a lustre worthy of dear Rāma, is refreshing our looks ?

Arundhatī—(*Aside, with tears of joy*). This is really a secret which the venerable Bhāgīrathi told me. Oh, it was an embrosia to my ears ! But I do not quite know, which one amongst Kusa and Lave is this young boy—May they live long ! (*Loudly*).

Like a lotus-petal, dark and sleek, his trufts of hair, serving as ornament to him, full of saintly beauty, he seems to adorn, as it were, with his grace, the group of adolescents. It appears, dear Raghunandana (Rāma) suddenly has appeared to me,—who is this the embrosial colyrium to my eyes again ? (19).

Kañcuki—Certainly, this child must be a Brāhmaṇic-pupil from the Kṣatriya caste.

Janaka—Quite possibie. In fact—

Kane rightly points out that this a wrong stage-direction. It should be Ātma-gatam, as Arundhatī does not mean to address these words to Kaśualyā or even to Janaka.

Śloka 19—Metre : Hariṇī (See P. 28). This stanza has been cited by Sarasvatī Kaṇṭh. V, 167 as an example of uapamānikī prīti—a sentiment of love born out of a resemblance (between the father and the child).

चूडा-चुम्बित-कङ्कपत्रम्[1] अभितस् तूणीद्वयं पृष्ठतो,
भस्म-स्तोक-पवित्र-लाञ्छनम् उरो धत्ते त्वचं रौरवीम्[2] ।
मौर्व्या[3] मेखलया नियन्त्रितम् अधोवासश् च माञ्जिष्ठकं,[4]
पाणौ कार्मुकम् अक्ष-सूत्र-वलयं दण्डोऽपरः पैप्पलः[5] ॥२०॥

भगवत्य् अरुन्धति ! किम् इत्य् उत्प्रेक्षसे कुतस्त्योऽयम् इति ।

अरुन्धती——अद्यैवागता वयम् ।

जनकः—आर्य गृष्टे ! अतीव मे कौतुकं वर्तते तद् भगवन्तं वाल्मीकम् एव गत्वा पृच्छ । इमं च बालक ब्रूहि । वत्स ! के ऽप्य् एते प्रवयस्[6] त्वां दिदृक्षव[7] इति ।

कञ्चुकी—यद् आज्ञापयति देवः । (इति निष्क्रान्तः)

कौसल्या—किं मण्णेध एव्वं भणिदो आअमिस्सदि त्ति ।

[किं मन्यध्व एवं भणित आगमिष्यतीति]

जनकः—भिद्येत वा सद्वृत्तम् ईदृशस्य निर्माणस्य ।

Sloka 20—**Metre** : Śārdūla-vikrīḍitam (P. 54.) This verse is a typical example of the general out-look of a Kṣatriya student in Ancient India. cf. Mahānāṭaka. II, 3, *n*, 46 ; Manu II, 41-42 ; Āśval. Gr. Sū. 1, 19, 8 ff. Also Rāmāyaṇa, 1, 22, 6-11 ; Mahāv. Ca. II 26 ; Anargh. IV, 27; Bāl. iv, 50 etc. This verse also occurs in Mahāvīra-charita I, 18. This verse is again cited by Saras. Kaṇth. II, 161 as an example of āhāryābinayā—*description of equipment.*

1. **चूडा-इत्यादि समासः**—चूडया चुम्बितानि कङ्कपत्राणि यस्मिन् ।

2. **Raurava**—Skin of *ruru* an antilop of yellow hide. The hide of black antilop was reserved for a Brāhmaṇa student. रुरोः इयं रौरवी ।

On his back there are two quivers, whose arrows carass his chignon with their feathers, his chest bears the holy marks of a little ashes and the deer's skin, his loin-cloth dyed in mudder is held up by a belt of Mūrvā *In one hand he has a bow encircled with rosary beeds and in another he holds a wooden staff of a fig tree.* (20)

Venerable Arundhatī, what do you suppose—where does he come from?

Arundhatī—We have only come today.

Janaka—Honurable Gṛṣṭi, my curiosity has been reatly aroused. Therefore, you may go and ask the revered Vālmīki himself and tell the boy, "Dear child, some aged persons wish to see you."

Kañcuki—As your Majesty commands!

Kauśalyā—What do you believe? Would these words soon bring him here?

Janaka—Would good manners be wanting in such a breed?

---

3. मौर्वी—मूर्वाया इयं मौर्वी अथवा मूर्वायाः विकार इति।

4. माञ्जिष्ठम्—मञ्जिष्ठायाः रक्तं माञ्जिष्ठम्। तेन रक्तं रागात् पा० ४, २. १.

5. पैप्पलम्—पिप्पलस्य अयं पैप्पलः तम्।

6. प्रवयसः—प्रकृष्टं वयः येषां ते।

7. दिदृक्षुः—द्रष्टुं इच्छति दिदृक्षति—दिदृक्षति इति दिदृक्षुः। desiderative from √ dṛṣ with the affix -u

L. 13. Compare: the idea:—

नह्याकृतिः सुसदृशं विजहाति वृत्तम्। मृच्छ० ६०

न तादृशाः आकृति-विशिष्टाः गुण-विरोधिनो भवन्ति (शकु० ४)

कौशल्या—(निरूप्य) कहं सविणअं णिसामिद-गिट्ठि-वअणो विसज्जिद-ईसि-दारुओ इतो ऽहिमुहं पसरिदो एव्व सो वच्छो।

[कथं सविनयं निशामित-गृष्टि-वचनो विसर्जितर्षि-दारक इतोऽभिमुखं प्रसृत इव वत्सः।]

जनकः—(चिरं निर्वर्ण्य) भोः किम् अप्य् एतत् ?
महिम्नाम् एतस्मिन् विनय-शिशुता-मौग्ध्य[1]-मसृणो
विदग्धैर् निर्ग्राह्यो न पुनर् अविदग्धैर् अतिशयः।
मनो मे संमोह-स्थिरम् अपि हरत्येष बलवान्
अयोधातुं यद्वत् परिलघुर् अयस्कान्त-शकलः ॥२१॥

लवः—(प्रविश्य) अज्ञात-नाम-कर्माभिजनान्[2] पूज्यान् अपि स्वतः कथम् अभिवादयिष्ये ? (विचिन्त्य) अयं पुनर् अविरुद्ध-प्रकार-इति वृद्धेभ्यः श्रूयते। (सविनयम् उपसृत्य) एष वो लवस्य शिरसा प्रणाम-पर्यायः[3]।

अरुन्धती-जनकौ—कल्याणिन्, आयुष्मान् भूयः।

कौशल्या—जाद, चिरं जीव ! [जात ! चिरं जाव]

अरुन्धती—एहि, वत्स ! (लवं उत्सङ्गे गृहीत्वात्मगतम्) दिष्ट्या न केवलं उत्सङ्गश् चिरान् मनोरथो ऽपि मे पूरितः !

---

1. मौग्ध्यम्—मुग्धस्य भावः मौग्ध्यम्।

Śloka 21.—Metre :—Śikhariṇī (see p. 38).

Compare. Māl. I. 25—26.

अयस्कान्तमणि-शलाकेव लोहधातुम् अन्तःकरणम् उपसंहृतवती।

2. अज्ञात—इत्यादि (समासः) अज्ञातानि नामानि कर्म: अभिजनः च येषां ते तान्।

Kauśalyā. (*Looking-attentively.*) Eh, what! having modestly listened to the words of Gṛṣṭi and dismissing the young hermit-boys, here comes this way the dear child.

There is in him a super-abundance of grandeur softened by modesty and candour of childhood, accessible to the smart people, and not to those who are wanting in smartness...My mind, though dulled by attachment, is forcefully captivated by this powerful lad, like a small particle of magnet attracts a lump of iron (21).

Lava (*Entering*) Not knowing their name, nor their rank nor their family, how I am going to salute these persons worthy of my respect. (*After reflection*) Here, nevertheless, is a formula which the aged call irre proachable. (*Approaching respectfully*) the head of lova bows before you successfully.

Janaka and Arundhatī. Handsome boy! may you enjoy a long life!

Arundhutī. Come dear child! (*Taking Lava on knees aside*). Happily, it is not only my lap, it is also my longing which has been fulfilled.

---

3. The same formula of salutation is met with in Mahāv. Ch. IV. 24-25. A commentator cites a rule of Gautama whereby salutation in an assembly to each and every person was prohibited :

"सभायां प्रत्येकं न नमस्कुर्यात्"

कौशल्या—जाद इदो वि दाव एहि ! (उत्सङ्गे गृहीत्वा) अहमहे ण केवलं दर-विअसन्त कन्दोट्ट[1] सामलुज्जलेण[2] देह-बन्धेन कवलिदारविन्द-केसर-कसाअ-कण्ठ-कलहंस-णिणाद-दीहर-दीहरेण[3] सरेण अ रामभद्दं अणुहरदि। णं कठोर-कमल-गब्भ-पह्मलो सरीर प्फसो वि तारिसो एव्व। जाद, पेक्खामि दाव दे मुह-पुण्डरीअं। (चिबुकम् उन्नमय्य निरूप्य सबाष्पाकूतम्। राएसि, किं ण पेक्खसि ? णिउणम् णिरूवज्जन्तो वच्छाए मे वहूए मुह-चन्देण संवददि एव।

[जात, इतो ऽपि तावद् एहि ! अहो ! न केवलं दर-विकसत्कन्दोट्ट[1] श्यामलोज्ज्वल-देह-बन्धेन[2] कवलितारविन्द-केसर-कषाय-कण्ठ-कलहंस-निनाद-दीर्घ-दीर्घेन[3] स्वरेण च रामभद्रं अनुहरति। ननु कठोर-कमल-गर्भ-पक्ष्मलः शरीर-स्पर्शो ऽपि तादृश एव। जात, पश्यामि तावत् ते मुख-पुण्डरीकम्। राजर्षे ! किं न प्रेक्षसे ? निपुणं निरूप्यमाणो वत्साया मे वध्वा मुख-चन्द्रेण संवदत्य् एव।]

जनकः—पश्यामि, सखि, पश्यामि !

कौशल्या—अम्हहे उम्मत्तीभूतं विअ मे हिअअं किं वि एदो मुहं विप्पलवदि।

[अहो उन्मत्ती-भूतम् इव मे हृदयं किम् अपीतोमुखं विप्रलपति।]

जनकः—

वत्सायाश् च रघूद्वहस्य च शिशाव् अस्मिन्न् अभिव्यज्यते
संवृत्तिः प्रतिबिम्बितेव निखिला सैवाकृतिः सा द्युतिः।
सा वाणी विनयः स एव सहजः पुण्यानुभावो ऽप्य् असौ
हा ! हा ! दैव किम् उत्पथैर् मम मनः पारिप्लवं धावति ॥२२

कौशल्या—जाद, अत्थि दे मादा ? सुमरसि वा तादं ?

[जात, अस्ति ते माता ? स्मरसि वा तातम्]

लवः—नहि।

1. Kandoṭṭa. This is a deśi—name of the blue lotus cited by Hemcandra Deṣā. II. 9. Kaṇe reads 'nīlup-pala'.

Kauśalyā.—Child, come also this way. (*Taking him on her knees*). Not only by the build of his body of dark taxture—a blue lotus, hardly blossomed—but, also by his voice—resembling a prolonged cry of the swans with their voice sweetened by eating the filament of lotus, he resembles dear Rāma, ah, yes, even the con-act of his velvet-like body, like the heart of the fully blossomed lotus is absolutely the same. Child, let me see your lotus-face! (*Raising his chin and observing him in a significant look, with tears in her eyes*) Royal sage don't you see him? While examining attentively, does not he remind the moon-like face of the dear child—my bride?

Janaka—I see, friend, I see.

Kauśalyā. Ah, as though mad, my heart murmers something about him.

Janaka —*In this boy the perfection of my dear child and the desendant of Raghu (Rāma) is reflected as though it is the same aspect, the same splendour, the same voice, the same innate modesty and the same auspicious majesty ...Ah, destiny, why through deceptine path, goes my mind run be wildered.* (22).

---

1. Kauśalyā. Child, have you a mother? Do you remember your father?

Lava.—no.

२. दर-इत्यादि (समासः)—दर विकसत् यत् कन्दोट्टं (नीलोत्पलं) तद्वत् श्यामलः यः स तेन ।

३. कवलित-इत्यादि (समासः)—कवलिताः (भक्षिताः) ये अरविन्द-केसराः तै कषाय : कण्ठः तेन दीर्घ : यः स तेन ।

We are reminded of the words in Kumana III. 32, where similar expression is made with regard to Cuckoo:

" चूताङ्कुर-स्वाद-कषाय-कण्ठः
पुंस्कोकिलो ऽयं मधुरं चुकूज ॥"

कौशल्या—तदो कस्स तुमं ? [ततः कस्य त्वम् ?]

लवः—भगवतो वाल्मीकेः ।

कौशल्या—अयि जाद, कहिदव्वं केहहि ।

[अयि जात, कथितव्यं कथय]

लवः—एतावद् एव जानामि ।

(नेपथ्ये)

भो भोः सैनिकाः ! एष खलु कुमारश् चन्द्रकेतुर् आज्ञापयति "न केन चिद् आश्रमाभ्यर्णं-भूमय आक्रमितव्या" इति ।

अरुन्धती-जनकौ—अये, मेध्याश्व-रक्षा-प्रसङ्गाद् उपगतो वत्सश् चन्द्रकेतुर् अद्य द्रष्टव्य इति । अहो सुदिवसः !

कौशल्या—वच्छ-लक्खणस्स पुत्तओ आणावेदित्ति अमिद-बिन्दु-सुन्दराइं अक्खराइं सुणीअन्दि ।

[वत्स-लक्ष्मणस्य पुत्रक आज्ञापयतीत्य् अमृत-बिन्दु-सुन्दराण्य् अक्षराणि श्रूयन्ते]

लवः—आर्य, क एष चन्द्रकेतुर् नाम ?

जनकः—जानासि राम-लक्ष्मणौ दाशरथी ?

लवः—एताव् एव रामायण-कथा-पुरुषौ ?

जनकः—अथ किम् !

लवः—तत् कथं न जानामि ।

जनकः—तस्य लक्ष्मणस्यायम् आत्मजश् चन्द्रकेतुः ।

लवः—ऊर्मिलायाः पुत्रस् तर्हि मैथिलस्य राजर्षेर् दौहित्रः ?

अरुन्धती—(विहस्य) आविष्कृतं कथा-प्रावीण्यं वत्सेन ।

जनकः—(विचिन्त्य) यदि त्वम् ईदृशः कथायाम् अभिज्ञस् तद् ब्रूहि, तावत् पृच्छामस्-तेषां दशरथात्मजानां कियन्ति किं नाम-धेयान्य् अपत्यानि केषु दारेषु प्रसूतानी"ति ।

लवः—नायं कथा-भागो[1] ऽस्माभिर् अन्येन वा श्रुतपूर्वः ।

Kauśalyā.—Of whom (son) are you then?

Lava.—Of the venerable Valmiki.

Kauśalyā Well, my child, relate something better.

Lava.—That is all I know.

(*Behind the scenes*)

Hollo! hollo! soldiers! here commands: Candraketu "No one should trapass the neighbour-hood of the hermitage.

Arundhutī and Janaka Oh, dear Candraketu, entrusted with guard the sacreficial horse, has arrived! We are going to meet him to-day! what an auspicous day!

Lava.—Sire who is this Candraketu by name.'

Janaka.—Do you know Rāma and Lakṣamaṇa the two sons of the Daśaratha?

Lava.—The two heroes of the Rāmayaṇa.

Janaka.—Quite the same.

Lava.—How do I not know them?

Janaka.—This Candraketu is the son of Lakṣmaṇa

Lava. The son of Urmilā, hence the grandson of the royal sage of the Mithilā?

Arundhatī.—(*Smiling*) Dear child shows the perfect knowledge of this story.

Janaka.—(*After reflection*). Since you are so versed in this story, tell me .. At first I am going to ask you, "How many sons have these sons of Daśaratha? What are their names? from what espouses were they born?

Lava.—This section of the recital has not been before, neither by me nor by anybody else.

जनकः—किं न प्रणीत एव कविना ?

लवः—प्रणीतो न प्रकाशितः। तस्यैव कोऽप्य् एकदेशः सन्दर्भान्तरेण रसवान् अभिनेयार्थः कृतः[1] । तं च स्वहस्त-लिखितं मुनिर् भगवान् व्यसृजत् भगवतो भरतस्य[2] मुनेस् तौर्यत्रिक[3]-सूत्रकारस्य।

जनकः—किम् अर्थम् ?

लवः—स किल भगवान् भरतस्[4] तम् अप्सरोभिः प्रयोजयिष्यतीति।

जनकः—सर्वम् इदम् आकूतम्[5] अस्माकम्।

लवः—महती पुनस् तस्मिन् भगवतो वाल्मीकेर् आस्था। यतः तेषाम् चित् अन्ते-वासिनाम्[6] हस्तेन तत् पुस्तकं भरताश्रमं प्रति प्रेषितम्। तेषाम् अनुयात्रिकश्[7] चाप पाणिः प्रमादच्छेदनार्थम् अस्मद्-भ्राता प्रेषितः।

---

1. These lines allude to the drama which would be staged in the presence of Rāma in Act VII and indirectly even to the work of Bhavabhūti

2 Bharata has written a gigantic work on dramaturgy (Nāṭyaśāstra) and the word 'sūtra-kāra makes us suppose the existence of an old 'sūtra taxt on Dramaturgy which must have been a known work in Bhavabhūti's time. (cf. Théatre Indien 299-300 also Kumār. De, '*Studies in the History of Poetics* (I P. 27-29).

3. तौर्यत्रिकम तौर्य+त्रिकम्। तूर्यंभवं तौर्यम (वाद्यं) त्रयो ऽशाः अस्य इति त्रिकम्। तौर्योपलक्षितं त्रिकं इति तौर्यत्रिकम्।

The three elements of the dramatic art are : dance, songs and music. This compound is synonym of the Nāṭya. (Th. Ind I. C).

4. The allusion is to the legend after which Bharata arranged in the heaven before gods the representations of the Apsaras. Cf. Nātyaśastra: 37. (19—20)

अप्सरोभिर् इदं सार्धं क्रीडनीयकहेतुकम्।
अधिष्ठितं मया स्वर्गे स्वातिना नारदेन च॥

Bharata wrote a book of 37 chap. ovea 5000 lerses a pre-

Janaka—Has it not been composed by the poet ?

Lava—Composed, yes, but not published. A certain episode of this very section full of sentiment, has been arranged in a different manner for the stage-representation. After writing it with his own hand, the venerable sage has sent it to the revered sage Bharata, the author of the Sūtra-work on Dramaturgy.

Janaka—Why so ?

Lava—It is said that the venerable Bharata will get it staged by the celestial nymphs.

Janaka—All this seems intreguing to us.

Lava—Now, the venerable Vālmīki is very particular about it, That is why this book has been sent to the hermitage of Bharata by hand through some of the disciples. By way of their escort, in order to ward off all possible accidents, bow in his hand, my brother was despatched with them.

---

mitive text of Nāṭyaśūtra composed in the Sūtras (aphorisms) which was known before Bhavabhūti. (Cf. Winternitz Hist. of Skt. Lit. Ch. III. Théatre Indien 299-300).

5. Ākūtataram—*extremely wonderful.* Vīrarāghava and Ghanaśyāma read ākūta-karam—*exciting curiosity.*

6. अन्तेवासिन्—अन्ते वसतीति अन्तेवासिन्। शयवासवासिष्वकालात् पा० ६. ३. १८.

7. अनुयात्रिकः—अनुयात्रा (प्रयोजनं) अस्य इति ठक्। अनुयात्रां (अनुगनं) अस्य इति ठन् (काशी)।

कौसल्या—जाद ! भादावि दे अत्थि ।

[जात ! भ्राताऽपि तेऽस्ति]

लवः—अस्त्य् आर्यः[1] कुशो नाम ।

कौसल्या—जेट्ठे ते भणिदं होदि [ज्येष्ठ इति भणितं भवति]

लवः—एवम् एतत् । प्रसवानुक्रमेण स ज्यायान् ।

जनकः--किं यमजाव् आयुष्मन्तौ ?

लवः--अथ किम् ।

जनकः--वत्स ! कथय कथा-प्रबन्धस्य कीदृशः पर्यन्तः ।

लवः—अलीक-पौरापवादोद्विग्नेन राज्ञा निर्वासितां देवयजन-संभूतां सीतादेवीं आसन्न-प्रसव-वेदनाम् एकाकिनीम् अरण्ये लक्ष्मणः परित्यज्य प्रतिनिवृत्त इति ।

कौसल्या—हा वच्छे ! मुद्धमुहि ! को दाणिं दे सरीर-कुसुमस्स देव्व-दुव्विलास-परिणामो एक्काइणीए निवडिदो ?

[हा वत्से ! मुग्ध-मुखि ! क इदानीं ते शरीर-कुसुमस्य झटिति दैव-दुर्विलास-परिणाम एकाकिन्या निपतितः ?] ।

जनकः—हा वत्से !

नूनं त्वया परिभवं च वनं च घोरं,
तां च व्यथां प्रसव-काल कृताम् अवाप्य ।
क्रव्याद् गणेषु परितः परिवारयत्सु
संत्रस्तया शरणम् इत्य् असकृत् स्मृतोऽहम् ॥२३॥

लवः—(अरुन्धती प्रतिं) आर्ये ! काव् एतौ ?

अरुन्धती—इयं कौसल्या, अयं च जनकः ।

(लवः सबहुमान-खेद-कौतुकं पश्यति)

जनकः—अहो ! निर्दयता दुरात्मनां पौराणाम् ! अहो ! रामस्य राज्ञः क्षिप्रकारिता !

---

1. Arya—A term of address for an elder brother. Lava's address 'arya' to Kusa indicates that the latter

Kausalsā—You have a brother also ?

Lava—Yes, the noble Kuśa.

Kausalyā—He must be your elder brother then, since you speak him so (*respectfully*).

Lava—Quite so, it is said that in order of birth he is older than me.

Janaka—What ! are you twins ?

Lava—Certainly.

Janaka—Tell me, my child, what is the end of your story ?

Lava—Alarmed with calumnous gossip of the citizens, the king banished Sitā -born out the place of divine sacrifice. Lakṣmaṇa returned home after abandoning her in the forest, when the pains of child-birth were at hand.

Kausalyā—Ah, dear innocent child ! what happened then to your body -tender like a flower? Suddenly the catastrophy of the cruel stroke of destiny has befallen you, all alone.

Janaka—Alas ! my daughter ! ....

Indeed, when you received insults of banishment in the dreadful forest, and also that pain at the time of birth; when hosts of carnivorous animals were encircled around you, the frightened one, how often you must have invoked me for your refuge ! (23)

Lava—Noble Lady, who are these two ?

Arundhatī—This one is Kausalyā ; he is Janaka, (*Lava looks at them with respectful and sad interest*).

Janaka—Oh, the cruelty of the wretched citizens ! Oh, the rash act of the king Rāma !

---

was his elder brother. A general belief is that amongst the twins the later born is to be regarded as the elder.

Śloka—23—Metre : Vasanta-tilika See P 11. Some read परिभवञ्च वचञ्च घोरम् ।। According to Kane '*ca*' in this respect would be superfluous. Other read परिभवं वचं च घोरम् ।। Here '*vacana*' would mean the *slanderous words*.

एतद् वैशस-वज्र-घोर-पतनं[1] शश्वन् ममोत्पश्यतः,
क्रोधस्य ज्वलितं धगित्य्[2] अवसरश् चापेन शापेन[3] वा (पूर्वार्द्धम्)

कौसल्या—(सभय-कम्पम्) अभवदि ! परित्ताहि परित्ताहि ! पसादेहि कुविदं राएसिम् ।

[भगवति ! परित्रायस्व, परित्रायस्व । प्रसादय कुपितं राजर्षिम् ।

अरुन्धती:—
इतद् हि परिभूतानां प्रायश्चितं मनस्विनाम्[4]
राजन् ! अपत्यं रामस् ते पाल्याश् च कृपणा जनाः ।।२४।।

जनकः—
शान्त वा रघु-नन्दने तद् उभयं यत् पुत्रभाण्डं हि मे
भूयिष्ठ-द्विज-बाल-वृद्ध-विकलस्[5] स्त्रैणश्च पौरो जनः (उत्तरार्द्धम्)

(प्रविश्य संभ्रान्ता बटवः) बटवः-कमार ! कमार ! अश्वोऽश्व इति कोऽपि भूत-विशेषो जनपदेष्व् अनुश्रयते । सोऽयम् अधुनास्माभिः प्रत्यक्षीकृतः ।

लवः—अश्वोऽश्वइति पशु-समाम्नाये[6] सांग्रामिके च पठ्यते तद् ब्रूत कीदृशः ।

बटवः—श्रूयताम् ।

पश्चात् पुच्छं वहति विपुलं तच् च धूनोत्य् अजस्रम् ।
दीर्घग्रीवः भवति खुरास् तस्य चत्वार एव ।।

Sloka 25 First Half—Metre: Śārdūlavikrīḍitam (See p. 54).

2. *Dhagiti* is onometopoetic in the sense of 'jhaṭiti' —*suddenly*, but it is always used in connection with the burning sense.

3. Cāpen ṣāpen vā—Janaka was the Royal sage Kṣat riya as well as Ṛṣi, therefore, his bow and curse were equally effective both ways.

4. Manasvin—The affix *vin* in the possessive sense. According the Pāṇini V, 2. 21. अस्मयामेधास्रजो विनिः is applied to the words in as and to māyā, medhā and sraj *e.g.* māyāvin, medhāvin, srajasvin.

This murderous act is like the terrible stroke of thunder-bolt, which I remember always...It is hight time that my wrath should be kindled either by bow or curse (24).

Kausalyā—(*Trembling with fear*). Venerable, help, help to the mercy of the angry Royal sage.

Arundhatī—*This (prasāda - mercy) is an atonement, in fact, befitting the insulted sages. O King ! Rāma is your son and the miserable people have got to be protected.* (24).

Janaka—*Peace be on both sides to the descendant of Raghu* (Rāma), *for he is a treasure as son, and to the citizens, for mostly they are the Brāhmaṇas, children, aged, invalides and women.* (25).

(*Enter the young hermit-boy*).

Hermit-boy—Prince, prince, a certain creature whom they call a " horse " in the country,—we have seen it with our own eyes.

Lava—" A horse "—This name accurs in the list of animals of sacrifice, and in treatise on Military Science. Well, tell what it looks like ?

Hermit-boy—Listen—

On the rear of drags along a tail which it wags continuously : it has a long neck and four hoofs ; He eats

---

Śloka 24—Metre : Anuṣṭubh.

1. वैशस-इत्यादि (समासः)—विशस्ति हिनस्ति इति (वि + शस् + अच्) वैशसः, तस्य कर्म वैशसं एव वज्रस्य घोरम् पतनम् ।

Śloka 25—(The later Half).

5. भूयिष्ठ इत्यादि (समासः)—भूयिष्ठाः द्विजाः बालाः वृद्धाः विकलाः स्त्रैणानि (स्त्रीणां समूहः स्त्रैणम्) च इति ।

6. Pasu-sāmamnāya—The name is mentioned in the selections on Rituals which enumerates the sacrificial animals. cf. Vaj. sam. 29, 38, Nirukta 12, 13. Kane mentions it is a treatise dealing with animals.

शष्पाण्य् अत्ति प्रकिरति शकृत्-पिण्डकान् आम्र-मात्रान् ।
किं वाऽख्यानैर् व्रजति स पुनर् दूरम् एह्य् एहि यामः ॥२६॥

(इत्य् अपसृत्याजिने हस्तयोश् चाकर्षन्ति)

लवः—(सकौतुकोपरोध-विनयम्) आर्याः ! पश्यत, पश्यत ! एभिर् नीतोऽस्मि । (इति त्वरितं परिक्रामति)

अरुन्धती-जनकौ—पूरयतु कौतुकं वत्सः ।

कौसल्या—भअवदि, जाणामि एदं अणालोअअन्ती ण जीआमि विअ । अदो अण्णदो भविअ पेक्खह्म दाव गच्छमाणं दीहाउम् ।

[भगवति ! जानम्य् एतम् अनालोकयन्ती न जीवामि इव । अतोऽन्यतो भूत्वा प्रेक्षामहे तावद् गच्छन्तं दीर्घायुषम्] ।

अरुन्धती—अतिजवेन दूरम् अतिक्रान्तः स चपलः कथं दृश्यते ?

कञ्चुकी—(प्रविश्य) भगवान् वाल्मीकिर् आह, ज्ञातव्यम् एतद् अवसरे भवद्भिर् इति ।

जनकः—अतिगम्भीरम् एतत् किम् अपि । भगवत्य् अरुन्धति, सखि कौसल्ये, आर्य गृष्टे, स्वयम् गत्वा भगवन्तं प्राचेतसं पश्यामः ।

(इति निष्क्रान्तो वृद्ध-वर्गः)

वटवः—(प्रविश्य) पश्यतु कुमारस् तद् आश्चर्यम् !

लवः—दृष्टम् अवगतं च । नूनम् आश्वमेधिकोऽयम् अश्वः ।

वटवः—कथं ज्ञायते ?

Sloka 26—Metre : Mandākrāntā (see p. 46) This verse is a fine specimen of Bhavabhūti's comical composion (H. Jacobi Ztschrift f. Indol. u. Iranistik VI, 2, 1928, 178-183). The Commentators on the Rhetoric treatise have illustrated it for the Figure Svabhāvokti – *Realistic Figure*) designating simplicity

herbs, and spread balls of dung as big as mangoes... ... But, what is the use to describe it !.........It has departed again, far off ; come, come, let us follow it. (26).

(*They come to him and drag him by his dear-skin and arms.*)

Lava—(*Divided between his curiosity and his good mannes.*) Venerable, look, they are dragging me away.

Ar. & Janaka—Satisfy your curiosity, dear child.

Kausalyā—Venerable. I realise that I shall not live if I loose sight of him. Therefore, let us come this way so that we may see him depart.

Arundhatī—In haste he must have gone very far, that nimble boy, how shall you see him ?

Kañcuki—(*Entering*). The venerable Vālmīki said that you must be informed in time.

Janaka—This must be something very misterious. Venerable Arudhantī, friend Kausalyā, horourable Gr̥ṣṭi, let us go personally and see the venerable son of Pracetas.

The elder then excent)

(*Enter*)

The. Boys—May your Excellency look at this marvel !

Lava—It is seen and understood, undoubtedly this is the Aśvameda-horse.

The Boys—How do you know that ?

---

and precision. Note also that this sort of illustration has been cited in the Gloss of Namisādhu a commentary of Kāvyālamkāra of Rudraṭa. VII, 11. cnmposed in the same metre. (cf. Mme. Stchoupak 92, n.)

लवः—ननु मूर्खाः, पठितम् एव युष्माभिर् अपि तत् काण्डम् किं न पश्यत प्रत्येकं शतसंख्याः कवचिनो दण्डिनो निषङ्गिणस् च रक्षितारः ? तत्-प्रायम् एव बलम् इदं दृश्यते। यदहि न प्रत्ययस् तद् गत्वा पृच्छत।

वटवः—भो भोः ! किं प्रयोजनोऽयम् अश्वः परिवृतः पर्यटति ?

लवः—(सस्पृहम् आत्मगतम्) अये ! अश्वमेध इति विश्व-विजयिनां क्षत्रियाणाम् ऊर्जस्वलः[2] सर्व-क्षत्र-परिभावी महान् उत्कर्ष-निष्कर्षः।

(नेपथ्ये)

योऽयम् अश्वः पताकेयम् अथवा वीर-घोषणा।
सप्त-लोकैक-वीरस्य[3] दशकण्ठ-कुल-द्विषः[4] ॥२७॥

लवः—(सगर्वम् इव) अहो, संदीपनान्य् अक्षराणि !

वटवः—किम् उच्यते ? प्राज्ञः खलु कुमारः।

लवः—भो भोः, तत् किम् अक्षत्रिया पृथिवी, यद् एवम उद्घोष्यते।

(नेपथ्ये)

अरे रे ! महाराजं प्रतिकुतः क्षत्रियाः ?

लवः—धिग् जाल्मान् !

L. 2-3 Bhavabhūti seems to quote Śatapatha Br. here (XIII, 4, 2, 5).

रक्षितार उपक्लृप्ता भवन्ति......कवचिनः शतं, निषङ्गिणः शतं, दण्डिनः शतम्।

1. Aśvamedha—(See notes on P. 80) Here the horse was the emblem of victory of Rāma, or the ensign an indication his overlordship of the smaller kings.

2. ऊर्जस्वलः—ऊर्जस् + वलच् (मत्वर्थे निपातनम्)

The regular form with विनि (ūrjasvin) is also possible.

Lava—Well, idiots, haven't you studied it in that chapter? Don't yon see its guardians of every catagory, numbering a hundred, who are curassiers, staff-bearers and archers? To such an extent has this army been designated. If you do not believe me go and ask.

The Boys—Eh, eh, for what purpose this horse escorted thus roams about?

Lava—(*Enviously to himself*).—That what is called "The Aśvamedha" is for the world-conquering Kṣatriyas, a powerful means of humiliating the other Kṣatriyas and the great touch-stone of pre-eminence.

(*Behind the scenes*)

Here is that horse, a banner or rather a heroic proclamation of the unique hero of the seven worlds, who is (also) the enemy of race of the ten-headed one (i.e., Rāvaṇa) (27).

Lava—(*As if urged by pride*).—These words are provoking.

The Boys—What does he say? The prince is clever indeed.

Lava—Hallo, hallo, Do you take the world bereft of Kṣatriyas that you are proclaming in this way?

(*Behind the scenes*).

Wherefore Kṣatriyas before the great king (Rāma).

Lava—Misery on you!—you—

Śloka 27-28—Metre: Anuṣṭubh. Both the verses are cited by Kṣemendra in Aucitya Vicāra Carchá as an illustration of prabandhārthaucitya—*conformity with the subject*.

3. सप्तलोकैकवीरस्य-(समासः)—सप्त लोकेषु एकः वीरः यः स तस्य ।

4. दशकण्ठ–इत्यादि समासः—दशकण्ठस्य (रावणस्य) कुलं तस्य द्विट् (शत्रुः) यः स तस्य

यदि ते सन्ति सन्त्य् एव केयम् अद्य विभीषिका[1] ।
किम् उक्तैर् एभिर् अधुना तां पताकां हरामि वः ॥२८॥

हे वटवः, परिवृत्य लोष्ठैर् अभिघ्नन्तो नयत एनम् अश्वम् । एष रोहितानां मध्ये वराकश् चरतु ।

(प्रविश्य सक्रोध-दर्पः)

पुरुषः—धिक् ! चापलं किम् उक्तवान् असि ? तीक्ष्णा-नीरसा ह्य् आयुधीय-श्रेणयः शिशोर् अपि दृप्तां वाचं न सहन्ते । राजपुत्रश् चन्द्रकेतुर् अरि-विमर्दनः । सोऽप्य् अपूर्व-अरण्य-दर्शनाक्षिप्त-हृदयो[2] न यावद् आयातितावत् त्वरित अनेनम् तरु-गहनेन अपसर्पत ।

वटवः—कुमार ! कृतम् अनेन अश्वेन ! तर्जयन्ति विस्फुरित-शस्त्रः कुमारम् आयुधीय[3]-श्रेणयः । दूरे च आश्रम-पदम् । इतस् तद् एहि हरिण-प्लुतैः पलायामहे ।

लवः—(विहस्य) किं नाम विस्फुरन्ति शस्त्राणि !

(इति धनुर् आरोपयन्)

---

1. Vibhīṣikā—*terror*. The word is constructed with the causal form 'vibhīṣati'—*creates terror*.

Comment—Kaṇa prefers '*te*' to refer to Rāma a respectful form, meaning thereby : *If Rama is an unrivalled hero, let him be so*'. But on examining the text, we hesitate to agree with him, as in the preceding lines the word 'Kṣatriya' is a clear indication that '*te*' refers to them only, The meaning. therefore, would be : *If they (the, Kṣatriyas wish to exist, they would exist well i.e. with respect.*

If they exist, they exist very well, but, what does this threat mean? But, why to boast? Here I now seize your banner. (28).

O, You boys, surround the horse on all sides and drive it while striking with lumps of clay. Let the poor creature grave amongst our deer.

(*Enter a man full of pride and passion*)

Fie upon this impudence, what did you say? The cruel and unsentimental hosts of military people do not tolerate the arrogance of the children. The Prince Candraketu destroys his enemies. The view of this beautiful forest has attracted him. but before he arrives, escape hastily through younder thicket of trees.

The Boys—Prince, leave this horse there. The rows of war-mongers are threatening the Prince. And the hermitage is far off. Let us therefore, leap like the deer and save ourselves.

Lava—(*Laughingly*)—Ah, really! Are their arms flashing? (*He stretches his bow*).

---

2. अपूर्वं इत्यादि (समासः) अपूर्वस्य अरण्यस्य दर्शन-कुतूहलेन आक्षिप्तः हृदयः यस्य सः।

3. आयुधीयः—आयुधेन जीवति इति आयुधीयः।

Warriors always speak Sanskrit. Therefore, they are men of superior rank. All the guards of the horse of the sacrifice were chosen nobles and men of rank. In Act V Candraketu calls them 'rājanyāḥ' and 'Kṣatryāḥ.'

ज्या-विह्वया बलयितोत्कट-कोटि-दंष्ट्रम्[1]
उद्गारि-घोर-घन-घर्घर-घोषम्[2] एतत् ।
ग्रास-प्रसक्त-हसद्-अन्तक-वक्त्र-यन्त्र-
जृम्भा-विडम्बि-विकटोदरम्[3] अस्तु चापम् ॥२९॥

(इति यथोचितं परिक्रम्य निष्क्रान्ताः सर्वे)

कौसल्या-जनक-योगो नाम चतुर्थोऽङ्कः

Śloka 29—Metre : Vsantatilaka (See p. 11)

1. वलयित-(समासः)-वलयिते उत्कटे कोटी इव दंष्ट्रे यस्य त

2. उद्गारिघोर-इत्यादि (समासः)-उद्गारी (उद्गच्छन्) घोरः-घर्घर-घोषः यस्य तत् ।

3. ग्रास-इत्यादि (समासः)-ग्रासे प्रसक्तं हसत् अन्तकस्य (यमस्य) वक्त्रं तद् एव यन्त्रं, तस्य या जृम्भा तां विडम्बयति यत् तत् ।

With its string, as if its tongue, encircling around its immense teeth-ridges and cracking a loud and prolonged roar, resembling also the mechanical yawning produced from the jaws of death brusting into laughter, intent upon swallowing the whole (world),—the enormous belly—such be my bow. (29).

(*Moving inorder of superiority, all go out*).

End of Act IV.

Called

" The Meeting of Janaka and Kausalyā. "

This verse is the fine specimen of vīra-rasa—*sentiment of valour*. Kaṇe remarks that it is one of the verses in Bhvabhūti's works in which the sound echoes the sense. The similes are also very happy, the string being compared to the tongue, the stretched bow to the jaws, and the bow producing a twang resembling a cracking sound produced at the time of a hurried meal. The Death-god bursts into a laughter being glad to devour the innumerable men in the battlefield.

पञ्चमोऽङ्कः

(नेपथ्ये) भो भोः ! सैनिकाः ! जातं जातम् अवलम्बनम् अस्माकम् ?

नन्व् एष त्वरित-सुमन्त्र--नुद्यमान-
व्यावल्गत्-प्रजवन-वाजिना[1] रथेन ।
उद्घात-प्रचलित-कोविदार-केतुः
श्रुत्वा नः प्रधनम् उपेति चन्द्रकेतुः ॥१॥

(ततः प्रविशति सुमन्त्रसारथिना रथेन धनुष्पाणिः साद्भुत-हर्ष-संभ्रमश्[2] चन्द्रकेतुः)

चन्द्रकेतुः—आर्य ! सुमन्त्र ! पश्य पश्य !
किरति कलित-किंचित्-कोप-रज्यन्-मुख-श्रीर्[3],
अविरत-गुण-गुञ्जत्-कोटिना कार्मुकेन ।
समर-शिरसि चञ्चत्-पञ्चचूडश्[4] चमूनाम्,
उपरि शर-तुषारं कोऽप्य् अयं वीर-पोतः[5] ॥२॥

ACT V.

Scene ; Near the hermitage of Vālmīki. There is no prelude to this Act, as the incidents are narrated just after the Act IV.

1. त्वरित् इत्यादि (समासः)—त्वरितं यथास्यात्तथा सुमन्त्रेण नुद्यमानाः (प्रेर्यमाणाः) व्यावल्गन्तः वाजिनः (अश्वाः) यस्य स तेन ।

2. *Harsa-sambhrama*—this might be an idiomatic expression equivalent to English "*terribly sorry*". Other commentators have expressed the *idea of joy and agitation* which does not suit to the tone of excitement and bewiderment.

Śloka 1—Metre : Praharṣiṇī (See P. 40.) Line 1. is an example of cūlikā (see P. 66)

ACT V.

(*Behind the scenes*)

Hallo ! hallo ! soldiers! It has arrived the succur has has arrived !

He is indeed on his chariot, the gallopping and spirited horses are urged in haste by Sumantra, mounting high his shaky ensign on Kovidora (pole); he has heard our scuffle ; so, here comes the prince Candraketu. (1)

(*Enter the, on a chariot driven by Sumantra. Candraketu, with a bow in his hand, wonder-struck, and frightfully excited*).

Candraketu—Noble Sumantra, behold, behold!

The luster of his face is slighty reddish on account of his expressed anger ; his bow-string at its corners, is incessently twanging ; he is making his five locks dangle, over the very brow of the battlefield he is shooting a hail-storm of arrows upon my forces,—I do not know who is this juvenile hero. (2)

Śloka 2—3—Meter : Malini (See P.)

3. कलित इत्यादि (समासः)–कलितः कश्चित् कोपः तेन रज्यन्ती मुखश्रीः यस्य स तथोक्तः ।

4. चञ्चत्–(समासः) चञ्चन्त्यः पञ्चचूडाः यस्य स तथोक्तः ।

5. Vira-pota—'pota' Lit means a cub of an animal. But here it is extended to men—son of a gallant. Bhavabhūti is very fond of making similar demunitives e.g.:

क्षत्रियपोतः मनुष्यपोतः (महावीरः क्षत्रियडिम्भः

महावीर०—(समासः) वीरस्य पोतः (अथवा) वीरश् चासौ पोतः वीरपोतः ।

आश्चर्यम् आश्चर्यम् !

मुनि-जन-शिशुर् एकः सर्वतः सैन्य-काये,
नव इव रघु-वंशस्याप्रसिद्धः प्ररोहः ।
दलित-करि-कपोल-ग्रन्थि-टङ्कार-घोर-
ज्वलित-शर-सहस्रः कौतुकं मे करोति ॥३॥

सुमन्त्रः—आयुष्मन् !

अतिशयित-सुरासुर-प्रभावम्
शिशुम् अवलोक्य तथैव तुल्य-रूपम् ।
कुशिक-सुत-मख-द्विषां[1] प्रमाथे,
धृत-धनुषं[2] रघुनन्दनं स्मरामि ॥४॥

चन्द्रकेतुः—मम त्व् एकम् उद्दिश्य भूयसाम् आरम्भ इति हृदयम् अपत्रपते ।

Śloka 4—Metre : Puṣpitāgrā. In odd Pādas construct· न, न, र, य, . In even Padas न, ज, ज, र, गु०

नगण	नगण	रगण	यगण	नगण	जगण	जगण	रगण	गु०
‌।।।	।।।	ऽ।ऽ	।ऽऽ	।।।	।ऽ।	।ऽ।	ऽ।ऽ	ऽ
अयुजि	नयुग	रेफतो	यकारा	युजिच	नजौज	रगाश्च	पुष्पिता	ग्रा

कुशिकसुत-(समासः)—कुशिकसुतः (विश्वामित्रः) तस्य मखं (यज्ञं) द्विषन्तीति कुशिकसुतमखद्विषः तेषां यः प्रमाथः तस्मिन् ।

Allusion—is to the first adventures of Rāma in his youth, when he destroyed the demons who polluted the sacrifice of Viśvāmitra.

2. धृत-धनुषम्—धृतं धनुः येन स ताम् ।

Oh, marvel, oh, marvel.

This ascitic-boy is all alone and the troops of soldiers are surrounding him on all sides, as if he is a new and unknown off-shoot of the branch of Raghu! His arrows in thousands, shining and formidable crack on the frontal cheek-bones of the elephants and make me surprised. (3)

Sumantra—My child, may you live long!

His valour surpasses the gods' and demons.' To see this child, I am reminded of the figure of the descent of Raghu (*Rāma*) *massacring the enemies of the sacrifice of Viśvāmitra, armed with his bow*. (3).

Candraketu—To see that he is alone against the tide (of soldiers), my heart is siezed with shame.

The correct form according to Paṇini धनुषश्च ५, ४, १३२) is धृत-धन्वानम् ।

'*dhanu*' as the last member of the Bahuvrīhi compound becomes '*dhanvan.*' But the rules about the changes in the end of a compound are said to be not obligatory.

Figure:—Smṛti (*remembrance*) suggested by a resemblance.

सदृशानुभवाद्वस्त्वन्तरस्मृतिः स्मरणम (?)

Apatrapate—1st per. sg. from Ātmanepadi √trap + ap *to feel shame*.

अयं हि शिशुर् एककः समर-भार-भूरि-स्फुरत्-
कराल-कर-कन्दली-कलित-शस्त्र-जालैर्[1] बलैः ।
क्वणत्-कनक-किङ्किणी-झणझणायित-स्यन्दनैर्,
अमन्द-मन्द-दुर्दिन द्विरद-वारिदैर्[2] आवृतः ॥५॥

सुमन्तः—वत्स, एभिः समस्तैर् अपि किम् अस्य किं पुनर् व्यस्तैः ।

चन्द्रकेतुः—आर्य ! त्वर्यतां त्वर्यताम् । अनेन हि महान् आश्रित-जन-प्रमाथोऽस्माकम् आरब्धः । तथाहि—

आगर्जद्-गिरि-कुञ्ज-कुञ्जर-घटा-विस्तीर्ण-कर्ण-ज्वरम्,[3]

Śloka 5—Metre : Pṛthvī. Pāda of 17 syallable, pause after the 8th.

जसौ जसयला वसुग्रहयति पृथ्वी गुरुः ।
जगण सगण जगण सगण यगण गु०
ISI IIS ISI IIS ISS IS
अयंहि शिशुरे ककःस मरभा रभूरि स्फुरत्

Kaṇe reads मदभर भूरि स्फुरत and points out that the other reading is not a happy one. But we do not agree with him as we signify 'samara-bhāra' as *pressure of the combat*, and in reality the weapons flash only when the terrific fighting goes on.

1. समरभार इत्यादि (समासः)—समरभारेण भूरि स्फुरन्ति करालानि करकन्दलीषु कलितानि शस्त्रजालानि येषाम् ।

क्वणत् इत्यादि (समासः)—क्वणन्तीभिः कनककिंकिणीभिः झणझणायिताः स्यन्दनाः (रथाः) येषाम् ।

For here is that child, all alone, surrounded by these troops,—the network of whose arms is gripped in their formidable fingers, which vibrate violently on account of the pressure of combat, their chariots cropitating from the tinkling of the golden bells, their elephants resembling the clouds, whose 'mada' flows in torrets like the rainy day. (5).

Sumantra—Dear child! What can all these do against him, though a body of them?

Candraketu—Sire, hurry up, hurry up, for he has started a massacre of all the men in my charge. For—

Trumpetting in the thickets of the mountains, the troops of elephants are having fever in their ears, when he makes his bow-string twang, supplimented with the ardent voice of the drums.........with piles of the frag-

---

Jhanajhānāyita—Onometopoetic. This kind of figure is quite customary with Bhavabhūti Cf. VI, 1 Jhaṇajhaṇita, also II. 14 jhaṅkṛta etc.

Figure : Anuprāsa—*Allitteration.*

2. अमन्द इत्यादि (समासः)—अमन्दः मदः स एव दुर्दिनं येषां तैः द्विरदैः (गजैः) डामराणि (भयंकराणि) ये ते तैः।

Śloka 6.—Metre : Sārdūlavikrīḍitam (See P. 54.)

3. आगर्जत् इत्यादि (समासः)—आगर्जन्तीभ्यः गिरिकुञ्जर-घटाभ्यः निस्तीर्णः (दत्तः) कर्णः ज्वरः यथा स्यात्तथा—

कश्चिद् द्विषत्-खड्ग हृतोत्तमाङ्गः
सद्यो विमानप्रभुतामुपेत्य।
वामाङ्गसंसक्त सुराङ्गना खे
नृत्यत्कबन्धं समरे ददर्श ॥

The same image has been dipicted in IV. 29 where Lava while preparing for the combat invokes the Jaw of Death.'

ज्या-निर्घोषम् अमन्द-दुन्दुभि-रवैर् आध्मातम् उज्जृम्भयन्
वेल्लद्-भैरव-रुण्ड-मुण्ड-निकरैर् वीरो विधत्ते भुवं,
तृष्यत्-काल-कराल-वक्त्र-विघस-व्याकीर्यमाणाम्[1] इव । ६॥

सुमन्त्रः—(स्वगतम्) कथम् ईदृशेन सह वत्सस्य चन्द्रकेतोर् द्वन्द-सम्प्रहारम्[2] अनुजानीमः । (विचिन्त्य) अथवा इक्ष्वाकुकुल-वृद्धा वयम् । प्रत्युपस्थिते रणे च का गतिः ।

चन्द्रकेतुः—(सविस्मय-लज्जा-संभ्रमम्) हन्त धिक् । प्रतिनिवृत्तान्य् एव सर्वतः सैन्यानि मम ।

सुमन्त्रः—(रथवेगम् अभिनीय) आयुष्मन् ! एष ते वाग्विषयीभूतः स वीरः ।

चन्द्रकेतुः—(विस्मृतिम् अभिनीय) आर्य ! किम् अस्य नामधेयम् आख्यातम् आह्वायकैः ?

सुमन्त्रः—लव इति ।

चन्द्रकेतुः—

भो भोः ! लव महाबाहो ! किम् एभिस् तव सैनिकैः ।
एषोऽहम् एहि माम् एव तेजस् तेजसि शाम्यतु ॥७॥

सुमन्त्रः—कुमार, पश्य पश्य ।

विनिवर्तत एष वीर-पोतः ।
पृतना-निमर्थनात् त्वयोपहूतः ॥

तृष्यद् इत्यादि (समासः)—तृष्यन् कालः (मृत्युः) तस्य करालं वक्त्रं तस्य विघसाः तै व्याकीर्यमाणाम इव ।

Figure: Utpreksā—A fine specimen in which Death is represented as devouring mortals which again are represented as fallen mouthfuls from the yawning jaws of the bloosthirsty Death. The verse also contains Vīra and Adbhuta sentiment.

2. **Dvandva-samprahāra**—*Hand to hand fight.* This compound is not attested elsewhere and is constructed

ment of convulsed corpses. terrying, the heroes cover the earth, strewn, as if with the fallen mouthfuls from the yawning jaws of the (blood) thirsty death. (6)

Sumantra—How shall we allow our dear Candraketu to have a combat with a such person ?

(*After reflection*)—We have grown old in the family of Ikṣvākus. If the combat is to take place, why fear ?

Canderketu—(*With astonishment, shame and excitement*)—What a shame ! my troops are driven back from all sid s !

Sumantra—(*Gesticulating the movement of the chariot*). My child, here is the hero within your call.

Canderketu—(*Gesticulating forgetfulness*). Sire what was the name acclaimed by those shouters.

Sumentra—They called him " Lava."

Candraketu—*Hallo, hallo, Lava, of mighty arms ! Why are you after these poor soldiers. Here I am ; come to me ; it is in the fire that the fire must extinguish* (7)

Sumantra—Prince, see, see.

Here, at your challenge, the heroic lad turns away

---

on the anology of the compound *dvandva-yuddha* (Cf Mahāvīra I, 44/45, Stchoupak P. 98 *n.*)

L. 4-5. Amongst the duties of a Kṣatriya it is stated that he is never to desist from fighting, when challanged. Cf. Manu VII 88 ff.

सोत्रमाध्यम राजा त्वाहूतः पलयन् प्रजाः ।
न विवर्तेन संग्रामात् क्षात्रं धर्ममनुस्मरन् ॥

Śloka 7.—**Metre** : Anuṣṭubh.

Śloka 8.—**Metre** : Aupacchandasikam, or Mālyabhāṣini.

, Pāda of 23 syallables, pause after the 11th.

सगण सगण जगण गु० गु० सगण भगण रगण भगण
115 115 151 5 5 115 511 515 155
विनिव र्ततए षवीर पोतः पृतना निर्मथ नात्वयो पहूतः

स्तनयित्नु-रवान् इभावलीनाम् ।
अवमर्दाद् इव दृप्त-सिंह-शावः ॥८॥

(ततः प्रविशति धीरोद्धत[1]-पराक्रमो लवः)

लव—साधु राजपुत्र ! साधु । सत्यम् ऐक्ष्वाकः खल्व् असि । तद् अहं परागत एवास्मि ।

(नेपथ्ये महान् कलकलः)

(सावष्टम्भं परावृत्य) आः कथम् इदानीं भग्ना अपि प्रतिनिवृत्य युद्धाभिसारिणः पर्यवष्टम्भयन्ति मां चमूपतयः। धिग जाल्मान् !

अयं शैलाघात-क्षुभित-वडवा-वक्त्र-हुतभुक्
प्रचण्ड-क्रोधार्चिर् निचयकवलत्वं[2] व्रजतु मे ।
समन्ताद् उत्सर्पद्-घन-तुमुल-हेला कलकलः,
पयोराशेर् ओघः प्रलय-पवनास्फालित इव ॥९॥

Compare the idea in Kirātārjunīyam II, 22.
तृणानि नोन्मूलयति प्रभञ्जनो, मृदूनि नीचैः प्रणतानि सर्वतः
स्वभाव एवोन्नतचेतसामयं, महान् महत्स्वेव करोति विक्रमम् ।
किमपेक्ष्य फलं पयोधरान् ; ध्वनतः प्रार्थयते मृगाधिपः ।
प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिर् यथा ॥

2. Dhiroddhata—A term of Dramaturgy. One of the four catagories of Nayaka—*hero of the Drama*—Sahityatya Darpaṇa defines : आहंकार-दर्प-भूयिष्ठः The dominant trait of his character is that he has a proud consciousness of his valour.

Sloka 9—Metre : Sikhariṇi (See P. 38)

2. शैलघात इत्यादि (समासः)—शैलाघातेन क्षुभितः यः वडवा-वक्त्रभुक् (वडवानलः) तद्वत् प्रचण्डः क्रोधः तस्य ये अर्चिर्निचयः (ज्वालासमूहाः) तस्य कवलत्वं यत् तत् ।

Allusion :—Vaḍava, vaḍavanala and Aurva are synonyms. The sage Aurva was the descendant of Bhrgu. The Mahabharata relates that the sons of Kartavirya, with the desire of destroying the descen-

from the massacre of the troop, as from the slaughter of the troops of elephants, does the proud lions's welp. (8).

(*Enter then Lava marching in steady and proud dignified steps*).

Lava—Bravo, prince bravo, truely you are a descadant Ikṣvāku. Here, I have arrived.

(*A nuproar is heard behind the scenes*).

(*Retracing his steps hautily*) Now, now, beaten though, these heads of the army, returned and ready to combat, again surround me! Shame on these wretched ones!

Like the submarine infernal fire raging at the time when it dashes against rocks, is my vehement rage! May, to its numerous flames, this condensed and tumultions uproar of the insults spreading all round, become the prey like the sea-flux agitated by the storm of the Doom's-day. (9)

---

dants of Bhṛgu, killed all the children in the womb. One of the woman of the family in order to preserve the embryo hid it in the thigh (Urū), whence the child at its birth was called Aurva. On seeing him, the sons of Kārtavīrya were blinded and his wrath gave rise to an unextinguishable flame, which threatened to consume the whole world and at the biddings of his forefathers, he cast it into the ocean, where it remained concealed with the face of a horse (vaḍavā).

Bhavabhūti in this description follows Kālidāsa. हर-कोप-वन्हि । त्वयि ज्वलतु औौर्व इवाम्बुराशौ । Cf. Śakuntalā III, 3. in which the legendry tradition of associating the *fire* to *wrath* is preserved.

Compare also – अन्तर्निविष्टपदमात्मविनाशहेतुं

शापं दधज्ज्वलनमौर्वमिवाम्बुराशिः (रघु० ६, ८६)

Also Bhatrhari :–

इतश्च शरणार्थिनः शिखरिणां गणाः शेरते......

अहो विस्तमूर्जितं [illegible] ॥

(सवेगं परिक्रामति)

चन्द्रकेतुः—भो भोः कुमार !

अत्य् अद्भुताद् अपि गुणातिशयात् प्रियो मे

तस्मात् सखा त्वम् असि यन् मम तत् तवैव ।

तत् किं निजे परिजने कदनं करोषि,

नन्व् एष दर्पनिकषस् तव चन्द्रकेतुः ॥१०॥

लवः—(सहर्ष-सम्भ्रमं परावृत्य) अहो ! महानुभावस्य प्रसन्न-कर्कशा-वीर-वचन-प्रयुक्तिर् विकर्तन-कुल-कुमारस्य ! तत् किम् एभिर् एनम् एव तावत् सम्भावयामि । (पुनर् नेपथ्ये कलकलः सक्रोध-निर्वेदम) आः ! कदर्थितो[2]ऽहम् एभिर् वीर-संवाद-विघ्न-कारिभिः पापैः । (तद् अभिमुखं परिक्रामति)

चन्द्रकेतुः—आर्य ! आर्य ! दृश्यतां द्रष्टव्यम् एतत् ।

दर्पेण कौतुकवता मयि बद्धलक्ष्यः,

पश्चाद् बलैर् अनुप्लुतोऽयम् उदीर्ण-धन्वा[3] ।

द्वेधा समुद्धत-मरुत्-तरलस्य[4] धत्ते

मेघस्य माघवत[5]-चापधरस्य लक्ष्मीम् ॥११॥

Śloka 10.—Metre : Vsanatatilaka (See P. 11.)

2. Kadarthita—Denominative verb *kadarthayati* from *n. kadartha* cf. Pāṇini को तत्पुरुषेऽचि ६, ३, १०१ ।

Śloka 11—Metre : Vasantatilaka. (See P. 11).

3. उदीर्णधन्वा (समासः)—उदीर्णं धनुः यस्य ।

4. समुद्धत इत्यादि (समासः)—समुद्धतः मरुत् वायुः तेन तरलस्य (चञ्चलस्य) ।

माघवतः—मघवतः (इन्द्रस्य) अयं माघवतः (इन्द्रधनुः) ।

Figure : Nidarśanā—*Illustration*, defined below by Kāvya Pr. X.

अभवन् वस्तुसम्बन्ध उपमा-परिकल्पकः ।

(*He walks about precipitately*)

Candraketu—Hallo ! young boy !

For abudance of too many of your marvellous qualities, I like you; therefore, you are my friend; that what belongs tome is also yours. Why therefore, you are doing a massacre of your own people ? Here, indeed, is Candraketu the touch-stone of your pride. (10).

Lava—(*Turning around with a joyful emotion*).

Oh, what a varile way of expression, so serene and so rude, of this, magnonimons prince of the race of the Sun ! What have I to do with these soldiers ? Let me take care of him. (*An up-roar again, behind the scenes*). (*wih anger and disgust*). Ah, I am humiliated by these miserables, who put obstacles between the dialogue of the heroes.

(*He turns towards the direction ofi the noise*).

Canadraketu—Seigneur, look, the sight is remarkable!

With a pride mingled with curiosity, staring at me and followed by the soldiers from the rear, here he has brandished his bow. Like a cloud agitated doubly, drifted away by the wind and bearing the mark of the rainbow, he looks handsome. (11).

Śloka, 12.—Compare the image in Śakuntalā I, 36 :—

गच्छति पुरः शरीरं धावति पश्चाद् असंस्थितं चेतः ।

चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य ॥

अभिनव-इत्यादि (समासः)—अभिनवः वयः तेन काम्यः कायः यस्य ।

Also Bālacarita, attributed to Bhāsa 1, 13.

सुमन्त्रः—कुमारः एवैनं द्रष्टुम् अपि जानाति । वयं तु केवलं परवन्तो विस्मयेन ।

चन्द्रकेतुः—भो भो राजानः !

संख्यातीतैर् द्विरद-तुरग-स्यन्दनस्थैः पदातावे,
अत्रैकस्मिन् कवच निचितैर् मेध्य चर्मोत्तरीये ।
काल-ज्येष्ठैर् अभिनव-वयः-कास्य-कार्ये भवद्भिर्,
योऽयं बद्धो युधि परिकरस्[1] तेन धिग् वो धिग् अस्मान् ॥१२॥

लवः—(सोन्माथम्) आः कथम् अनुकम्पते नाम ! (विचिन्त्य) भवतु ! काल-हरण-प्रतिषेधाय जृम्भकास्त्रेण तावत् सैन्यानि संभावयामि । (इति ध्यानं नाटयति)

सुमन्त्रः—तत् किम् अकस्माद् सैन्य घोषः प्रशाम्यति ।

चन्द्रकेतुः—पश्यास्य् एनम् अधुना प्रगल्भम् ।

सुमन्त्रः—(ससम्भ्रमम्) वत्स ! मन्ये कुमारकेनानेन जृम्भकास्त्रम् आमन्त्रितम् इति ।

चन्द्रकेतुः—अत्र कः सन्देहः ?

व्यतिकर इव भीमः तामसो वैद्युतश्च
प्रणिहितम् अपि चक्षुर् ग्रस्त-मुक्तं[2] हिनस्ति[3] ।
अथ लिखितम् इवैतत् सैन्यम् आस्पन्दम् आस्ते
नियतम् अमित-वीर्यं जृम्भते जृम्भकास्त्रम् ॥१३॥

Śloka 12.—Metre : Mandākrāntā (See P. 46,)

1. Kane reads *sama-bhara* meaning *equality*. We do not agree with him as '*baddho parikara*' means *equipment of the combat*. Thus all the arguments which he has given against the above reading are fully answered as with that equipment even they were guilty of the breach of war atiquettes; therefore Candraketu was pronouncing a fie upon his soldiers.

Sumantra—Your Excellency can only see him indeed, I am simply perplexed.

Candraketu—Hallo. hallo, noble warriers!

Innumerable that you are mounted on elephants, horseback and chariots, against him, who is on foot and alone; dressed in armours that you are against him who covers himself just in the puve hide; older that you are to him in age, whose body has the charming beauty of a fresh childhood;— what an equipment of the combat!—Ah, what a shame for you; what a shame for me! (12).

Lava—(*With anxiety*). Eh. what! one would think that he is pitying me. (*After reflexion*). May be, I immobilise these troops with the help Jṛmbhaka armaments. (*He gesticulates meditation.*)

Sumantra—Why then, the noise of your army has ceased suddenly?

Candraketu—I am going to see this impudent fellow now.

Sumantra—(*With agitation*)—My boy, I think this young warrior has invoked the Jṛmbhaka armaments.

Candraketu—No doubt about it.

One would believe that a frightful combination of darkness and lightening is hurting the eyes, which though attentive, is released at the same time seized. Here, as though painted, the army stands immobilised......Certainly incomparably powerful are the Jṛmbhaka armaments. (Those which make the people yawn), which are being put into action. (13)

Śloka 13.—Metre: Mālinī (See P. 32) The first line also occurs in Māl. Mā. IX. 54, and X. 8.

2. ग्रस्तमुक्तः (समासः)—आदौ ग्रस्तः पश्चात् मुक्तः ।

3. हिनस्ति—हिंस् 7th conjugation Present, 3rd Pers. Sing.

आश्चर्यम् आश्चर्यम् !

पातालोदर-कुञ्ज-पुञ्जिततमः-श्यामैर्[1] नभो जृम्भकैर्,
उत्तप्त-स्फुरदारकूट-कपिल-ज्योतिर्-ज्वलद्-दीप्तिभिः[2] ।
कल्पाक्षेप*-कठोर भैरव-मरुद् व्यस्तैर्[3] अवस्तीर्यते,
मीलन्-मेघ-तडित्-कडार-कुहरैर्[4] विन्ध्याद्रि-कूटैर् इव ॥१४॥

सुमन्त्रः—कुतः पुनर् अस्य जृम्भकाणाम् आगमः स्यात् !

चन्द्रकेतुः—भगवतः प्राचेतसाद् इति मन्यामहे ।

सुमन्त्रः—वत्स ! नैतद् एवम् अस्त्रेषु विशेषतो जृम्भकेषु । यतः—

कृशाश्व-तनया ह्य् एते कृशाश्वात् कौशिकं गताः ।
अथ तत्-संप्रदायेन रामभद्रे स्थिता अपि ॥१५॥

चन्द्रकेतुः—अपरेऽपि प्रचीयमान-सत्त्व-प्रकाशाः[5] स्वयं सर्व मन्त्र-दृशः पश्यन्ति ।

सुमन्त्रः—वत्स ! सावधानो भव परागतः प्रवीरः ।

Śloka 14—Metre : Śārdūlavikrīḍitam. (See P. 5…) The image depicted in the Verse 13 has been developed. The Jṛmbhaka Arrows at first produce darkness, then lightning and then bring the virtgo upon the troops. The interval between darkness and lightening is so short that it appears dark and dazzling at the same time. **Figure :** Utprekṣā.

Kane remarks that the Poet speaks of the *Vindhya* mountain. It is quite probable that he was the inhabitant of Berar.

*. **Kalpa**—constitutes a period of 1000 Mahāyugas consisting of Kali, Dvāpara, Tretā and Kṛta. A Mahāyuga is equal to 43 million human years. One Yuga is equal to a day of Brahmā, the night also being of the same duration. It is said in the Hindu mythology that at the end of a 'kalpa' comes the 'pralaya'—*the Doomsday*—when the whole of the Universe is destroyed.

O, miracle, miracle !

Dark, like the darkness of the jungles in the heart of the nether regions, these Jṛmbhaka armaments pervade the sky with their vivid light of twany lustre of the vibrating copper ; scattered as if by the formidable and violent wind of the final catachism (disaster) and like the summits of the Vindhya mount, with its dusky caverns where the clouds and the lightining are hard to be distinguished. (14).

Sumantra—Wherefore would he have obtained there Jṛmbhaka ormaments?

Candraketu—From the venerable son of Pracetas, I suppose.

Sumantra—My child, this can not happen especially with regard to the Jṛmbhaka armaments, for—

They were born from Kṛśāśva who passed them on to Viśvāmitra by whom they were transmitted to Rāma, in whose possession they remain now. (15).

Candraketu—Others too, armed with the lustre of their accumulated purity, possessing the vision of the mystic formulae, procure all of them themselves.

Sumantra—My child, take care, the heroic worrior has returned.

---

1. पातालोदर-इत्यादि (समासः):—पातालस्य उदरम् एव कुञ्जः तस्मिन् पुञ्जितं (एकत्रीकृतम्) यत् तमः तद्वत् श्यामाः ये ते तैः ।

2. उत्तप्त-इत्यादि (समासः):—उत्तप्तं अतएव स्फुरत् यत् आरकूटं (पित्तलं) तस्य कपिलानि ज्योतींषि तद्वत् ज्वलन्त्यः दीप्तयः येषाम् ।

3. कल्प-इत्यादि (समासः)—कल्पे य आक्षेपः तस्मिन् कठोरः भैरवश्च मरुत् तेन व्यस्ताः ये ते तैः ।

4. मीलत्-इत्यादि (समासः)—मीलन्तः मेघाः तडितश्च तैः कडाराणि कुहराणि (गुहाः) येषाम् ।

Śloka 15—Metre ; Mandākrāntā (See P. 46).

5. प्रचीयमान-(समासः)—प्रचीयमानः सत्वस्य प्रकाशः येषु ।

कुमारौ—(अन्योन्यं प्रति) अहो प्रिय-दर्शनः कुमारः ! (सस्नेहानुरागं निर्वर्ण्य)

यदृच्छा-संवादः किमु किमु गुणानाम् अतिशयः,
पुराणो वा जन्मान्तर-निबिड-बद्धः परिचयः ।
निजो वा सम्बन्धः किमु विधि-वशात् कोऽप्य् अविदितो,
मम एतस्मिन् दृष्टे हृदयम् अवधानं रचयति ॥१६॥

सुमन्त्रः—भूयसा जीवि-धर्म एष यद् रसमयी कस्य चित् कचित् प्रीति । यत्र लौकिकानाम् उपचारस् तारा-मूलकं चक्षू-राग[1] इति । तम् अप्रतिसंख्येयम् अनिबन्धनं प्रेमाणाम् आमनन्ति ।

अहेतुः पक्षपातो यस् तस्य नास्ति प्रतिक्रिया ।
स हि स्नेहात्मकस् तन्तुर् अन्तर् मर्माणि सीव्यति ॥१७॥

कुमारौ—(अन्योन्यम् उद्दिश्य)

एतस्मिन् मसृणित-राज-पट्टकान्ते[2],
मोक्तव्याः इव सायकाः कथम् शरीरे ।
यत्-प्राप्तौ मम परिरम्भणाभिलाषाद्,
उन्मीलत्-पुलक-कदम्बम्[3] अङ्गम् आस्ते ॥१८॥

Śloka 16 —Metre Śikhariṇī : (See P. 38)

Compare :

भावस्थिराणि जननान्तर-सौहृदानि (शकुन्तला ५)

Also

मनो हि जन्मान्तर सङ्गतिज्ञम् । रघु० ७, १५.

The Sanskrit poets are fond of representing that the minds of two friends are drawn towards each other through some influence of the past life. (Kane. 152).

1. Cakṣū-rāga—(also to be found in Mā. VI, 15) is translated generally as joy of the eyes. But the Commentator Lakṣmana Sūri in his commentary of Uttar. indicates it as 'an eye-disease indicating a love-lorn desire.' Mme. Stchoupak remarks that it seems that

The Princes—(*Addressing each other.*) Oh, how charming is this youngman to look at! (*they see each other with tender affection*).

Is it an accidental encounter or superabundance of multiplex virtues, or else old intimacy closely connected with previous birth, on an innate lien which was ignored on account of the wish of the destiny? To see him my heart is altogether sensitive about it. (16).

Sumantra—This is mostly the law of the living beings the essence of which constituts the affection which one feels for someone. When, the customary saying is about the "Love written in the stars," or "the love at first sight." It is the way of defining a love, the cause of which is beyond our reasoning. That which is the prediction without cause, one cannot do anything against it. It is the thread of affection which stitches the most intimate fibres. (17)

The Princess—(*Speaking to each other*).

On his body, beautiful like the well-polished jewel, how shall I launch arrows, when by my desire to approach him for an embrace the fluff of my hair stand erect on my body. (18).

Bhavabhūti, like the other Rhetoricians wishes to employ a term similar to 'Pūrva-rāga,' in the sense of *the love at the first sight* which is found in the sub-divisions of Sṛṅgāra-rasa.

Śloka 17.—Metre : Anuṣṭubh.

Śloka 18.—Metre : Praharṣiṇīyam (See P. 40). **Figure** : Sandeha '*suspicion or hesitation*' there is also a seconary sentiment called : **mati**—*reflection*.

मसृणित-(समासः)—मसृणितः राजपट्टः तद्वत् कान्तं यत्

उन्मीलत् (समासः)—उन्मीलन्ति पुलक-कदम्बानि यस्मिन्।

rāja-paṭṭa—the sense of the word is not quite clear. The Lexicon translate it—A *diamond of inferior quality* (Cf. Monier Williams). This is a synonym of the word rājāvarta—*silken dress of blue tint* (nila-rakta). Commentary on Māl. IX, 23-23 gives it as a kind of *dark-coloured stone* (śyāmaḥ pāṣāṇa-viśeṣaḥ).

किं त्व् आक्रान्त-कठोर-तेजसि गतिः का नाम शस्त्रं विना
शस्त्रेणापि हि तेन किं न विषयो जायेत यस्येदृशः ।
किं वक्ष्यत्य् अयम् एव युद्ध-विमुखं माम् उद्यतेऽप्य् आयुधे
वीराणां समयो हि दारुण-रसः स्नेह-क्रमं बाधते ॥१९॥

सुमन्त्रः—(लवं निर्वर्ण्य आत्मगतम्) हृदय ! किम् अन्यथा परिकल्पसे ?

मनोरथस्य यद् बीजं तद् दैवेनादितो हृतम् ।
लतायां पूर्वलूनायां प्रसवस्योद्भवः कुतः ॥२०॥

चन्द्रकेतुः—अवतराम्य् आर्य ! सुमन्त्र ! स्यन्दनात् ।

सुमन्त्रः—तत् कस्य हेतोः ?

चन्द्रकेतुः—एकतस् तावद् अयं वीर-पुरुषः पूजितो भवति । अपि च खल्व् आर्य ! क्षात्र-धर्मः समनुगतो भवति, "न रथिनः पादचारम् अभियुञ्जन्तीति" शास्त्र-विदः परिभाषन्ते ।

सुमन्त्रः—(स्वागतम्) आः, कष्टां दशाम् अनुप्रपन्नोऽस्मि !

कथं न्याय्यम् अनुष्ठानं मादृशः प्रतिषेधतु ।
कथं वा अभ्यनुजानातु साहसैक-रसां क्रियाम् ॥२१॥

चन्द्रकेतुः—यदा तात-मिश्रा अपि पितुः प्रियसखम् अर्थ-संशयेष्व् आर्यम् एव पृच्छन्ति, तत् किम् आर्यो विमृशति ?

सुमन्त्रः—आयुष्मन् ! एवं यथाधर्मम् अभिमन्यसे ।

एष साङ्ग्रामिको न्याय एष धर्मः सनातनः ।
इयं हि रघु-सिंहानां वीर-चारित्र-पद्धतिः ॥२२॥

Śloka 19—Metre : Śārdūlavikrīḍitam. (See P. 54.)

Śloka 20.—Mette : Anuṣṭubh. **Figure** : Dṛṣṭānta—*Example.*

Śloka 21, 22 and 23.—Metre : Anuṣṭubh.

Śumantra—He was the friend Daśaratha. In Rāmāyaṇa he is represented as the reliable counsel of the King

Yes, but against the valour which has reached its hight, what help there is without arms? And besides, what is the use of the arms, if they have no aim excepting him? And what will he say to himself that I am turning my back from the combat when the arms have been raised? The law of the worriors is fundamentally implacable. It stops the course of affection. (19)

Sumantra.—(*Seeing Lava, aside, with tears in his eyes.*) My heart, what are you thinking still?

The germ of our desires has been robbed by the destiny.........when a creeper has been cut, how the flowers will grow?

Candraketu.—Noble Sumantra, I am going to get down from the chariot.

Sumantra.—What for?

Candraketu.—Firstly, because in this way, this hero would be honoured. And then, Sir, the law of Kṣatriya would be observed in this way. "People mounted on the chariot do not attack a pedestrian,' —thus instruct those conversant in the Sastra

Sumantra.—(*Aside*). Here I am in a difficult predicament.

How a person like myself, shall appose the application of a rule? And how, on the other hand, to authorise an action in which audacity is the only dominent sentiment. (21)

Candraketu.—When my venerable elders, in matter of doubt, only consulted your noble self—the dear friend of their father, why then should you hesitate?

Sumantra.—Dear child, your thought conforms wih the dictates of Law.

This is the rule of the combat, this is the Eternal Law, and this is the heroic way of the lions of the house of Raghu. (22)

Daśaratha. Sumantra, again had to do the work of a Sūta—*charioteer*. It is also a general epithet of a charioteer who was a mixed caste (born out of a Kṣatriya father and Brahamaṇa mother, Manu X, 11 and 47). He was to take care of the king's horses and drove them.

चन्द्रकेतुः—अप्रतिरूपं वचनम् आर्यस्य ।
इतिहासं पुराणं च धर्म-प्रवचनानि च ।
भवन्त एव जानन्ति रघूणां च कुल-स्थितिम् ॥२३॥
सुमन्त्रः—(सस्नेहास्रं परिष्वज्य)
जातस्य ते पितुर् अपीन्द्र-जितो[1] निहन्तुर्
वत्सस्य वत्स ! कति नाम दिनान्य् अमूनि ।
तस्याप्य् अपत्यम् अनुतिष्ठति वीर-धर्मं
दिष्ट्या गतं दशरथस्य कुलं प्रतिष्ठाम् ॥२४॥
चन्द्रकेतुः—(सकष्टम्)
अप्रतिष्ठे कुल-ज्येष्ठे का प्रतिष्ठा कुलस्य नः ।
इति दुःखेन तप्यन्ते त्रयो नः पितरोऽपरे ॥२५॥
सुमन्त्रः—अहह ! हृदय-मर्म-दारुणान्य् एव चन्द्रकेतोर् वचनानि !
लवः—हन्त, मिश्रीकृतो रस-क्रमो वर्तते !
यथैन्दाव् आनन्दं व्रजति समुपोढे कुमुदिनी,
तथैवास्मिन् दृष्टिर् मम कलह-कामः पुनर् अयम् ।

In the Epic and the Purāṇas sūtas were the guardians of the geneological traditions, recitors of the Itihāsa (*History*) and Purāṇas (*Legendry verses*). They were called the 'Purāṇa-vid,' or 'Itihāsa-Purāṇa-vid' Cf. Winterniz, Hist. I, Pargiter *Tradition* P. 15.

Śloka 24.—Metre : Vasanta-tilaka. (See P. 11).

1. **Indrajit**—An epithet of Lakṣmaṇa who killed Meghanāda—the vanquisher of Indra. (Cf. Rāmāyaṇa VI, 88-89).

Śloka 25.—Metre : Anuṣṭubh.

Śloka 26.—Metre : Śikhariṇī (See P. 38). This stanza depicts a fine conflict of the affection and heroism which marks also the difference in style in both the Hemistiches. In the first Hemistiche there is simplicity of the language and in the second long and bombastic compounds are met with, which are mixed with alliterations of the harsh consonants. In the

Candraketu —The word of your noble self has no equal.

The heroic Epic, the legends and the prescription of Law, in fact you know them all, as well as the established custom of line of Raghu. (23).

Sumantra.—(*Embracing him with tears of tenderness.*)

Since your father was born—the destroyer of Indrajit, O, you, dear child, son of my dear child, how many days have passed? Here is his son, who is also following the law of the heroes,.........O, joy! the line of Daśaratha has been established. (24)

Candraketu.—(*With sadness*).

When the elder is without descendant, what then is the stability of our family? With this sorrow our other three parents are worried. (25).

Sumantra.—Alas, the words of Candraketu are touching the vitals of my heart.

Lava.—The cause of my sentiment is all mixed up.

Just as, at the rise of moon the Kumudinī (a sort of lotus) is delighted, so is my eye to see him.........But him, here he is anxious to combat, with his massive bow fiercely

---

first the style is call 'vaidarbhi,' while in the second it is Gauḍī full of '**ojas**' *i. e., vigour*—the style which conforms with the ulvaṇa-rasa—*i. e.*, Vīra-rasa.

रणत् इत्यादि (समासः):—रणत्कारेण क्रूरं कणितं तस्य या गुणः (ज्या) तेन गुञ्जन् गुरुः धनुः तस्मिन् धृतं प्रेम येन स तथोक्तः ।

विकच-इत्यादि समासः— विकचः (स्फुटः) अतएव विकरालः उल्वणरसः (वीररसः) यस्य स तथोक्तः ।

रणत्कार-क्रूर-क्वणित-गुण-गुञ्जद्-गुरु-धनुर्-
धृत-प्रेमा बाहुर् विकच-विकरालोल्बण-रसः[3] ॥२६॥

चन्द्रकेतुः—(अवतरणं रूपयन्) आर्य ! सावित्रश् चन्द्र-केतुर् अभिवादयते ।

सुमन्त्रः—अजितं पुण्यम् ऊर्जस्वि ककुत्स्थस्येव[1] ते महः ।
श्रेयसे शाश्वतो देवो वराहः[1] परिकल्पताम् ॥२७॥

अपि च—

देवस् त्वां सविता धिनोतु समरे गोत्रस्य यस् ते पिता,
त्वां मैत्रावरुणोऽभिनन्दतु गुरुर् यस् ते गुरूणाम् अपि ।
ऐन्द्रावैष्णवम् आग्निमारुतम् अथो सौपर्णम् ओजोऽस्तु ते,
देयाद् एव च राम-लक्ष्मण-धनुर्-ज्या-घोष-मन्त्रो जयम् ॥२८॥

Śloka 27.—Metre : Anuṣṭubh.

1. **Kakutstha—Allusion** is to the epithet of Purañjaya, son of Śaśāda, a king of the solar race and descendant of Ikṣvāku. The mythology relates that at the time of war with demons, the gods headed by Indra, went to the powerful king Purañjaya and requested him to be their ally in the battle with the demons. The latter consented to do so, if Indra carried him on his back. Indra accordingly assumed the form of a bull und Purañjaya was seated on the hump (*kakud*) of the bull and defeated the demons. Purañjaya was therefore, called **Kakutstha.**

2. **Varāha—Allusion** is to one of the incarnations of Viṣṇu. Why this special incarnation is invoked here ? Several reasons are offered by Kane on the strength of a quotation of a commentator. 1. The Boar-incarnation was the first incarnation of Viṣṇu, in which he tried to undo the evil effects of the misdeeds of the

clattering and resounding its chord... And Here my arm repressing offection, displays a frightful quarrel.

(26)

Candraketu—Sir, Candraketu, the descendant of the Sun salutes you.

Your lustre is invincible, saintly, and powerful, like the of Kakutstha. May the eternal Boar-God grant you happiness ! (27)

And also !

May the Sun-God excel you in the combat—he, who is the father of your race ! May Vasiṣṭha *welcome you favourably ; —he who is the master of your masters ; may Indra, and* Viṣṇu, *the Fire and the Wind-god and the Bird-God bring power to you ! May the magic formula—the noise of the bow-string of Rāma and Lakṣmaṇa bring victory to you.* (28).

---

demons. The Boar-god brought the Earth from the bottom of the ocean where she was kept by Hiraṇyākṣa. 2. In the ancient Sanskrit works Varāha was the tutelary deity of the royal houses. This is ascertained from the inscriptions. Hence the Boar-god has been invoked to bring prosperity upon Candraketu.

This is a versa of benediction marked with a solumn style. The archaic words are specially chosen, 'Dhinoti' is the word of the Brāhmaṇa. It is also met with in the classical literature. Similarly "deyad' "aindrā-vaiṣṇava," "agni-māruta" are also Vedic. adjectives constructed with a double 'vṛddhi' of the 'Dvandva' compounds. Cf. Pāṇini VII, 3, 21. देवता द्वन्द्वे च।

अरण्यसदः—अरण्ये सीदन्ति (वसन्ति) इति ।

Śloka 28.—Metre Śārdûlavikrīḍitam. (See P. 54).

3. Maitrā-varuṇah—is refered to Vasiṣṭha. In the Vedas too Vasiṣṭha is given this epithet. (Cf. Rg. VII, 33, 11.)

लवः—कुमार ! अति हि नाम शोभसे रथस्थ एव । कृतं कृतम् अत्य् आदरेण !

चन्द्रकेतुः—तर्हि महाभागोऽप्य् अन्यं रथम् अलङ्करोतु !

लवः—आर्य ! प्रत्यारोपय रथोपरि राज-पुत्रम् ।

सुमन्त्रः—त्वम् अप्य् अनुरुद्ध्यस्व वत्सस्य चन्द्रकेतोर् वचनम् ।

लवः—को विचारः स्वेषूपकरणेषु ? किन्त्व् अरण्यसदो वयम् अनभ्यस्त-रथ-चर्याः ।

सुमन्त्रः—जानासि वत्स ! दर्प-सौजन्ययोर् यथोचितम् आचरितुम् । यदि पुनस् त्वाम् ईदृशम् ऐक्ष्वाको राजा रामभद्रः पश्येत् तदा तस्य स्नेहेन हृदयम् अभिष्यन्देत ।

लवः—आर्य ! सुजनः स राजर्षि श्रूयते । (सलज्जम् इव)

वयम् अपि न खल्व् एवंप्रायाः क्रतु-प्रतिघातिनः,
क इह गुणैस् तं राजानं जनो बहु मन्यते ?
तद् अपि खलु मे स व्याहारस् तुरङ्गम-रक्षिणाम् ,
विकृतिम् अखिल-क्षत्राक्षेप-प्रचण्डतयाकरोत् ॥२९॥

चन्द्रकेतुः—(सस्मितम्) किं नु भवतस् तात-प्रतापोत्कर्षोऽप्य् अमर्षः ?

लवः—अस्त्व् इह अमर्षो मा भूद् वा । एतत् तु पृच्छामि । दान्तं हि राजानं राघवं शृणुमः । स किल नात्मना दृप्यति, नाप्य् अस्य प्रजा वा दृप्ता जायन्ते । तत् किं मनुष्यास् तस्य राक्षसीं वाचम् उदीरयन्ति ।

ऋषयो राक्षसीम् आहुर् वाचम् उन्मत्त-दृप्तयोः ।
सा योनिः सर्व-वैराणां सा हि लोकस्य निर्ऋतिः ॥३०॥

इति ह स्म ताम् निन्दन्ति ! अथेतराम् अभिष्टुवन्ति ?

Śloka 29.—Metre Hariṇī (See P. 28)

Lava—Prince, you look indeed very fine on the chariot. Enough, enough with excessive politeness !

Candraketu—Let your honour take your seat on another chariot.

Lava—Sire, make the prince seated on the chariot.

Sumantra—You too then agree to the words of dear Candraketu.

Lava—Why to discuss our equipments ? Well, we are inhabitants of the forest; we are unaccustomed to make use of the chariot.

Sumantra—You know, dear child, how to behave in the fitness to your pride and noble birth. If the descendent of Ikṣvāku, the king Rāma had seen you, as you are, his heart would melt in tenderness.

Lava—Sire, We hear that the Royal-sage is a worthy man.

We too are not certainly those who demolish sacrifices......Who is the man right here who does not respect him (Rāma) for his virtues ? But really the behaviour of the guardian of the horse upset me for their arrogance shown to all the Kṣtriyas. (29)

Candraketu—(*Smiling*)—But why this susuptibility with regards to the pre-eminent glory of my father ?

Lava—Susuptibility or not, that is not the point. But I ask you this. We hear that the King—the descendant of Raghu, has curbed his passions. It is said that he displays conceit to nobody and his subjects too are unconceited. Then, why his people give expression to a demoniaque utterance ?

The sagescall the utterance of the mad and conceited as demoniaque. It is the genisis of all enemosity. It is in fact a scurge of the world. (30.)

It is thus they condemn it. But there is another saying which they praise :—

Śloka 30.—Metre : Anuṣṭubh.

निऋ्तिः [illegible] मते (सन्मार्गात्) इति क्षीरस्वामी ।

कामान् दुग्धे विप्रकर्षत्य् अलक्ष्मीम्,
कीर्तिं सूते दुष्कृतं या हिनस्ति ।
तां चाप्य् एतां मातरं मङ्गलानाम्,
धेनुं धीराः सूनृतां वाचम् आहुः ॥३१॥

सुमन्त्रः—परिपूत-स्वभावोऽयं बत कुमारः प्राचेतसान्तेवासी । वदत्य् अयम् अभ्युपपन्नम् आर्षेण संस्कारेण ।

लवः—यत् पुनस् चन्द्रकेतो ! वदसि किं नु भवतस् तात-प्रताप-उत्कर्षेऽप्य् अमर्ष इति तत् पृच्छामि, किं व्यवस्थित-विषयः क्षात्र-धर्म इति ?

सुमन्त्रः—नैव खलु जानामि दैवम् ऐक्ष्वाकं येन एवं वदसि ! तद् विरमाप्रसङ्गात् ।

सैनिकानां प्रमाथेन सत्यम् ओजायितं त्वया ।
जामदग्न्यस्य दमने न हि निर्बन्धम् अर्हसि ॥३२॥

लवः—(सहासम्) आर्य ! जामदग्न्यस्य दमनः स राजा इति कोऽयम् उच्चैर् वादः ?

सिद्धं ह्य् एतद् वाचि वीर्यं द्विजानाम्,
बाह्वोर् वीर्यं यत् तु तत् क्षत्रियाणाम् ।

Śloka **31**.—Metre : Śālinī,

Kāmān duh—this is usual expression for that which grants everything, like the mythical cow—Kāma-dhenu—*which fulfils all the desires.* Comparison of the Word to the cow is quite traditional Cf. Br. ār. Up. V, 8, 1 वाचं धेनुम् उपासीत. Also Chā. Up. 1, 3, 7 etc.. दुग्धे ऽस्मै वाग् दोहम्. also Nirukta 1, 20. नास्मै कामान् दुग्धे वाग्दोह्यान् देव- मनुष्यस्थानेषुयो वाचं श्रुतवान् भवत्य् अफलाम् अपुष्पाम् ।

Sūnṛta—A classical epithet of the Word (Vāk) meaning : *agreeable and true*, the last being on the analogy of the word an-ṛta—*lie cow* ... *the milching action*

It fulfils our desires, removes dishonour, engenders fame, destroys sinful acts ; it is that the benevolent and truthful Speech whom the sages call the mother of benedictions, the Cow—the Foster-Mother. 31.

Sumantra—He is thoroughly pure by nature—this boy, the desciple of Vālmīki. He speaks in a perfect way as some one who has received a saintly education.

Lava—And, since, O Candraketu, you ask why this susceptibility regarding the pre-eminet glory of your father, I will ask you : "Why then the law of the Kṣatriya would be limited to its application ?"

Sumantra—If you speak thus, it is clear that you do not know the king—the descendant of Ikṣvāku. Restrain, therefore, from excess of passion.

In massacring the soldiers, you have in reality displayed your valour, but it does not befit you at all to attack the vanquisher of Jāmdagnya (Paraśurāma).

Lava—(*Smiling*) You say this king is the vanquisher of Jāmadagnya. But, what, a boastful is your speech!

It is a fact that in his speech lies the force of the Brāhmaṇas. But it lies in the power of (two) arms of

---

of the cow (Cf. Rg. VIII, 14. 3). धेनूः .. सूनृता III, 31, 18. सूनृतानां गिराम् ।

आर्षः (समासः):—ऋषेः अयं आर्षः ।

Śloka 32.—Metre : Anuṣṭubh.

Ojāyita—Passive Past Participle from the denominative verb 'ojāyate'—ओजस्वी इव आचरति इति ओजायते ।

Jāmadagnya—Son of Jamadagni and descendant of Bhṛgu—Paraśurāma.

Śloka 33—Metre : Śālinī (See Act, I, 2).

शस्त्र-ग्राही ब्राह्मणो जामदग्न्यस्,
तस्मिन् दान्ते का स्तुतिस् तस्य राज्ञः ? ॥३३॥

चन्द्रकेतुः—(सोन्मादम् इव) आर्य ! सुमन्त्र कृतम् उत्तरोत्तरेण !

कोऽप्य् एष सम्प्रति नवः पुरुषावतारो,
वीरो न यस्य भगवान् भृगुनन्दनोऽपि ।
पर्याप्त-सप्त-भुवनाभय-दक्षिणानि,[1]
पुण्यानि तात-चरितान्य् अपि यो न वेद ॥३४॥

लवः—को हि रघुपतेस चरितं महिमानं च न जानाति ? यदि नाम किंचिद् अस्ति वक्तव्यम् ! अथवा शान्तम् !

वृद्धास् ते न विचारणीय-चरितास् तिष्ठन्तु किं वर्ण्यते,
सुन्दर[2]-स्त्री-मथनेऽप्य् अकुण्ठ-यशसो लोके महान्तो हि ते ।

Cf. Manu XI 33-34.

वाक् शस्त्रं वै ब्राह्मणस्य तेन हन्याद् अरिं द्विजः ।
क्षत्रियो बाहुवीर्येण तरेद् आपदम आत्मनः ।

Lava is indirectly speaking the words of Yājñavalkya in Satapatha Br. who proclaims that the Brāhmṇas do not gain much glory in defeating a Kṣatriya in a discussion (Stchoupak n 108).

Śloka 34.—Metre : Vasanta-tilaka See I, 7,

1. पर्याप्त इत्यादि (समासः):—पर्याप्ता सप्त भुवनस्य अभयः एव दक्षिणा येषु ।

Śloka 35.—Metre : Śārdūlavikrīḍitam (See P. 54).
Allusions :

2. Sunda-strī—Tāṭakā- The Sāstras forbid the disfigurement of a woman under the penality of getting an outcaste, (Cf, Manu XI, 67 and 191). Rāma was

the Kṣatriya. The son of Jamadagni who took rams was a Brāhmaṇa. Having triumphed over him, what glory is for that King? (33)

Candraketu—(*With some agitation*)—Noble Sumantra, enough of these altercations.

Who is that new Man-Incarnation for whom the venerable son of Bhṛgu is not a hero and who does not know my father's boy-exploits which gave ample security to the seven worlds? (34)

Lava—Why, who does not know the exploits and greatness of the King of the Raghus? Nevertheless there is someting to be said, or rather I would keep quiet.

Those elders, whose actions are not to be disputed upon, let them stay. Why speak about them? Having killed even the wife of Sunda (Tāṭakā) *their honour is not*

---

taken to task by Murāri in his play Anargha Rāghava : for this acts of taking backwards steps when he says :

गुर्वादेशाद् एव निर्मीयमाणो ।

नाधर्माय स्त्रीवधोऽपि स्थितोऽयं ।

Attacked by Khra, Rāma took two or three step backwards. अपसरद्‌ द्वित्रिपदम् । This was contrary to the war-regulations prescribed for a Kṣatriya.

(Cf. Manu , 87, 89 Gaut. X, 16.)

पराङ्मुखवधं कृत्वा कोऽत्र प्राप्तस् त्वया गुणः ।
यदहं युद्ध-संरब्धस् त्वत्कृते निधनं गतः ।। रामा. किष्कि.१७ १६

यत्स्यादनुचितं वस्तु नायकस्य रसस्य वा ।
विरुद्धं तत्परित्याज्यम् अन्यथा वा प्रकल्पयेत ।
अनुचितमिति वृत्तं यथा रामस्य छद्मनः बालिवधः ।।

यानि त्रीण्य् अपराङ्-मुखान्य् अपि पदान्य् आसन् खरायोधने
यद्वा कौशलम् इन्द्र-सूनु-निधने तत्राप्य् अभिज्ञो जनः ॥३५॥

चन्द्रकेतुः—आः ! तातापवादः ! भिन्न-मर्याद ! अति हि नाम प्रगल्भसे !

लवः—अये ! मय्य् एव भ्रुकुटी-धरः संवृत्तः ?

सुमन्त्रः—स्फुरितम् अनयोः क्रोधेन ! तथा हि—

चूडा-मण्डल-बन्धनं तरलयत्य् आकूतजो वेपथुः,
किं चित् कोकनद-च्छदस्य सदृशे नेत्रे स्वयं रज्यतः ।
धत्ते कान्तिम् अकाण्ड-ताण्डवितयो भङ्गेन वक्त्रं भ्रुवोश्,
चन्द्रस्योद्भट-लाञ्छनस्य कमलस्योद्भ्रान्त-भृङ्गस्य च ॥३६॥

कुमारौ—तद् इतो विमर्द-क्षमां भूमिम् अवतरामः ।

(इति निष्क्रान्ताः सर्वे)

इति "कुमार-विक्रमो" नाम पञ्चमोऽङ्कः

diminished—they are great in this world and the three steps of retreat at the time of the Combat with Khara, and his skill in the murder of the son of Indra—this all people know. (34)

Candraketu—Ah, slanderer of my father, transgressor of the limits, you are indeed very arrogant.

Lava—Ha, is he frowing at me ?

Sumantra—Their anger is ablaze!

A shudder born out of their emotion makes the knots of their coifure dangle about, resembling slightly the red-lotus, their eyes themselves become purple ; their faces, with knitting of the eye-brows, which suddenly begin to dance, exhibit the beauty of the moon with saliant spots or that of a lotus, over which the black-bees hover. (36)

The Prince—Let us then go to the suitable place for combat.

(*Exeuent all*)

End Act V

called.

"THE VALOUR OF THE PRINCES"

षष्ठोऽङ्कः

(ततः प्रविशति विमानेनोज्ज्वलं विद्याधर[1]-मिथुनम्)

विद्याधरः—अहो नु खल्व् अनयोर् विकर्तन-कुल-कुमारयोर् अकाण्ड-कलह-प्रचण्डयोर् उद्योतित-क्षात्र-लक्ष्मीकयोर् अत्य्-अद्भुतोद्भ्रान्त-देवासुराणि विक्रान्त-चरितानि । तथाहि प्रिये! पश्य, पश्य ।

झणज्झणित-कङ्कण-क्वणित-किङ्किणीकं धनुर्[2],
ध्वनद्-गुरु-गुणाटनी-कृत-कराल-कोलाहलम्[3] ।
वितत्य किरतोः शरान् अविरत्-स्फुरच्चूडयोर्,
विचित्रम् अभिवर्तते भुव न-भीमम् आयोधनम् ॥१॥
विजृम्भितं च दिव्यस्य मङ्गलस्य द्वयोर् अपि ।
स्तनयित्नोर् इवामन्द्र-दुन्दुभेर् दुन्दुमायितम् ॥२॥

तत् प्रवर्त्यताम् अनयोः प्रवीरयोर् अनवरतम् अविरल-ललित-विकच-कनक-कमल-कमनीय-संहतिर्[4] अमर-तरु-तरुण-मणि-मुकुल निकर-मकरन्द-सुन्दरः[5] पुष्प-निपातः ।

Scene : The scene of the VI Act is laid in the neighbourhood of Vālmīki's hermitage and the incidents follow those narrated in the preceding Act. It has been said in the Nāṭyaśāstra that the war-scenes are not be represented on the stage, hence the description of the combat between the young heroes is put in the mouth the Vidyādhara-couple.

1. Vidyādhara—A sort of celestial beings endowed with the magical powers of soaring in the sky—rather they are the spirits of the air.

Śloka—1 Metre: Pṛthvī. Pāda of 17 sylables, pause after the 8th.

4-5. (See p. 248)

(*Enter in the aerial-car a couple of resplendent Vidyādharas.*)

Vidyadhara—Oh, the heroic adventures of these two Princes of the race of Sun! Attracted by the unforeseen combat, blazing with warrior-splenders, they excite wonder and bewilderment of the gods and demons alike. Therefore, my darling, look, look!

Witht their reverberating bow, like the jingling of a bracelet tinkling of the bells, and the terrible fracas of the horns booming under the heavy chord, they strech it scattering their arrows and thus making their locks incessently dangle about; marvellous and frightening the universe, their combat goes on.

And, here it thunders announcing the welfare of both, like that of the cloud and the boom of the celestial drum (2).

Let us, therefore, discharge continually on both of them a rain of flowers—heaps of golden lotuses, thickly grown, adorably blossomed, which the nectar of a profusedly tender jewel-buds of the celestial tree, embellishes with its beauty.

जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ।

जगण सगण जगण सगण यगण ल० गु०

I S I   I I S   I S I   I I S   I S S   I S

झणज्झ णितक ङ्कणक णितकि ङ्कणीक धनुः

2. झणज्झणित-इत्यादि—(समासः)—झणज्झणितस्य-कङ्कणस्य इव कणितम् यासां ताः झणज्झणित-कङ्कण-कणिताः ता एव किङ्कण्याः यस्य तत् ।

3. ध्वनद्—इत्यादि (समासः)—ध्वनन् गुरुः गुणः यस्य सा ०गुणा तद्भूता या अटनी, तया कृतः करालः कोलाहलः यस्मिन् तत् । (अथवा) ध्वनन्त्या गुर्व्या गुणाटन्या कृतः करालः कोलाहलः यस्मिन् तत् ।

विद्याधरी—ता किं ति उण अआण्ड-विप्फुरिद-तडिच्छडा-कडारं विअ अम्बरं झत्ति संवुत्तम् ?

[तत् किम् इति पुनर् अकाण्ड-विस्फुरित-तडिच्छटा-कडारम् इव अम्बरं झटिति संवृत्तम ?]

विद्याधरः—तत् किं नु खल्व् अद्य—

त्वष्टृ-यन्त्र-भ्रमि-भ्रान्त-मार्तण्ड-ज्योतिर्[1] उज्ज्वलम् ।
पुट-भेदो ललाटस्थ-नील-लोहित-चक्षुषः ॥३॥

आं ज्ञातम ! जात-क्षोभेण चन्द्रकेतुना प्रयुक्तम् अस्त्रम्, आग्नेयम्[2] यस्य अयम अग्नि-च्छटा-संपातः । संप्रति हि—

अवदग्ध-कर्बुरित-केतु-चामरैर्[3],
अपयातम् एव हि विमान-मण्डलैः,
दधति ध्वजांशुक-पटाञ्चलेष्व् इमाः,
क्षण-कुङ्कुम-च्छुरण-विभ्रमं शिखाः ॥४॥

अविरल—(समासः)—अविरलं ललितानां विकचानां कनक-कमलानां कमनीया संहतिः यस्मिन् स तथोक्तः ।

अमर तरु-इत्यादि (समासः)—अमरतरूणां तरुणाः, मणिमुकुलाः तेषां निकरः तस्य मकरन्देन सुन्दरः यः स तथोक्तः ।

Verse 3 Metre: Anuṣṭubh. Tvaṣṭṛ-yantra—The allusion is to the Vulcan of Hindu mythology who had a son names Triśras and the daughter called Sanjñā who was given in marriage to the Sun. As she was unable to bear the severe light of her husband, therefore, Tvaṣṭṛ mounted the Sun upon his lathe and carefully trimmed off the part of his bright disc of. आरोप्य चक्रभ्रममुष्णतेजास्त्वष्ट्रेव पलोल्लिखितो विभाति । (Raghu. 6,32.) The part trimmed off is said to be have been used by him in forming the discu of Viṣṇu, the Triśūla of Śiva and some weapons o the gods.

Vidyadhari—But why then, the sky suddenly seems to be clothed in yellow, as though, streaks of lightening have suddenly burst forth?

Vidyādhara—

Is it that today......

Dazzling like the luster of the Sun which moves as the turning wheel of the Tvaṣṭṛ *the lid of the eye of* Śiva *set in his forehead, is going to open ?* (3)

Yes, I know, excited, Candraketu, has made use of the fire-arms. This is a shower of the flood of flames. And now—,

With their banners and chauris (fly-flaps) purpled and tainted, here flies away the sqadron of ærial-cars; on the frings of their banner-cloth, the luster of the fire has the fugitive appearance of the sandal-paint. (4)

त्वष्ट्र-इत्यादि (समासः)—त्वष्टुः यन्त्रं तस्य भ्रम्या भ्रान्तः यः मार्तण्डः तस्य ज्योतिरिव उज्ज्वलः यः स तथोक्तः ।

A smilar description of the combat between Vasiṣṭha and Viśvāmitra with magical armaments is met with in Rāmāyana I. S 6 also between Lakṣmaṇa and Meghanāda in Balrāmayaṇa VII 48 49.

2. आग्नेयम्—अग्नि देवता अस्य इति आग्नेयम् ।

The simile is: The sky is represented as the opening of the eye of Siva which again is compared to the lustre of the Sun. The third eye in the forehead of the Śiva is said to be always closed. It opens only to bring devastation. The cupid was burnt down with the fire of the same eye.

Verse 4—Metre: Mañjubhāṣiṇī See P. 26.

3. अवदग्ध-इत्यादि (समासः)—अवदग्धानि कर्बुरितानि केतुचामराणि येषां ते तैः ।

आश्चर्यम् ! प्रवृत्त एवायम् उच्चण्ड-वज्र-खण्डावस्फोट-पटु-रटत-स्फुलिङ्ग-गुरुर्[1] उत्ताल-तुमुल-लेलिहानोज्ज्वल-ज्वाला-संभार-भैरवः[2] भगवान् उषर्बुधः[3] । प्रचण्डश् च अस्य सर्वतः सन्तापः । तत् प्रियाम् अङ्गेनाच्छाद्य सुदूरम् अपसरामि । (तथा करोति)

विद्याधरी—दिट्ठिआ एदेण विमल-मुत्ताफलअ-सीअल-सिणिद्ध मसिण-मंसलेण णाह-देह-प्फंसेण आणन्द-मंद-मुउलिद-घुण्णन्त-लोअणाए अप्पोदिदो एव्व अन्दरिदो मे संदावो ।

[दिष्ट्या अनेन विमल-मुक्ताफल-शीतल-स्निग्ध-मसृण-मांसलेन नाथ-देह-स्पर्शेनानन्द-मुकुलित-घूर्णमान-लोचनाया अल्पोदित एवान्तरितो मे सन्तापः ।]

विद्याधरः—अयि ! किम् अत्र मया कृतम् ? अथवा
न किंचित् अपि कुर्वाणः सौख्यैर् दुःखान्य् अपोहति ।
तत् तस्य किम् अपि द्रव्यं यो हि यस्य प्रियो जनः ॥५॥

विद्याधरी—कहं अविरल-विलोल-घुण्णमाण-विज्जुल्लदा-विलास-मडिदेहिं मत्त-मोर-कण्ठ-सामलेहिं ओत्थरीअदि णहत्थलं जलहरेहिं ।

[कथम् अविरल-घूर्णमान-विद्युत्-लता-विलास-माण्डतैर्[4] मत्त-मयूर-कण्ठ-श्यामैर् अवस्तीर्यते नभस्तलं जलधरैः ।]

---

1. उच्चण्ड—इत्यादि (समासः)—उच्चण्डः वज्रखड्गावस्फोटः तद्वत् पटु (तीक्ष्णः) रवः येषां त एव स्फुलिङ्गाः तैः गुरुः यः स तथोक्तः ।

2. उत्ताल—इत्यादि (समासः)—उत्तालाः तुमुलाः तथा च लेलिहानाः उज्ज्वलाः ज्वालाः तेषां संभारः तेन भैरवः यः स तथोक्तः

3. उषर्बुध :—is a Rgvedic word उषसि बुध्यते—*Kindled at the down.*

4. अविरल—इत्यादि (समासः)—अविरला विलोला घूर्णमाना विद्युल्लता तस्याः विलासैः मण्डिताः ये ते तैः ।

How marvellous ! What a loads of sparks with terrific crepitation like the burst of violent thunderbolt !—what a terrific accumutlation of flickering and voracious flames full of terrific fracas ! What a terrible display of the venerable fire ! Screening my beloved under my arms, I am going to retire afar. (*He retires*).

Vidyādharī—O what a joy, at the contact of the body of my husband, with its fresh muscles, glistening and glossy like the faultless pearl, my troubled eyes are gently closing out of bliss,—here the scorching heat that had begun to overpower, is keeping off.

Vidyādhara—Ah, what have I done to her ?

He has not done anything and, yet, thanks to him, felicity banishes sorrow,—what an ineffable treasure is the possession of a beloved one ! (5)

Vidyādharī—Ah, what ! the sky is covered with dark clouds resembling the neck of a peacock intoxicated with love and embellished with the lustre of the creeper-like lightening which incessently flashes and reverberates !

प्रलय–इत्यादि (समासः)—प्रलये या वातावलिः तया क्षोभः तेन गम्भीराः गुलगुलायमाना च मेघाः तैः मेदुरः यः अन्धकारः तेन नीरन्ध्रं यथास्यात्तथा रुद्धं च इव ।

एकवार–इत्यादि (समासः)—एकवारं विश्वस्य ग्रसनेन विकटं विकरालं कालस्य मुख-कन्दरे विवर्तमानम् इव ।

Yoga Nidrā—Total absorption of the spirit—a concenteated meditation as profound as the sleep, particulary that of Viṣṇu at the end of the *cosmic yuga.*

विद्याधरः—हन्त, कुमार-लव-प्रयुक्त वारुणास्त्र-प्रभावः खल्वेषः- कथम् अविरल-प्रवृत्त-धीरधारा-सहस्र-सम्पातैः प्रशान्तम् एव पावकास्त्रम् ?

विद्याधरी—पिअं मे पिअं मे [प्रियं मे प्रियं मे]

विद्याधरः—हन्त हन्त भोः ! सर्वम् अतिमात्रं दोषाय । यत् प्रलय-वातावलि-क्षोभ-गम्भीर-गुलगुलायमान-मेघ मेदुरितान्धकार-नीरन्ध्र-रुद्धम्[1] इव एकवार-विश्व-ग्रसन-विकट-विकराल-काल-मुख-कन्दर-विवर्तमानम्[2] इव युगान्त-योग-निद्रा[3]-निरुद्ध-सर्वद्वार-नारायणोदर-निविष्टम् इव भूत-जातं प्रवेपते । साधु, चन्द्रकेतो ! साधु ! स्थाने वायव्यम् अस्त्रम् ईरितम् । यतः—

विद्या-कल्पेन मरुता मेघानां भूयसाम् अपि ।
ब्रह्मणीव विवर्तानां क्वापि विप्रलयः कृतः ॥६॥

विद्याधरी—णाध, को दाणिं एसो ससंभमुक्खित्तकरब्भमिदोत्तरिआञ्चलो दूरदो एव्व महुर-सिणिद्ध-वअण-पडिसिद्ध-जुद्ध-व्वावारो एदाणं कुमाराणं अन्दरे विमाण-वरं ओदरावेदि ।

[नाथ ! क इदानीम् एष ससंभ्रमोत्क्षिप्त-कर-भ्रमितोत्तरीयाञ्चलो दूरत एव मधुर-स्निग्ध-प्रतिषिद्ध-युद्ध-व्यापार एतयोः कुमारयोर् अन्तरे विमानवरं अवतारयति ।]

विद्याधरः—(दृष्ट्वा) दिष्ट्या ! एष शम्बूक-वधात् प्रतिनिवृत्तो रघुपतिः ।

(1. 2. 3.—See P. 251)

Śloka 6—Metre: Anuṣṭubh. The allusion is to the docrrine of Vedanta. Vidya—the sicence par excellence—the knowledge of the true nature of the Brahma[illegible] Reality. Kale points out that the word. *Vivarta* is used in the technical sense of

Vidyādhara -Oh yes. it is the powerful effect of *Varunic* arms which the prince Lava has made use of : Ah, what ! here is the non-stop detach of the torrent of rain which totally extinguish the fire-arms.

Vidyādharī—I like that, I like that !

Vidyādhara—Well, well, oh, all that crosses the limit becomes an evil. For —they are surrounded all over with darkness rendered thick by the clouds which roar under the shock of the series of winds of destruction, as if, they have rolled into this cavern —the jaws of the terrible Kāla, wide open to devour, with one gulp, the entire universe; as if, they have plunged into the belly of Nārayana, where, having closed all the limbs of his body, he has given himself up to deep slumber, at the end of a *Yuga* it seems that all the beings begin to tremble. Well done ! Candraketu, well done ! It was quite the time when you should let loose the arrows of the wind ! for—

Just as the science operates the dissolution in the Spreume Being of different forms, in the same way the wind has dispersed numerous clouds to unknown regions. (6

Vidyādharī—My lord, who is that person, who, precipitating round and round the lappet of his outer garment, with the wave of his hand showing his agitation, and with his sweets and affectionate words, stopping, from afar, the combat between the two princes is desending amongst them.

Vidyādhara—(*Seeing carefully*)—This is the lord of the Raghus, and has just returned from killing Śambūka.

---

the Māyāvāda—*materialism*, according to which the world is nothing but an allusion, which could be expelled by the correct knowledge of the Brahman—the extreme Reality. (Cf. Kane notes 165).

शान्तं महापुरुष-संगदितं निशम्य,
तद् गौरवात् समुपसंहृत-संप्रहारः ।
शान्तो लवः प्रणत एव च चन्द्रकेतुः
कल्याणम् अस्तु सुत-सङ्गमने राज्ञः ॥७॥

तदितस् तावद् एहि । (इति निष्क्रान्तौ)

मिश्र-विष्कम्भकः ।

(ततः प्रविशति रामो लवः प्रणतस् चन्द्रकेतुः)

रामः—(पुष्पकाद् अवतरन्)

दिनकर-कुल-चन्द्र ! चन्द्रकेतो !
सरभसम् एहि दृढं परिष्वजस्व ।
तुहिन-शकल-शीतलैस् तवाङ्गैः,
शमम् उपयातु ममापि चित्त-दाहः ॥८॥

(उत्थाय सस्नेहास्रं परिष्वज्य) अपि नाम कुशलं तव दिव्यास्त्र-धर देहस्य ।

चन्द्रकेतुः—कुशलम् अत्य् अद्भुत-क्रियस्य प्रियदर्शनस्य लवस्य लाभाभ्युदयेन । तद् विज्ञापयामि माम् इव विशेषेण वा मत्तः-स्निग्धेन चक्षुषा पश्यत्व् अमुं महावीर-प्रकाण्डं तातः ।

रामः—(लवं निरूप्य) दिष्ट्या-अति-कल्याणा कृतिर् अयं वयस्यो वत्सस्य ।

त्रातुं लोकान् इव परिणतः कायवान् अस्त्रवेदः
क्षात्रो धर्मः श्रित इव तनुं ब्रह्म-कोषस्य गुप्त्यै ।
सामर्थ्यानाम् इव समुदयः सञ्चयो वा गुणानाम्
आविर्भूय स्थित इव जगत् पुण्य-निर्माण-राशिः ॥९॥

Verse 7—Metre ; Vasanta—tilaka (See P. 11.)

Verse 8—Metre : Puṣpitāgrā (See IV, 4) There is a pun upon the name candraketu. *Candra* indicates a power which soothes the mind.

Having heard the appeasing words of the great hero, here, out of respect for him, the combat is suspended. Lava is calmed and Candraketu is bowing humbly. May the reunion with sons bring prosperity to the King! (7)

Come let us go now. (*Exeuent*).

End of the mixed Enterlude

(*Enter Rāma, Lava and Candraketu in a state obeisance*)

Rāma—(*getting down from the Puṣpaka*) *O moon of the race of the Sun—Candraketu, come with a sptrited dash and clasp me closely. May your fresh limbs like the fluxes of snow, extinguish the fire which is burning my heart!* (8)

(*Raising and kissing him with tears of tender affection*)

Are you doing well? You—who carry Divine arms on your person?

Candraketu—I am well, thanks to having a good luck of meeting of wonderful exploits and handsome-looking Lava. I, therefore, request my dear father to look upon with an affectinate favour, as he has upon me, or even more than myself, on this eminent hero.

Rāma (*observing Lava*) It is a great satisfaction to see the friend of my dear child, graciously auspicious as he is.

In order to protect the people, he seems to incorporate a consumanate Art of Arms. The law of the worriers has taken refuge, as it were, in his body in order to guard the treasure of the Veda; as though born of the Power itself, he is an assemblage of virtues; or as though in a visible form, he is an aggregation of merits which the universe has ever produced. (9)

Figure—Laṭānuprāsa—*A significant repetition of the words.*

Verse 9—Metre: Mandākrantā. This verse contains 5 metaphors (utprekṣā). This verse occurs in Mahā. V. Ch. where Paraśurāma pronounces it at the sight of Rāmacandra

लवः—(स्वगतम्) अहो पुण्यानुभाव-दर्शनोऽयं महापुरुषः !
आश्वास-स्नेह-भक्तीनाम् एकम् आलम्बनं महत् ।
प्रकृष्टस्येव धर्मस्य प्रसादो मूर्ति-सञ्चरः ॥१०॥
आश्चर्यम् !
विरोधो विश्रान्तः प्रसरति रसो निर्वृति-घनः,
तद् औद्धत्यं क्वापि व्रजति विनयः प्रह्वयति माम् ।
झटित्य् अस्मिन् दृष्टे किम् अपि परवान् अस्मि यदि वा,
महार्घस् तीर्थानाम् इव हि महतां कोऽप्य् अतिशयः ॥११॥

रामः—तत किम् अयम् एकपद एव मे दुःख-विश्रामं ददात्य् उपस्नेहयति च कुतोऽपि निमित्ताद् अन्तरात्मानम् । अथवा स्नेहश् च निमित्त-सव्यपेक्ष इति विप्रतिषिद्धम् एतत्—

व्यतिषजति पदार्थान् आन्तरः कोऽपि हेतुर्,
न खलु बहिर् उपाधीन् प्रीतयः संश्रयन्ते ।
विकसति हि पतङ्गस्योदये पुण्डरीकम्,
द्रवति च हिमरश्माव् उद्गते चन्द्रकान्तः ॥१२॥

Verse 10—Metre : Anuṣṭubh. *Campare.*

तुरीयो ह्येष मेध्याग्निर् आम्नायः पञ्चमोऽपि वा
अथवा जङ्गमं तीर्थं धर्मो वा मूर्तिसञ्चरः ॥ महावीर० १. १०

Śloka 11.—Metre: Śikhariṇī (see I, 28). This verse has been cited by Daśarūpaka (I, 42) as an example of Śakti—(*power*) which pacifies hostility (Virodha-śamana), and also by Sarasvati Kaṇṭhābharaṇa (V. 178). For Yamaka—*Syllabic Assonance*, (*e.g.*, 'प्रसरति रसो', 'व्रजति विनयः', 'अस्मिन्…अस्मि', महार्घः…… महताम्, this stanza has been highly appreciated by the commentrators and is, therefore, a fine piece of poetry.

Lava—Oh, how saintly and powerful expression has this hero!

Of confidence, love, emotion, he is the sole and grand receptacle. One would believe to be observ ng in him a Favour incarnate of Dharma moving about. (10)

How marvellous!

Hostility being ceased, he spread in me a sentiment of integral blessing. Arrogance having departed somewhere, respect makes me humble. Suddenly, while seeing him, I do not know why I am subjugated, or else, it would be that the great men, like the sacred places, have some inestimable excellence in them. (11)

Rāma—How is it that he procures me some appeasement to my sadness and at the same time for some reasen, fills my heart with affection, or rather not, affection and "to be dependant on reason", both are contradictory terms.

It is the same internal cause which bindes the object together; certainly it is not the external conditions that the affection depends upon: The lotus, in fact, blossomes at the rising of the sun, but the moon-stone melts only when the cool-rayed moon shines. (12).

औद्धत्यम्—उद्धतस्य भावः औद्धत्यम्।

Grammatical Note :—Upasnehayati.—Denominatve Verb from √Sneh with Upa. This word is found only in Anargha Rāghava and has not been attested elsewhere.

Śloka 12.—Metre Mālini (see p. 33). This verse is also found in Mālati-Mādhava (I. 27). In the first Hemistiche, some scholastic terms are mentioned: पदार्थः, हेतुः, उपाधिः and the 2nd gives a figure called अर्थान्तरन्यासः—*The poetic illustration.*

Grammatical Note :—Vyatiṣijati—3rd Per. sg. from √Vi+ati+sanj—*to link together.*

लवः—चन्द्रकेतो ! क एते ?

चन्द्रकेतुः—प्रियवयस्य ! ननु तातपादाः ।

लवः—ममापि तर्हि धर्मतस् तथैव यतः प्रियवयस्येति भवतोक्तम् । किम् तु चत्वारः खलु भवन्त्य् एवं-व्यपदेश-भागिनस् तत्र भवन्तो रामायण-कथा-महापुरुषाः । तद् विशेषं ब्रूहि ।

चन्द्रकेतुः—ननु ज्येष्ठ-तातपादा इत्य् अवेहि ।

लवः—(सोल्लासम्) कथं रघुनाथ एव । दिष्ट्या सुप्रभातम् अद्य यद् अयं देवो दृष्टः ।

(सविनय-कौतुकं निर्वर्ण्य) तात ! प्राचेतसान्तेवासी लवोऽभिवादयते ।

रामः—आयुष्मन् . एह्य् एहि । (इति सस्नेहम् आलिङ्ग्य) अयि वत्स ! कृतम् कृतम् अतिविनयेन । अनेकवारम् अपरिश्लथं परिष्वज्वस्व माम् ।

परिणत-कठोर-पुष्कर-गर्भ-च्छद-पीन-मसृण-सुकुमारः[1] ।
नन्दयति चन्द्र-चन्दन-निष्पन्द-जडस् तव स्पर्शः ॥१३॥

Śloka 13.—Metre: Aryā (see III, 41). This is a mātrā (mores) metre, where one line is of 30 mores. and a pause after the 12th. The second line is of 27 mores and the pauses after the 12th and the 20th. Ordinarily 4 matras form a Gaṇa. So, after the 5th Gaṇa of the 2nd, line there is a *Laghu*—a short syllable.

First Line—

४ ४ ४ ६ ३ ४ ५=३०
। । । । । ॥ । ॥ । । । ॥ ॥ । । । ॥ । ॥ । । । । । ॥ ।
परिणत-कठोर-पुष्कर-गर्भच्छद-दीन-मसृण-सुकुमारः ।

Lava—Who is he?

Chandraketu—Well, dear friend, he is my respectful father.

Lava—And mine also, according to Law, since you are addressing me your dear friend. But are there not only four honorable heroes of the Rāmāyana who have the right to similar appallation? Please explain.

Chandraketu—You should know that he the eldest of my fathers.

Lava—(*With respectful joy*). What! the head of the Raghus himself? What a good luck! The day of today has dawned in an aususpicius moment, since I have seen the king. (*Looking at him with respectful curiosity*) Father. Lava—the disciple. of Vālmīki salutes you.

Rama—Come dear boy come! (*He embraces him tenderly*) Well, my boy, away with all these excessive formalities. Embrace me closely, again and again.

Like the developped interior petal of full-blossomed lotus—plump, mellow and delicate. cool like the juice of sandal or of the moon—your contact brings to me the hight of felicity. (13).

2nd Line—

५ ३ ४ ५ ३ ३ ४

॥ । । । ॥ । ॥ । । ॥ ॥ । ॥ । । ॥ ॥ ॥ =२७

नन्दयति चन्द्र-चन्दन, निष्पन्द-जडस्, तव स्पर्शः ॥

In accordance with Indian metrical classification Aryā metre is the ardhasamvṛtta *half-symetric.*

1. परिणत-कठोर इत्यादि (समासः)—परिणतस्य कठोरस्य पुष्करस्य गर्भच्छदः तद्वत् पीनः मसृणः सुकुमारश्च यः स तथोक्तः ।

लवः—(स्वगतम्) ईदृषो मां प्रत्य् अमीषाम् अकारणास्नेहः। मया पुनर् एभ्य एवाभिद्रुग्धम्[1] अज्ञानेन यद् आयुध-परिग्रहं यावद् अध्यारूढो दुर्योगः। (प्रकाशम्) मृष्यत्व् इदानीं लवस्य बालिशतां तातपादाः।

रामः—किम् अपराद्धं वत्सेन ?

चन्द्रकेतुः—अश्वानुयात्रिकेभ्यस् तात-प्रताप-आविष्करणम् उपश्रुत्य वीरायितम्[2] अनेन।

रामः—नन्व् अयम् अलङ्कारः क्षत्रिस्य।

न तेजस् तेजस्वी प्रसृतम् अपरेषां विषहते,
स तस्य स्वो भावः प्रकृति-नियतत्वाद् अकृतकः।
मयूखैर् अश्रान्तं तपति यदि देवो दिनकरः,
किम् आग्नेयो ग्रावा[3] निकृत इव तेजांसि वमति ॥१४॥

---

1. **Gram. Note—Abhidraugdha**—Used with dative contrary to the rule of Paṇini क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रतिकोपः (I. 4. 37). Mme. Stchoupak says that Kaṇa's reading '*drogdhum*' seems to be the correction of the Editor. Kane, on the other hand does not regard our reading "abhidrugdha" correct on the ground that the meaning of '*duryoga*' is not quite clear, and that '*ebhyah abhidrugdham*' is incorrect. But such poetic licences we find elsewhere too. *Cf*. Bhāgvat Purāṇa, IV. 20.3. नाभिद्रुह्यति भूतेभ्यः" The variation quoted by Kale is '*abhidrogdhum*.' We have adopted the reading of Mme. Stchoupak.

2. **Vīrāyitam**—This denominative is inattested elsewhere except as an erotic term (*cf*. Mme. Stchoupak p. 118 n.).

Past Participle from denominative "Vírāyate" (वीरवत् आचरति इति)

Śloka 14—Metre: Vasanta-tilaka. (See p. 11)

Lava—(*Aside*). Such a disinterested affection towards me by such an august personage! And, me an arrongant fellow, I have treated him like enemy and my wickedness has gone to the degree of taking up arms against him? (*Loudly*) Let my august father pardon the stupidity of Lava.

Rāma—What fault did my boy commit?

Candraketu—Having heard the guards of the horses proclaim the glory of my august father, he has followed his heroic bent.

Rāma—Well, it is an ornament for a Kṣatriya.

The chivalerous man does not know to tolerate the chivalery spread by the others. Therein lies his own characters: there is no ficticiousness about it, for, it is engendered in his nature; just as, with its rays, if the Sun-god untiringly inflames the fire-stone, like an humiliated one, does it not pour out the rays? (14).

---

3. Āgneyarāva—called; Sūryakānta-maṇi-Śila.—a variety of cristal-rock, of which it is said that it vomits flames when brought into contact with the rays of the sun. It is also called 'agnikārikā' or (inakānta' elsewhere (See Navaratna Prakāśa 115)

Compare the idea in Bhartṛhari's Nitiśataka 37

(१ यदचेतनोऽपि पादैः स्पृष्टः प्रज्वलति सवितुरिनकान्तः ।

तत्तेजस्वी-पुरुषः परकृत-निकृतिं कथं सहते ॥

Compare also: Kirātārjunīya II 21 for the 1st Hemistiche.

(२) किमपेक्ष्य फलं पयोधरान् ध्वनतः प्रार्थयते मृगाधिपः ।

प्रकृति खलु सा महीयसः सहते नान्य-समुन्नतिम् ॥

Also compare Siśupāla-Vadha II, 31

तृप्तियोगः परेणापि महिम्ना न महात्मनाम् ।

Figure—Arthāntara-nyāsa.

चन्द्रकेतुः—अमर्षोऽप्य् अस्य एव शोभते महावीरस्य। पश्यन्तु हि तातपादाः प्रियवस्य-नियुक्त-जृम्भकास्त्र-निष्कम्पस्तम्भितानि सर्वतः सैन्यानि।

रामः—वत्स ! लव ! संह्रियताम् अस्त्रम्। त्वम् अपि चन्द्रकेतो ! निर्व्यापार-विलक्षितानि सान्त्वय बलानि।

लवः—यथाज्ञापयति तातः। (इति प्रणिधानं नाटयति)

चन्द्रकेतुः—यथादिष्टम्। (इति निष्क्रान्तः)

लवः—तात ! प्रशान्तम् अस्त्रम्।

रामः—वत्स ! सरहस्य-प्रयोग-संहाराण्य् अस्त्राण्य् आम्नायवन्ति[1]।

ब्राह्मादयो ब्रह्म-हिताय तप्त्वा,
परः-सहस्राः शरदस् तपांसि
एतान्य् अपश्यन् गुरवः पुराणाः
स्वान्य् एव तेजांसि तपोमयानि ॥१५॥

अथैताम् अस्त्र-मन्त्रोपनिषदं भगवान् कृशाश्वः परःसहस्र-संवत्सरान्तेवासिने कौशिकाय प्रोवाच। स तु भगवान् मह्यम् इत्य् एष गुरु-पूर्वानुक्रमः। कुमारस्य कुतः संप्रदाय इति पृच्छामि ?

लवः—स्वतः प्रकाशान्य् आवयोर् अस्त्राणि।

रामः—(विचिन्त्य) किं न संभाव्यते ? प्रकृष्ट-पुण्य-परिपाकोपादानः कोऽपि महिमा स्यात्। द्विवचनं तु कथम् ?

लवः—भ्रातराव् आवां यमौ।

रामः—स तर्हि द्वितीयः कः ?

(नेपथ्ये)—दण्डायन[2] !

---

1. Amnāya-vant—This adj. is inattested elsewhere. Śloka 15 is the same as I, 15.

Candraketu—Even his irritation seems to be that of great hero. Let my father look : the Jṛmbhaka arrows which my dear friend has made use of, have, from, all sides, immobillised and plunged our troups into a stupour.

Rāma—My dear Lava retrace your arms, and you Candraketu, recomfort the stupified forces from their inertia.

Lava—As my father commands ! (*Gesticulates attitude of meditation*).

Candraketu—To your orders ! (*Goes out*).

Lava—Father, the arms have been abated down.

Rāma—My dear boy, these arms, of whose employment and retracing are a great mystery, involve a traditional transmission.

The ancient Sires Brahmā and others, having practised, for the sake of preserving the sacred lore, austerities for more than 1000 years, saw them, as if they were the lustre of their own penance. (15).

Thereupon, tbe venerable Kṛśāśva revealed the mysterious Science of relative formulae of these arrows to the son of Kuśika who was his disciple for than 1000 years. This venerable passeed them on to me That was the old succession of their possessors. How had they been transmitted to the young warrior ! I ask you.

Lava—Spontaneously these arrows were revealed to two of us.

Rāma—(*After reflecction*) What is unsurmountable ? This might be perhaps some greatness caused by the ripening of some pre-eminent merits, But, why have you said "two." ?

Lava—We are twin brothers.

Rāma—Then, where is the second one ?

(*Behind the scenes*)—Daṇḍayana !

2. Daṇḍāyana appeared in the Prelude as disciple of Vālmīki.

आयुष्मतः किल लवस्य नरेन्द्र-सैन्यैर् ,
आयोधनं ननु किम् आत्थ सखे तथेति ।
अद्यास्तम् एतु भुवनेष्व् अधिराज शब्दः
क्षत्रस्य शस्त्र-शिखिनः शमम् अद्य यान्तु ॥१६॥

रामः—अथ कोऽयम् इन्द्र-मणि-मेचक-च्छविर् [1]
ध्वनिनैव बद्ध-पुलकं करोति माम् ।
नव-नील-नीरधर-धीर-गर्जित-
क्षण-बद्ध-कुड्मल-कदम्ब-डम्बरम् [2] ॥१७॥

लवः—अयम् असौ मम ज्यायान् आर्यः कुशो नाम भरताश्रमात् प्रतिनिवृत्तः ।

रामः—(सकौतुकम्) वत्स ! इत एवाह्वयैतम् आयुष्मन्तम् ।

लवः—एवम् । (इति परिक्रामति) (ततः प्रविशति कुशः)

कुशः—(साकूत-हर्ष-धैर्य धनुर् आस्फालयन्)

दत्तेन्द्राभय-दक्षिणैर् [3] भगवतो वैवस्वताद् आ मनोर् [4] ,
दृप्तानां दहनाय दीपित-निज-क्षत्र-प्रतापाग्निभिः [5] ।

Śloka 16—Metre: Śikhariṇī. (see I, 28). This speech was made at the cantonade, equivalent to Ākaśa-bhāṣita.

Śloka 17—Metre: Mañju-bhāṣṇī. (see P. 26). This verse is oft-quoted example of Bhavabhūti's skill of sound echowing the sense. *cf*. Mal. III. 7.
Figure: Upamā.

1. इन्द्र इत्यादि (समासः)—इन्द्र-मणिवत् मेचका (नीला) छविः कान्तिः यस्य ।

2. नव-नील इत्यादि (समासः)—नवस्य नीलस्य नीर-धरस्य (मेघस्य) यत् धीरं गर्जितं तस्य क्षणे बद्धाः कुड्मल-कदम्बाः तेषाम् इव डम्बरः (शोभा) यस्य तत् तथोक्तम् ।

Lava—*may he live long, I am he told, he has the picked up a combat with the soldiers of the King? What do you say, friend? That is indeed true? Let, today, be extinct-the name of the supreme King. Let these flames of fire the arms of* Kṛśāśva, *henceforth be extinguished* (16).

Rāma—*Who is then that, with dark complexion of saphire? Only the sound of his voice makes the hair of my body stand at their end, and I resemble a Kadamba tree which at the deep thundering of a dark new cloud, has instantaneously put forth its bud.* (17).

Lava That is exactly my elder brother the noble Kuśa returning from the hermitage of Bharata.

Rāma—(*With curiosity*) My boy, bring him here, may he live long!

Lava—All right. He moves away.

Kuśa—(*Brandishing his bow with dignity, delight and fortitude.*)

If with those, by whom the security as recompensation, was granted to Indra, who, since the venerable Manu Vaivasvat, in order to consume the arrogant people, lighted

---

दीपित इत्यादि (समासः)—दीपितः निजः क्षत्र-प्रतापः एव अग्निः यैः तैः तथोक्तैः ।

Ślaka 18—Metre :Śārdūla-Vikrīḍitam (see p. 54)

3. दत्तेन्द्र इति (समासः)—दत्ता इन्द्रस्य अभय-दक्षिणा यैः तै तैः ।

Allusion is perhaps to Kakutstha whom Indra called to help him to conquer the Demons.

Manu Vaivasvanta—Son of the Sun (*Vivasvant*)—founder of the principal dynesties mentioned in the Purāṇas, especially the Solar dynesties of Ayodhyā. This verse has been cited by Saras. Kbh. V. as an example of abhimānikī Priti—*pleasure born out of Pride.*

4. **Grammatical Note.** 'Ā Manoḥ'—governs a noun in the ablative. *cf* Pāṇina 1. 4. 39. आङ् मर्यादा वचने ।

आदित्यैर्[1] यदि विग्रहो नृपतिभिर् धन्यं ममैतत् ततो,
दीप्तास्त्र-स्फुरद्-उग्र-दीधिति-शिखा-नीराजित-ज्यं[2] धनुः ॥१८॥

(इति विकटं परिक्रामति)

रामः—कोऽप्य् अस्मिन् क्षत्रिय-पोतके पौरुषातिरेकः ।

दृष्टिस् तृणीकृत-जगत्-त्रय-सत्त्व-सारा,
धीरोद्धता नमयतीव गतिर् धरित्रीम् ।
कौमारकेऽपि गिरिवद् गुरुतां दधानो
वीरो रसः किम् अयम् एत्य् उत दर्प एव ॥१९॥

लवः—(उपसृत्य) जयत्व् आर्यः ।

कुशः—नन्व् आयुष्मन् ! किम इयं वार्ता 'युद्धं युद्धम्' इति ।

लवः—यत् किंचिद् एतत् । आर्यस् तु दृप्तं भावम् उत्सृज्य विनयेन वर्तताम् ।

कुशः—किम अर्थम ?

लवः—यद् अत्र देवो रघु-पतिस् तिष्ठति । स च स्निह्यत्य् आवयोर् उत्कण्ठते च युष्मत्-सन्निकर्षस्य ।

कुशः—(सतर्कम्) स रामायण-कथा-नायको ब्रह्मकोषस्य गोपायिता ?

---

1. आदित्य—अदितेः अपत्यम् आदित्यः (ण्यत)

2. दीप्त-इत्यादि (समासः)—दीप्तानां अस्त्राणां याः स्फुरन्त्यः उग्राः दीधितयः तासां शिखाभिः नीराजिताः ज्या यस्य तत् ।

Nīrājita—Pass. Past Participle from √raj with nis—causal. to perform the nīrājana ceremony. Nirajana is an act of showing lights to the idol. Kane mentions it also a religions ceremony performed in the month of Āśvin (Nov-Dec.) before taking the field (*cf*. Kane notes. p 171). The derivation ponited out by the commentator Kṣīra Svāmin is:

"नीरस्य (शान्त्युदकस्य) अजनं (क्षेपः) अत्र इति नाराजनम्—मन्त्रोक्त्या वाहनायुधादेर् निःशेषेण राजनं वा ।"

their own Kṣatriyan fires, if with those kings, the descendant of Raghu, there is going to be a combat, then, blessed be my bow, round whose chord illuminate the flames of the formidable and flashing rays of the ardent arrows. (18).

(*He moves in haughty strides*).

Rama—There is in this small Kṣatriya some excess of virility.

His look which is the essence of of the triple world, noble and firy, his gait seems to bend the earth, in his adolescence; he has the mangnonimity of the mountain. It is the Heroic Sentiment which comes to me or else the Pride in person. (19).

Lava—(*Approaching*) May the noble brother be victorious!

Kuśa—Well, dear brother, what is this talk about 'combat, combat'?

Lava—Oh, it is quite trifling, noble brother. Give up your natural arrogance and behave modestly.

Kuśa—Why so?

Lava—For here stands the King, the head of the Raghus. He loves us both and is very anxious to see you.

Kuśa—(*Reflecting*) The hero of Rāmāyaṇa?—the guardian of the treasure of the Vedas?

This verse has been cited by Sar. Kbh. (V. 167) as an example of 'abhimānikī (Prīti)'—*joy born out of pride.*

Śloka 19—Metre: Vasanta-tilaka (see p. 11). This stanza has been quoted by Sah-Dar (91) and Daśa. (II. 11) as an example of 'vilasa'—*vivacity* of which Dhīrā dṛṣṭi—*steady look*, and citrā gati—*wonderful gait* and others are indices. (See Mme. Stchoupak. 121. n.)

लवः—अथ किम् ।

कुशः—आशंसनीय-पुण्य-दर्शनः स महात्मा । किंतु कथम अस्माभिर् उपगन्तव्य इति न संप्रधारयामि ।

लवः—यथैव गुरुस् तथोपसदनेन[1] ।

कुशः—कथं हि नाम एतत् ।

लवः—अत्य् उदात्तः सुजनस् चन्द्रकेतुर् औमिलेयः प्रिय-वयस्य इति सख्येन माम उपतिष्ठते । तेन तत्-सम्बन्धेन धर्मतात एवायं राजर्षिः ।

कुशः—संप्रत्य् अवचनीयो राजन्येऽपि प्रश्रयः ।

(उभौ परिक्रामतः)

लवः—पश्यत्व् एनम आर्यो महापुरुषम आकारानुभाव-गाम्भीर्य-संभाव्यमान-विविध-लोकोत्तर-सुचरितातिशयम्[2] ।

कुशः—(निर्वर्ण्य)

अहो प्रासादिकं रूपम् अनुभावश्च पावनः !
स्थाने रामायण-कविर् देवीं वाचम् व्यवीवृतत्[3] ॥२०॥

(उपसृत्य) तात ! प्राचेतसान्तेवासी कुशोऽभिवादयते ।

रामः—एह्य् एहि आयुष्मन् !

अमृताध्मात-जीमूत-स्निग्ध-संहननस्य[4] ते ।
परिष्वङ्गाय वात्सल्याद् अयम् उत्कण्ठते जनः ॥२१॥

---

1. Upasadana—Kane takes it as. उपसदनेन=आगमनेन । But Mme. Stchoupak takes it as disciples who come to be seated near their preceptor (Guru) in order to receive religious instruction.

2. आकार इत्यादि (समासः)—आकारः अनुभावः गाम्भीर्यं च तैः सम्भाव्यमानः त्रिविधानां लोकोत्तराणां सुचरितानां अतिशयः यस्य स तम् ।

Śloka 20—Metre: Anuṣṭubh.

Lava—Oh, Yes.

Kuśa—This great man has an attractive and august appearance. But how is he going to be accosted by us. I cannot concieve.

Lava—Exactly as a spiritual father; reverentially.

Kuśa—How is it possible ?

Lava—He very emminent and noble Candraketu, son of Urmilā treats me as friend. This Royal sage, therefore, is really our father out of custom simply.

Kuśa—In that case the respect is not at all objectionable, though shown to a man of noble caste.

(*Both move about*).

Lava—May my noble brother look at this mighty hero: his manners, his majesty, his serenity make us comprehend the profusion of his various excellent exploits uncommon to mortals.

Kuśa—(*Observing* Rāma)

O, Handsmeness, benificence and serene ! O, Majasty purifying ! How rightly the poet of Ramāyaṇa has manifested the Goddess of Speech (*i.e.* : *Poetry*) (20)

Father, Kuśa—the disciple of Vālmīki salutes you. *Rāma*—Come dear boy, come.

Your body glissing and sweet, resembling a cloud full of embrosia is longed eagerly, out of affection, to be embraced by this man. (21)

Grammatical Note—Vyavivṛtat—

Redulicated aorist from vi+vṛt (see notes on pages 31-32) *cf.* Ramāyaṇa (II. 5-6) where *vivarta* is called as Śabda-Brahman—*the Sacred Word*.

Śloka 21.—Metre: Anuṣṭubh, In Sāhitya Darpaṇa (241) Vātsalya—*affection of the parents for their children* is enumerated in the list of Rasa. Bharata's Nāṭya Shastra does not mention it. The first Hermistiche is also found in Mv II. 46.

(परिष्वज्य । स्वगतम्) तत् किम् अपत्यम् अयं दारकः ?

अङ्गाद् अङ्गात् सृत इव निज-स्नेहजो देह-सारः,
प्रादुर्भूय स्थित इव बहिश् चेतना-धातुर् एव ।
सान्द्रानन्द-क्षुभित-हृदय प्रस्नवेनैव[1] सृष्टो.
गात्रं श्लेषे यद् अमृत-रस-स्रोतसा सिञ्चतीव ॥२२॥

लवः—तात ! ललाटंतपो[2] घर्मांशुः तद् अत्र साल-वृक्ष-च्छाये मुहूर्तम् आसन-परिग्रहं करोतु तातः ।

रामः—यद् अभिरुचितं वत्सस्य ।

(सर्वे परिक्रम्य यथोचितम् उपविशन्ति ।

रामः—(स्वगतम्)

अहो प्रश्रय-योगेऽपि गति-स्थित्य् आसनादयः ।
साम्राज्य-शंसिनो भावाः कुशस्य च लवस्य च ॥२३॥

वपुर् अवहितसिद्धा एव लक्ष्मी-विलासाः,
प्रतिकल-कमनीयं कान्तिमत् केतयन्ति[3] ।
अमलिनम् इव रत्नं रश्मयस् ते मनोज्ञाः
विकसितम् इव पद्मं बिन्दवो माकरन्दाः ॥२४॥

भूयिष्ठां च रघुकुल-कुमार-च्छायाम् अनयोः पश्यामि ।

अमृत-इत्यादि (समासः)—अमृतेन (जलेन) आध्मातः जीमूतः (मेघः) तद्वत् स्निग्धं संहनन (वपुः) यस्य स तस्य ।

Verse 22.—Metre; Mandakranta. (See pp. 46-47).
Compare: A verse quoted in Nirukt a (Ch. III).

अङ्गाद् अङ्गात् संभवसि, हृदयाद् अधिजायसे ।
आत्मा वै पुत्र-नामासि स जीव शरदः शतम् ॥

सान्द्र-इत्यादि (समासः)—सान्द्रः (घनः) आनन्दः तेन क्षुभितं हृदयं तस्य यः प्रस्नवः तेन ।

(*Embracing him, aside*) whose child would this boy be?

As though, flowing from every limb of mine under the effect of my own tenderness, he is the essence of my body, as though revealed in a bodily form, he is the substance of my thought. It seems, he has sprung from the effusion of my heart agitated by an intense joy and my body embracing him, it seems, is bathed in a pool of embrosia. (22)

Lava—My father, the sun is hurting you on the forehead. May my father be seated for a while in the shade of this Śāla tree.

Rāma—As it please my dear child. All move about in order and take their seats, (*Aside*).

Ah, In this act of civility, in their gait, manners of sitting and the rest, all these behaviours of Kuśa and Lava indicate their Royal bearing. (23)

Their body with its exquisite charms and natural perfection appears to us pleasant and embellished with beauty. It their body appears to be a pure jewel emanationg charming race, or the necterine drops of a blossomed lotus. (24)

---

2. Grammatical Note.—ललाटंतपतीति ललाटंतप: (उपपद-समास:) This form has been attested by Pāṇini (III. 2.36.) असूर्य-ललाटयोर्दृशि तपो: by which the nasal element is put after 'lalāṭa' in accordance with "अरुर्द्विषद् अजन्तस्य मुम्"

Śloka 23.—Metre; Anuṣṭubh.

Śloka 24—Metre: Mālinī. (See p. 32).

3. Ketayati.—Denominative of 'Keta'—*A place of rendezvous* The use here is inattested elsewhere and is associated with 'Keta'—*form*; *image* Kane: Ketayati'—*adorns*.

4. माकरन्दा:—मकरन्दस्य इमे माकरन्दा: ।

कठोर-पारावत-कण्ठ-मेचकम्[1]
वपुर् वृष-स्कन्ध सुबन्धुरांसकम्[2] ।
प्रसन्न-सिंह-स्तिमितं च वीक्षितम्
ध्वनिश् च माङ्गल्य-मृदङ्ग-मांसलः[3] ॥२५॥

(निपुणं निरूप्य) अये न केवलम् अस्मद् अङ्ग-संवादिन्य् आकृतिः ।

अपि जनक-सुतायास् तच् च तच् चानुरूपम् ,
स्फुटम् इह शिशु-युग्मे नैपुणोन्नेयम्[4] अस्ति ।
ननु पुनर् इव तन् मे गोचरीभूतम् अक्ष्णोर्
अभिनव शतपत्र-श्रीमद्[5] आस्यं प्रियायाः ॥२६॥

मुक्ताच्छ-दन्त-च्छवि-सुन्दरा[6] इय [
सैवोष्ठ मुद्रा[7] स च कर्ण पाशः ।
नेत्रे पुनर् यद्यपि रक्त-नीले.[8]
तथापि सौभाग्य ·गुणः स एव ॥२७॥

Śloka 25.—Metre: Vamśastha: Patha of 12 syllables.

जतौ तु वंशस्थमुदीरितं जरौ ।

जगण	तगण	जगण	रगण
I S I	I S I	I S I	S I S

1. कठोर- पाराव- तकण्ठ- मेचकं

कठोर-इत्यादि (समासः)—कठोरः पारावतः (कपोतः) तद्वत् मेचकं (ला) यत् तत् तत् ।

2. वृषस्कन्ध-इत्यादि (समासः) —वृषस्य स्कन्ध इव सुबंधुरौ अंसौ यस्य तत् तत् ।

3. माङ्गल्य इत्यादि (समासः)—मङ्गले वादितः माङ्गल्यः यः मृदङ्गः तद्वत् मांसलः ध्वनिः ।

And I recognise in them a great resemblance with the Princes of the family of Raghu.

Sombre, like the neck of a fully matured pigeon, is their body with the shoulders well-built like the neck of a bull; their look remains steady like that of a resting lion; their voice has deep sound of a ritual-drum. (25)

(*Observing with attention*) Ah, but it is not only their face that resembles mine.

Is it not that, this one or that one still resembles the daughter of Janaka? That what I see in this couple, is to be contemplated thoroughly. Is it not that which comes back in the sphere of my eyes, with its splendour of very young hundred-leafed lotus, the face of my beloved? (26)

Embellished with the lustre of her white pearl-like teeth, it is quite the same stamp of her lips, and the same snare of her ears, if, on the other hand, though the bluishness of the eyes in them tends to be red, the virtue of her charm, nevertheless, is the same. (27)

Śloka 26—Metre: Mālinī (See P. 32). This verse has been cited by Sarasvati-kbh. (V. 167) as an example of an affection founded on resemblance (aupamānikī prīti).

Unneya—*to be inferred*: (See P. 39). Mme. Stchoupak says it is the 'anumāna'—*inference founded on certain sign*, an element rejoinder of the action called 'garbha-saṃdhi'. (Théatre Indien 46).

5. अभिनव इत्यादि (समासः)—अभिनवं शतपत्रं (कमलं) तद्वत् श्रीमत् ।

Sloka 27—Metre: Indravajrā (See P. 17)

6. मुक्ताच्छ-इत्यादि(समासः)—मुक्तावत् अच्छाः (सुन्दराः) ये दन्ताः तेषां या छविः तया सुन्दरा या सा ।

Saivoṣṭha—This irregular Sandhi, for (Saivauṣṭha') is generally not admitted in the compounds (e. g. adharoṣṭha) cf. Stchoopak 124. n.

8. Rakta-nīla—The boys were worriors., therefore

(विचिन्त्य) तद् एतत् प्राचेतसाध्युषितम् अरण्यं यत्र किल देवी परित्यक्ता । इयं चानयोर् आकृतिर् वयोऽनुभावश्च । यदपि स्वतः प्रकाशान्य् अस्त्राणि इति तत्र विमृशामि । अपि खलु तत् चित्र-दर्शन-प्रासङ्गिकम् अस्त्राभ्यनुज्ञानम् उद्भूतं स्यात् । न ह्य् असम्प्रदायिकान्य् अस्त्राणि पूर्वेषाम् अप्य् अनुशुश्रुमः । अयं च संप्लवमानं सुखदुःखातिशयो हृदयस्य मे विस्रम्भयते । यमाव इति च भूयिष्ठम् आत्म-संवादः । भूयिष्ठं च मया द्विधा प्रतिपन्नो देव्या गर्भिणीभाव आसीत् ।

(सास्रम्)

पुरा रूढे स्नेहे परिचय-विकासाद् उपचिते,
रहो विश्रब्धाया अपि सहज-लज्जा-जडदृशः[1] ।
मया एवादौ ज्ञातः करतल-परामर्श-कलया
द्विधा गर्भ-ग्रन्थिस् तदनु दिवसैः कैर् अपि तया ॥२८॥

(रुदित्वा) तत् किम् एतौ पृच्छामि केनचिद् उपायेन ।

लवः—तात ! किम् एतत् ?

वाष्प-वर्षेण नीतं वो जगन्-मङ्गल-मानसम् ।
अवश्यायावसिक्तस्य पुण्डरीकस्य चारुताम् ॥२९॥

कुशः—अयि वत्स !

विना सीतादेव्या किम् इव हि न दुःखं रघुपतेः
प्रिया-नाशे कृत्स्नं किल जगद् अरण्यं हि भवति ।
स च स्नेहस् तावान् अयम् अपि वियोगो निरवधिः
किम् एवं त्वं पृच्छस्य् अनधिगत-रामायण इव ॥३०॥

---

their eyes had a reddish tinge in blue. The explanation of Vírarághava that their eyes were red, whereas the eyes of Sitā were blue is unconvincing. This only refers to the fact that 'red' eyes for women had a bad omen (cf. Manu III 8), but for

(*After reflection*) This is the very forest inhabited by the boys of the son of Pracetas, where, I am told, the queen was abandoned. This should be their appearance and then their age, their majesty......and also the Arrows are revealed to them spontaneously—that point I must comtemplate upon, or, the authority, that I gave at that time of seeing pictures, might have been accomplished?...For, I have not heard the people were never revealed without tradition. And, there is also such an excess of joy and sorrow produced in my heart,—it reassures me in my trouble !...And above all, I had percieved the double pregnancy of the queen !...

When our love, formerly, increasing under effect of integral intimacy, had attained its zenith, in secret, her eyes, so confident as she had been, were numbed out of her natural bashfulness,—I was first to notice, thanks to the art of gentle touch of my palm, the double fruit formed in her foetus. Some days after she had also noticed it. (28)

(*Weeping*) Do I enquire of them by some device ?

Lava—Father, what is this ?

Under the rain of tears, your face, which has given blessings to the Universe, puts on the charm of the lotus besprinkled with rose. (29)

Kuśa—Well, my dear father

Excepting the queen Sitā, is there anything else that brings sorrow to the master of the Raghus ? the venerable disappeared and the whole world became, oh, yes a desolate forest...This love so great and also this endless separation—Why do you interrogate him so, as though, you have not read the Rāmāyaṇa? (30)

---

the warriors it may be a conventional characteristic.

Śloka 28—Metre : Śikhariṇi (See P. 38).

1. सहज-इत्याति (समासः)—सहजा या लज्जा तया जडादृक् यस्याः सा तस्याः ।

Śloka 29—Metre : Anuṣṭubh.

Śloka 30—Metre : Śikhariṇi (See P. 38).

रामः—(स्वगतम्) अये तट-स्थित आलापः ! कृतं प्रश्नेन । मुग्ध-हृदय ! कोऽयम् आकस्मिकस् ते स्नेह-परिप्लवो विकारः ? एवं च निर्भिन्न-हृदयावेगः शिशु-जनेनाप्य् अनुकम्पितोऽस्मि । भवतु तावद् अन्तरयामि[1] । (प्रकाशम्) वत्सौ रामायणं रामायणम् इति श्रूयते भगवतो वाल्मीकेः सरस्वती-निष्यन्दः प्रशस्तिर् आदित्य-वंशस्य । तत्र कौतुहलेन यत् किंचित् श्रोतुम् इच्छामि ।

कुशः—स कृत्स्न एव संदर्भोऽस्माभिर् आवृत्तः । स्मृति-प्रत्युपस्थितौ तावद् इमौ बाल-चरितस्यान्तेऽध्याये द्वौ श्लोकौ ।

रामः—उदीरयतु वत्सः ।

कुशः—प्रकृत्या एव प्रिया सीता रामस्यासीत् महात्मनः ।
प्रियभावः स तु तया स्वगुणैर् एव वर्धितः ॥३१॥
तथैव रामः सीतायाः प्राणेभ्योऽपि प्रियोऽभवत् ।
हृदयं त्व् एव जानाति प्रीति-योगं परस्परम् ॥३२॥

रामः—कष्टम् अतिदारुणोऽयं हृदय-मर्मोद्घातः । हा देवि ! एवं किलैतदासीत् । अहो निरन्वय-विपर्यास-विरस-वृत्तयो विप्रलम्भ[2]-पर्यवसायिनस् तापयन्ति संसार-वृत्तान्ताः ।

क तावान् आनन्दो निरतिशय-विस्रम्भ-बहुलः[3],
क वाऽन्योन्यप्रेम क च नु गहनाः कौतुक-रसाः ।

---

1. Antarayāmi—Denominative vb. from *antara*

Śloka 31-32—This Scene was inspired from Rāmāyaṇa (VII 93-94) where the boys recite the poem of Vālmiki before their father. The verses occur in Gorresio Edition of Rāmāyaṇa (Paris 1843—1888). But in Bombay addition the verses are different.

2. Vipralambha—*Deception*. But in rhetorical term it means "*love in separation*." (cf. Sāh. Dar. 212 ff.; Regnaud 302-3. cf. VI 32-33 where the word is employed in two verses (1). Parikalpanā—*rare*—a

Rama—(*Aside*) Ah, this is an indiffernt speech... unless to question them. O, stupid heart what is this sudden emotion which inundates you with tenderness? This, the anxiety of my heart is divulged, that I have become an object of pity of the children even. Be it so. I would change the topic. (*Aloud*) My children, we have heard a lot about Rāmāyaṇa—this flow of eloquence of the venerable Vālmīki, proclaming the glory of the dynasty of the Sun. I would, out of curiosity, like to hear something of it.

Kuśa—We have precisely learnt the entire work. Here, at first, are two stanzas which I seem to have remembered. They are to be found in the last chapter of Bāla-carita.

Rāma—Recite, my boy.

Kuśa—*Naturally Sītā hereself was dear to Rāma—the magnonimous, but she had increased this love through her own qualities.* (31)

And, in the same way, to Sītā, Rāma was more loved than her own life, for, it is the heart which knows the reciprocation of love. (32)

Rāma—Alas, how cruel is it, it saps the vitals of my heart. Ah, queen, it was to be even so. Alas! that they should (make a paripotecia a sudden turn of fortune) of our changeable existence, such an insipid unfolding of the sudden changes bordering upon deception!

Where is that bliss so great, augmented by our unsurpassed confidence? Where is that reciprocal love; where are those profound delights? In prosperity as well

---

philosophical Buddhistic term, (2) and Saṃkalpa. (cf. P. 154). Kane translates it विप्रलम्भे (वियोगे) पर्यवस्यन्ति इति *That end in separation.*

Śloka 33—Metre: Śikhariṇī (See P 38)

निरतिशय-इत्यादि (समासः)—निरतिशयः यः विस्रम्भः तेन बहुलः ।

सुखे वा दुःखे वा क्व नु खलु तद् ऐक्यं हृदययोस्,
तथाप्य्-एष प्राणः स्फुरति न तु पापो विरमति ॥३३॥
भो कष्टम् !

प्रिया-गुण-सहस्राणाम् एकोन्मीलन-पेशलः ।
य एव दुस्मरः कालस् तम् एव स्मारिता वयम् ॥३४॥

तदा किंचित् किंचित् कृतपदम् अहोभिः कतिपयैस्
तद् ईषद्-विस्तारि स्तन-मुकुलम् आसीद् मृगदृशः ।
वयः-स्नेहाकूत-व्यतिकर-घनो[1] यत्र मदनः
प्रगल्भ-व्यापारः स्फुरति हृदि मुग्धश् च वपुषि ॥३५॥

लवः—अयं च मन्दाकिनी-चित्रकूटवन-विहारे सीतादेवीम् उद्दिश्य रघुपतेः श्लोकः—

त्वद् अर्थम् इव विन्यस्तः शिला-पट्टोऽयम् अग्रतः
यस्यायम् अभितः पुष्पैः प्रविष्ट इव केसरः ॥३६॥

रामः—(सलज्जा-स्मित-स्नेह-करुणम्) अति हि नाम मुग्धः शिशुजनः, विशेषतस्त्व अरण्य-जनः । हा देवि, स्मरसि वा तस्य प्रदेशस्य-तत्-समय-विश्रम्भातिप्रसङ्ग-साक्षिणः ।

L. 1 The same idea is expressed I 39.

Śloka 34—Metre : Anuṣṭubh.

Śloka 35—Metre :—Śikharinī (See P. 38) This verse accurs in Mālatī-Mādhava (IX. 29.) with reading *carati* instead of *sphurati*.

1. वयः-इत्यादि (समासः)—वयः स्नेहः आकूतं च तेषां यः व्यतिकरः तेन घनः यः स तथोक्तः ।

Śloka 36—This śloka does not occur in Rāmāyaṇa. A commentator points out that that might have been omitted by the copyists. A nearest version of it has been mentioned by Mme. Stchoupak in the Bombay edition II, 95. etc. :, (also cf. Jacobi Rām. P. 13).

as adversity, where is that union of our heart? And, however, this breath of life, still throbs and that accursed one does not stop. (33)

Oh Misery! *Oh, how charming was this time which on account of thousands of virtues of my beloved, I am reminded of, the memory of which is so painful to me.* (34)

Then their place was marked, little by little; after some days like the tender buds, the breasts of the beautiful fawn-eyed Sītā, were slightly expanded......... It was then, that the Cupid was deepened by the combined effort of age, affection and desire, throbbs audaciously and actively in her heart, but was naive in her body. (35)

Lava—And this was the stanza which during their walk in the wood of Citrakūṭa-mountains near Mandākinī that the Head of the Raghus addressed to Sītā :—

For you, as if, had been installed this stone-slab in front of us, upan which fram all sides, a Kesara tree was raining flowers (36)

Rāma—(*Smiling with embarrassement, affection and sorrow*). The children are really naive, especially those who live in the forest. Ah, Queen, do you remember this site,—the testimony of our exteme and confident affection at that time.

Ah, misery!

त्वदर्थम् इव विन्यस्ता त्व॒ इयं श्लक्ष्ण-समा शिता ।

यस्याः पार्श्वे तरुः पुष्पैः प्रकृष्ट इव केसरैः ॥

स्मरसि···प्रदेशस्य । कर्मणि षष्ठी प्रयोगः । अधीगर्थदयेशां कर्मणि Pāṇinī II. 3. 52—The verbs meaning 'दय्' and 'ईश्' govern genitive of the object.

श्रमाम्बु-शिशिरीभवत् प्रसृत-मन्द-मन्दाकिनी
मरुत्-तरलितालकाकुल-ललाट-चन्द्र-द्युतिः[1] ।
अकुंकुम-कलङ्कितोज्ज्वल-कपोलम्[2] उत्प्रेक्षते
निराभरण-सुन्दर-श्रवण-पाशमुग्धं[3] मुखम् ॥३७॥

(स्तम्भित इव स्थित्वा सकरुणम्)

अहो नु खलु भोः !
चिरं ध्यात्वा ध्यात्वा निहित इव निर्माय पुरतः
प्रवासेऽप्य् आश्वासं न खलु न करोति प्रियजनः
जगज् जीर्णारण्यं भवति च विकल्प-व्युपरमे,
कुकूलानां राशौ तद् अनु हृदयं पच्यत इव ॥३८॥

(नेपथ्ये)

वसिष्ठो वाल्मीकिर् दशरथ-महिष्यौऽथ जनकः
सहैवारुन्धत्या शिशु-कलहम् आकर्ण्य सभयाः ।
जरा-ग्रस्तैर् गात्रैर् अथ खलु विदूराश्रमतया
चिरेणागच्छन्ति त्वरितमनसोऽपि श्रम-जडाः ॥३९॥

रामः—कथं भगवत्य् अरुन्धती अम्बाश् च जनकश् चात्रैव । कष्टं कथं खल्व् एते द्रष्टव्याः । (सकरुणं विलोक्य) अहह ! तात-जनकोऽपि दैवाद् अत्रैवायात इति वज्रेण इव ताडितोऽस्मि मन्दभाग्यः ।

Sloka 37—Metre : Pṛthvī. (See P. 281).

Mme. Stchoupak says that 'Mandākinī' is not the name of the Ganges here, as we see in Act III, but it is a small river in the neighbourhood of Citrakūṭa.

1. प्रसृत इत्यादि (समासः)—प्रसृतः मन्दः मन्दाकिनी-मरुत् तेन तरलिताः ये अलकाः तैः आकुलाः या ललाट-चन्द्रस्य द्युतिः यस्मिन् तत् (मुखम्)

Refreshed by the transpiration. when the wind was rising gently from the Mandākinī, it made your locks dangle about, agitationg as well as the moon-shine of your forehead; your glowing cheeks where devoid of the dye of the saffron; your frank unornamented snares of ears—such seemed to me your face. (37)

(*He remains immobile as if paralysed with sadness.*)

Alas! ah, alas!

When long and constant thought is centred upon something created and is kept under our eyes, the beloved, even though absent, does not but console us. But, having the universe become a desolate forest, when that illusion has disappeared and then on a heap of burnishing wood, the heart, hereafter, seems to be roasted (38)

(*Behind the scenes*)

Vasiṣṭha, Vālmīki, the wives of Daśaratha and also Janaka, together with Arundhatī, having heard the the news of the combat of the children, are full of anxiety. Old age has worried their limbs and the hermitage is really very far, that is why they have arrived very late with quick spirit, though slow on account of fatigue. (39)

Rāma—What! the venerable Arundhatī and Vasiṣṭha and our mothers and Janaka,—all here. Alas! How in reality, shall I be able to face them? (*Looking with sadness*) Ah, ah, that my father Janaka also is percahnce here—I am struck asif, by thunderbolt, luckless that I am!

---

2. अकुङ्कुम-इत्यादि (समासः)—न कुङ्कुम इति अकुङ्कुमः तेन कलङ्कितौ अतएव उज्ज्वलौ कपोलौ यस्य तत् (मुखम्)

3. निराभरण-इत्यादि (समासः)—निराभरणाश्च असौ सुन्दरश्च कर्णपाशः तेन मुग्धं यत् तत (मुखम्)

Śloka 38-39—Metre : Śikhariṇī. (See P. 38).

सम्बन्ध-स्पृहणीयता-प्रमुदितैर् ज्येष्ठैर् वसिष्ठादिभिर्
दृष्ट्वापत्य-विवाह-मङ्गल-महे तत् तातयोः सङ्गमम् ।
पश्यन् ईदृशम् ईदृशे पितृ-सखं वृत्ते महावैशसे
दीर्ये किं न सहस्रधाहम् अथवा रामेण किं दुष्करम् ? ॥४०॥

(नेपथ्ये)

भोः भोः कष्टम ?

अनुभवमात्र-समवस्थित-श्रेयम्[1]
सहसा एव वीक्ष्य रघुनाथम् ईदृशम् ।
प्रथम-प्रमूढ-जनक-प्रबोधनाद्
विधुराः प्रमोहम् उपयान्ति मातरः ॥४१॥

रामः—हा तात ! हा मातरः ! हा जनकः !

जनकानां च रघूणां च यत् कृत्स्नं गोत्रमङ्गलम् ।
तस्मिन् अकरुणे पापे वृथा वः करुणा मयि ॥४२॥

यावत् सम्भावयामि । (इत्य् उत्तिष्ठति)

कुश-लवौ—इत इतस् तातः ।

(सकरुणाकुलं परिक्रम्य निष्क्रान्ताः सर्वे)

इति कुमारप्रत्यभिज्ञानो[2] नाम षष्ठोऽङ्कः ।

Verse 40—Metre : Sārdūla-vikrīḍiam. (See P. 54).

Verse 41—Metre : Mañjibhāṣiṇī. (See P. 26).

1. अनुभाव-इत्यादि (समासः)—अनुभावः एव इति अनुभावमात्रं, तस्मिन् समवस्थिता श्रीः यस्य स तम् ।

Verse 42—Metre : Anuṣṭubh.

Having seen our two fathers meeting at the celebration of their children's nupti al-benediction approved by Vasiṣṭha and the others, that, that much desired union was expressively happy, having seen such an intimate friend of my father, fallen in such a disastrous state,—why do I not split asunder in thousand pieces? But, no, for Rāma, what may be difficult?......(40)

(*Behind tne scenes*)

Hallo! hallo! Misery! misery!

Having suddenly seen the Head of the Raghus in such a condition, as well as hiss splendour, which only remains in his majesty, Janaka was the first who lost his consciousness and after he came to his senses, a prey to dispair, the mothers are about to faint. (41)

Rāma—Ah, my father! Ah, my mothers, Alh, Janaka!......

Towards her, who was the benediction-total of the Janakas and the Raghus, criminal that I am, I was without pity—in vain is therefore, your pity for me. (42.)

I am going to pay my homages to them however.

Kuśa—This way, father, this way.

(*They all walk about with sad emotion*)

[*Exuent all*]

End of the Sixth Act called :—

"THE RECOGNITION OF THE PRINCES".

---

2. Kumāra-pratyabhijñāna—In this act a stratāgy is created in such a way that Rāma is in the act of recognizing the Princes as his sons, although this recognition is only complete in the Act VII, when Vālmiki actually reveals their identily and hands them over to the king. Compare also the 7th Act of Abhijñāna-śākutalam. where Kālidāsa brings about the recognition between Duṣyanta and his son Bharatā.

सप्तमोऽङ्कः

(ततः प्रविशति लक्ष्मणः)

लक्ष्मणः—भो भोः ! अद्य खलु भगवता वाल्मीकिना सब्रह्म-क्षत्र-पौरजानपदाः प्रजाः सह अस्माभिर् आहूय कृत्स्न एव सदेवासुर-तिर्यग्-उरग-नायक-निकायः जङ्गमः स्थावरस् च भूतग्रामः स्वप्रभावेण संनिधापितः । आदिष्टस् चाहम् आर्येण, वत्स लक्ष्मण ! भगवता वाल्मीकिना स्वकृतिम् अप्सरोभिः प्रयुज्यमाना द्रष्टुम् उपनिमन्त्रिताः स्म । तद् गङ्गा-तीरम् आतोद्य-स्थानम् उपगम्य क्रियतां समाज-सन्निवेश इति । कृतश् च मर्त्यामर्त्य-भूतग्रामस्य समुचित-स्थान-संनिवेशो मया । अयं तु—

राज्याश्रम-निवासेऽपि प्राप्त-कष्ट-मुनिव्रतः ।
वाल्मीकि-गौरवाद् आर्य इत एवाभिवर्तते ॥१॥

Scene: The scene of this act has been laid in the hermitage of Vālmiki and the events are to take place just after those of the Act VI. In this Act a 'Play within the Play' has been represented. An imaginary idea of the dramatist was that Vālmiki himself composed a drama which was enacted in the represence of Rāma himself, the countrymen and citizens of Ayodhyā at whose instance Sitā was banished. By this device Sitā's chastity and the falseness of the scandle are proved. Thus it this Act that brings about happy

ACT VII

(Enter Lakṣmaṇa)

Lakṣmnṇa—Hallo, hallo. The venerable Vālmiki after having summoned the people, the Brāhmaṇas and Kaṣatriyas, citizens and country-peoples as well as us, has equally brought, by his power, all the hoards of moveables and immoveables, comprising the crowds of the principal gods, demons, animals and serpant. And as far as myself, I have received the orders from my noble brother: "My dear Lakṣmaṇa, the venerable Vālmiki has invited us to see his own play, performed by the celestial nymphs. Therefare, go to the place of the concert at the banks of the Gaṅgā and get busy in seating the spectators." And I have installed the essemblage of the mortals and immortals to their seats. And here—

Even in his royal capacity, adopting the rustinc vow of the ascetics, out of respect for Vālmiki, my noble brother is coming himself here. (1)

---

reunion of Rāma with Sitā and their two sons Lava and Kuśa.

Śloka 1. Metre: Anuṣṭubh.

प्राश्निकाः—प्रश्नम् अर्हति इति प्राश्निकः । 'तदर्हति' पा. ५.१-६३

This means a 'judge'—one who judges the merits and demerits of a play (see Naṭyaśāstra 27, 47-50).

अथवा प्रश्नं ज्ञातव्यम् अर्थ-जिज्ञासाम् अर्हति इति प्राश्निकाः (वीर-राघवः) ।

(ततः प्रविशति रामः)

रामः—वत्स लक्ष्मण ! अपि स्थिता रङ्ग-प्राश्निकाः* ?

लक्ष्मणः—अथ किम् ।

रामः—इमौ पुनर् वत्सौ कुशलवौ कुमार-चन्द्रकेतु-सदृशीं प्रतिपत्तिं लम्भयितव्यौ ।

लक्ष्मणः—प्रभु-स्नेह-प्रत्ययात् तथैव कृतम् । इदं च आस्तीर्णं राजासनम् । तद् उपविशत्व् आर्यः ।

रामः—(उपविशति)

लक्ष्मणः—प्रस्तूयतां भोः !

(प्रविश्य)

सूत्रधारः[1]—भोः भोः ! भगवान् भूतार्थवादी प्राचेतसः स्थावर-जङ्गमं जगद् आज्ञापयति—यद् इदम् अस्माभिर् आर्षेण चक्षुषा समुद्वीक्ष्य पावनं करुणाद्भुतरसं च किंचिद् उपनिबद्धं, तत्र काव्य-गौरवाद् अवधातव्यम् इति ।

रामः—एतद् उक्तं भवति । साक्षात्कृत-धर्माणो[2] महर्षयः । तेषाम् ऋतम्भराणि[3] भगवतां परो-रजांसि प्रज्ञानानि न क्वचित् व्याहन्यन्त इति नाभिशङ्कनीयानि ।

See p. 285.

1. Sūtradhāra.—Here begins the Play, within the Play'. This is called Garbhāṅka—*Embrionic Act*. It consists all the elements of an Act, *e.g.*, Prologue, (Praśt vanā), germ (bīja), and dénonment (phala) *cf*. Sāh. Dar. 279:—

अङ्कोदर-प्रविष्टो यो, रङ्गद्वार-मुखादिमान् ।

अङ्कोपरः स गर्भाङ्कः, स बीजः फलवान् अपि ॥

Cf. also Théatre Indien 97-98. This Garbhāṅka has been compared to the Symbeline of Shakespeare by A. V. William Jackson in his "Certain Dramatic Elements in Skt. Plays" (J. of Phil. XIX, p. 241 ff).

Enter then Rāma

Rāma My dear Lakṣmaṇa, have the spectators taken their seats ?

Lakṣmaṇa—Oh, yes.

Rāma—As for those two children, Kuśa and Lava, they must have a seat in the same rank as the Prince Candraketu.

Lakṣmaṇa—Exactly that is what I have done, convinced of the aflection of the king for them. Here is the royal seat of the king. Let my noble brother be seated here. (*Rāma sits down*) Let the play be commenced.

Anter

Stage-Manager—Hallo, the venerable son of Pracetas, the interpretor of the Truth, informs the moveable and immoveable world : "what we have perceived with our clairvoyant eye, we have arranged in a certain purifying play which is full of the sentiment of pity and wonderment." Out of the regard for the poet, attention is solicited.

Rāma—It is said. "the clairvoyant has had the revelation of Dharma" Bearing truth, the knowledge of these venerables is free frotim passion, and is never erroneous, nor, therefore, it is subject to any doubt.

Both the dialogues, that of the Principal Act and that of the 'garbhāṅka' go on simultaneously. This 'garbhāṅka' is composed by Bhavabhūti himself and is ascribed in the Drama to Vālmiki.

2. साक्षात् कृतधर्माणः—Compare ; Nirukta (Ch. I). साक्षात्कृत-धर्माण ऋषयो बभूवुः, तेऽवरेभ्यो ऽसाक्षात्-कृत-धर्मभ्यः उपदेशेन मन्त्रान् सम्प्रादुः ।

3. ऋतम्भरः—ऋतं बिभ्रति इति ऋतम्भरः । "ऋतम्भरा तत्र प्रज्ञा" (योगसूत्रम् १. ४८) This is the the yogic term atrested in Maha. V Ch. also. Ghanaśyāma corrects it as 'Amṛtambhara' as the former form is against

(नेपथ्ये)

हा अज्जउत्त ! हा कुमार लक्खण ! एआइणिं मन्दभाइणिं असरणं अरण्णे आसण्ण-प्पसव-वेअणं हदासं सावदा मां अहिल-सन्दि । साहं दाणि मन्दभाइणीं भाईरईए अत्ताणं णिक्खिविस्सम ।

[हा आर्यपुत्र ! हा कुमार लक्ष्मण ! एकाकिनीं मन्दभागिनीम् अशरणाम् अरण्ये आसन्न-प्रसव-वेदनां हताशां-श्वापदा माम् अभिलषन्ति । सा अहम् इदानीं मन्दभागिनी भागीरथ्याम् आत्मानं निक्षेप्स्यामि]

रामः—(आत्मगतम्) कष्टं ! बत अन्यद् एव किम् अपि ।

सूत्रधारः—विश्वम्भरा आत्मजा देवी राज्ञा त्यक्ता महापने ।
प्राप्त-प्रसवम् आत्मानं गङ्गादेव्यां विमुञ्चति ॥२॥

(इति निष्कान्तः)

प्रस्तावना

रामः—(सावेगम्) देवि देवि ! क्षणम् अवेक्षस्व !

लक्ष्मणः—आर्य नाटकम् इदम् ।

रामः—हा देवि ! दण्डकारण्य-वास-प्रियसखि ! एष ते रामाद् दैव-दुर्विपाकः ।

लक्ष्मणः—आर्य ! दृश्यतां तावत् प्रबन्धार्थः ।

रामः—एष सज्जोऽस्मि वज्रमयः ।

[ततः प्रविशत्य् उत्सङ्गितैकैक-दारकाभ्यां पृथिवीगङ्गाभ्याम् अवलम्बिता सीता]

रामः—वत्स लक्ष्मण ! असंविज्ञात-पद-निबन्धनम् अन्ध-तामसम् इव प्रविशामि । धारय माम् ।

देव्यौ—समाश्वसिहि कल्याणि ! दिष्ट्या वैदेहि ! वर्धसे ।
अन्तर् जले प्रसूताऽसि रघुवंश-धरौ सुतौ ॥३॥

सीता—(समाश्वस्य) दिट्ठिआ दारए प्पसूदम्हि । हा अज्जउत्त !
(दिष्ट्या दारकौ प्रसूताऽस्मि ! हा आर्यपुत्र !

(इति मूर्च्छति)

(*Behind the scenes*)—Ah, my lord! ah Prince Lakṣmana! all alone! Without shelter! in the forest, when the labours of the child-birth are at hand and all hopes are lost, the ferocious animals wish (to devour me).

Rāma. Alas! that is something strange.

The Stage-Manger—*The daughter of the Earth, the queen whom the king abandoned in the dense forest at the time when her child-birth was approaching, is precipitating herself into the divine Gaṅgā.* (2).

(*Exit*).

(End of the Prologue).

Rāma—(*With excitement*). Queen, queen, wait a moment.

Lakṣmaṇa—Noble brother; this is the theatrical Performance.

Rāma—Ah, Queen, dear companion of my sojourn of Daṇḍaka, such is, on account of Rāma, an issue of the cruel fate.

Lakṣmaṇa—Noble brother, you must at first see the events of the play.

Rāma—Here I am ready, hard as adamant.

(*Enter Sita supported by the Earth aud the Gaṅgā, each one of them carrying a child*)

Rāma—Dear Lakṣmaṇa, I believe, I am sinking into a pitch of darkness of unfortunate depth. Support me!

Both the goddesses—*Come to your senses, O pretty! Joy! Be felicitated! O Prineess of Videha! In the laps of waters you have given birth to two sons—the upholders of the race of Raghu* (3).

Sītā—(*Regaining consciousness*) O joy! I have given birth to two boys Ah, my Lord!...........(*She faints*)

---

the rule of Paṇini. संज्ञायां भृ-तृ-वृजि-धारि-सहि-तपि-दमः (पा० ३. २. ४६)

Verse 2-3. Metre: Anuṣṭubh

लक्ष्मणः—(पादयोर् निपत्य) आर्य, आर्य ! दिष्ट्या वर्धामहे। कल्याण-प्ररोहो रघुवंशः । (विलोक्य) हा ! हा ! कथं क्षुभित-बाष्पो उत्पीड-निर्भरः प्रमुग्ध एव आर्यः । (वीजयति)

सीता—(समाश्वस्य) भअवदि ! का तुमं इअं अ ?
(भगवति का त्वम् इयं च ?)

पृथिवी—इयं ते श्वशुर-कुल-देवता भागीरथी ।

सीता—भअवदि ! णमो दे । [भगवति नमस्ते]

भागीरथी—चारित्रोचितां कल्याण-सम्पदम् अधिगच्छ !

लक्ष्मणः—अनुगृहीताः स्म ।

भागीरथी—इयं तु जननी ते विश्वंभरा ।

सीता—हा अम्ब ! ईदिसी अहं त्वया दिट्ठा ।
[हा अम्ब ! ईदृश्य् अहं त्वया दृष्टा]

पृथिवी—एहि वत्से ! एहि पुत्रि ! ।
(इति सीताम् आलिङ्गय मूर्च्छति)

लक्ष्मणः—(सहर्षम्) दिष्ट्या गङ्गा-पृथिवीभ्याम् अभ्युपपन्ना आर्या ।

रामः—(अवलोक्य) दिष्ट्या खलु एतत् करुणतरं खलु एतद् वर्तते ।

भागीरथी—विश्वंभराऽपि नाम व्यथत इति जितम् अपत्य-स्नेहेन । यद् वा सर्व-साधारणो ह्य् एष मोह-ग्रन्थिर् अन्तश् चर-चेतनावताम् अनुपप्लवः संसारतन्तुः । देवि भूतधात्रि ! वत्से वैदेहि ! समाश्वसिहि, समाश्वसिहि !

पृथिवी—देवि ! सीतां प्रसूय कथम् आश्वसिमि ?
सोढश् चिरं राक्षस-मध्य-वासस्
त्यागो द्वितीयश् च सुदुःसहो ऽस्याः ।

Laksmaṇa—(*Throwing himself at Rāma's feet*) My brother, my brother! we are to be felicitated. The race of Raghu has an auspicious offspring. (*Observing*) Alas, alas! a prey to the overwhelming trrents of tears, my noble brother is fainting. (*He fans him*)

The Earth—Dear child, come to your senses.

Sītā—(*Regaining consciousness*) Who are you and who is that one?

The Earth—This one is the goddess of the family of your father-in-law, the Bhāgīrathī.

Sītā—I salute thee, venerable!

Bhāgīrathī—May you attain auspicious fortune befitting your chastity!

Laksmaṇa—We are favoured.

Bhāgīrathī—This is your mother—the Earth.

Sītā—Ah, mother! you were to see me in this plight!.........

The Earth—Come child, come! my girl!......... (*While embracing Sītā she faints*).

Laksmaṇa—(*With joy*) What a good luck! My noble sister was thus helped by the Gaṅgā and the earth.

Rāma—(*Beholding*) It has been all that, as the luck would have it. Here, what is more pathetic in store for us?

Bhāgīrathī—Even Viśvambharā (the Earth) is afflicted, as it is the affection of a child that triumphs all over. Or, else, it is common to all, this madness which binds the spirit, this interior trouble of the living beings, this thread which passes through the cycles of existences. Goddess, you who supports the living beings and you dear child, the Princess of Videha, compose yourself, compose yourself!

The Earth—Having given birth to Sītā, how could I acquire calmness?

Her sojourn amongst the demons, I have endured long, and her second exile is too intolerable.........

Verse 4—Metre: Indravajrā (see p. 17).
The second Hemistiche is found in Māl. X, 13.

भागीरथी—को नाम पाकाभिमुखस्य जन्तोर्
द्वाराणि दैवस्य पिधातुम् ईष्टे ॥४॥

भगवति ! भागीरथी सद्यम् उक्तम् । युक्तम् एतद् वा रामभद्रस्य ।
न प्रमाणीकृतः पाणिर् बाल्ये बालेन पीडितः ।
नाहं न जनको नाग्निर् नानुवृत्तिर् न संततिः ॥५॥

सीता—हा अज्ज उत्त ! सुमराविदम्हि ।
[हा आर्यपुत्र ! स्मारिताऽस्म]

पृथिवी—आः कस् तव आर्यपुत्रः ?

सीता—(सलज्जास्रम्) जह वा अम्बा भणादि ।
[यथा वा अम्बा भणति]

रामः—अम्ब पृथिवि ! ईदृशोऽस्मि ।

भागीरथी—भगवति वसुंधरे ! शरीरम् असि संसारस्य । तत् किम् असंविदानेव जामात्रे कुप्यसि ?

घोरे लोके विततम् अयशो या च वह्नौ विशुद्धिर्
लङ्का-द्वीपे कथम् इव जनम् ताम् इह श्रद्दधातु ।
इक्ष्वाकूणां कुलधनम् इदं यत् समाराधनीयः
कृत्स्नो लोकस् तद् इह विषमे किं स वत्सः करोतु ?॥६॥

लक्ष्मणः—अव्याहतान्तः-प्रकाशा हि देवताः सत्वेषु ।

भागीरथी—तथाप्य् एष ते ऽञ्जलिः ।

रामः—अम्ब ! अनुवृत्तस् त्वया भगीरथ-कुले प्रसादः ।

पृथिवी—देवि ! नित्यं प्रसन्नाऽस्मि वः । किन्त्व् आपात-

Compare: Śakuntalā: I, 16.

(१) अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र ।

(२) दैवी च सिद्धिरपि लंघयितुं न शक्या (मृच्छ०)

(३) यत्पूर्वं विधिना ललाट-लिखितं तन्मार्जितुं कः क्षमः (भर्तृहरिः) ।

Bhagīrathī—*Who thus is powerful enough to close the door of the destiny of a being, which is about to mature.* (4).

The Earth—Having given birth to Sītā, how could I acquire calmness?

He did not take anything into consideration, neither the hand, which as a child he took in their childhood, nor myself nor Janaka, nor the Fire, nor her conduct, nor their offspring. (5).

Sītā—Ah, I am reminded of my Lord.

The Earth—Ah, who is your noble lord to you now?

Sītā—(*With tears of shame*). It is quite so, as my mother suggests.

Rāma—Earth, my mother, you have rightly depicited me!

Bhāgīrathī—Venerable Earth, you are the very body of the world. Why then you are angry with your son-in-law as if you do not know him?

Terrible is the dishonour which is spread in the world. As regard her purification in the island of Laṅkā, how the people here could have believed? The treasure of the family of Ikṣvāku is to satisfy the entire populace. Then, in such a cruel embarrassment what would my child (Rāma) have done? (6).

Lakṣmaṇa—Certainly, the goddesses are gifted with regard to men with an unobstructed penitration.

Bhāgirthī—Whatever may it be, with my folded hands, I am supplicant to you.

Rāma—Mother, constant is your pardon with to the descendants of Raghu.

The Earth—I am always favourably inclined towards you. This is an outburst of my affection hard

---

